Along with this there are 13 leaves (by counting), containing महाविद्यास्तोत्र from रुद्रयामल, नवग्रहयन्त्रोद्धार from महाभारत and various incantations about sorcery and alchemy; and also three leaves marked 2, 14 and 15, belonging to a work on medicine.

5839.

8250. *Vīrabhadratantram.*

Substance, country-made paper. 10½ × 4½ inches Folia, 25 Lines, 8 on a page. Extent in ślokas, 400. Character, Nāgara. Date, Samvat 1909. Appearance, discoloured. Complete

Last Colophon :—

इति श्रीवीरभद्रे महातन्त्रे ईश्वरपार्व्वतीसंवादे उड्डीशकोषशास्त्रं संपूर्णम् ।

Post Colophon :—

अधिक भाद्रमासे तु नवम्यां बुधवासरे ।
लिखितं नान्दीमिश्रेण उड्डीशकोषशास्त्रतां ॥ संवत् १९०९ ॥

5840.

1369. *Vīrabhadratantram.*

Substance, country-made paper. 10⅛ × 4½ inches Folia, 25. Lines, 9 on a page. Extent in ślokas, 450. Character, Nāgara Appearance, tolerable. Complete.

At the end there are a few lines in Hindi.

End :—

फेर दुधमे गोली वाँध रखे जहा विच्छी मारे तहा मन्दारके दुधमे घसीके लगावे विच्छी अवश्यकरी उत्तर जाय ।

Colophon :—

इति श्रीवीरभद्रमहातन्त्रे उड्डीशमन्त्रमारे सर्व्वमत्यं भवति ४शमो पटलः ॥

5841.

10602. *Vīrabhadratantram.*

Substance, foolscap paper. $8\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 43. Lines, 6 on a page. Character, modern Nāgara. Date, Saṃvat 1922. Appearance, fresh. Complete.

At the end are found the same lines in Hindi as have been quoted in the description of the previous MS. In the last colophon the work is called उड्डीशमन्त्रसार.

Post Colophon :—

मीती फागुन वदि ६ कुजौ सम्वत् १९२२ इदं पुस्तकं हरिपाला + + लिष्यते सम्पूर्णं शुभमस्तु यो प्रतिदेखा सो लिखा मम दोखो न दियते शुभमस्तु शुभं भवतु ।

5842.

8105. *Vīrabhadratantram.*

Substance, country-made paper. 14 × 4 inches. Folia, 8. Lines, 9 on a page. Extent in ślokas, 200 Character, Bengali. Appearance, fresh. Complete.

The MS contains four Paṭalas. The beginning agrees with HPR. I. 339 which omits several of the preliminary verses found in most MSS.

It ends :—

ॐ ऊँ ३ अमुकं फट् स्वाहा । अनेन कार्पासबीजमलावुकबीजं स्तनघनबीजं च कटुतैलयुतं च यस्य नाम्ना होतव्यं तस्य विस्फोटको जायते । ॐ क्रौं क्रौं नः अनेन सप्ताहमासने जप्त्वा भोक्तव्यं । वश्यीकरणमेतत् ।

Colophon :—

इति वीरभद्रतन्त्रे चतुर्थपटलः ।

After the colophon, an incantation in Bengali is given.

5843.

10437. *Vīrabhadratantram.*

Substance, country-made paper. 9½ × 4 inches Folia. 4. Lines, 11, 12 on a page. Extent in ślokas, 104 Character, Nāgara. Date, Samvat 1862. Appearance, old and discoloured Complete

This MS contains only a collection of Tāntrika mantras of sorcery, though the colophon calls the work Vīrabhadra-tantra.

Beginning :—

ॐ नमो भगवते रुद्राय ।

क्रीं हूं ३ फट् स्वाहा सर्व्वभूतडाकिनीयोगिनीदमनमन्त्रः ।

ॐ हूं प्रमोदय क्रीं प्रमोदय ए २ हूं ३ स्वाहा अनेन मन्त्रेण करवीरपुष्पेण होमः कर्त्तव्यः घृतक्षौद्रयुक्तेन सहस्रैकशतेन कान्तां लभेत ॥

End :—

उलूकस्य च गृध्रस्य मार्ज्जारस्य तथैव च ।
एतेषां नेत्रमानीय सूक्ष्मचूर्णं तु कारयेत् ॥
जयंतिमामवास्यायं चूर्णं कृत्वा विधानतः ।
अञ्जयेच्चक्षुषी येन दिनवद्रात्रि पश्यति ॥
किलकियायां अनुक्तस्थले कौल उद्धृते मोक्षः ।

Colophon :—

इति वीरभद्रतन्त्रं समाप्तं ।

Post Colophon :—

संवत् १८६२ माघमास कृष्णपक्षे अमातिथौ इदम् पुस्तकं दुलभराम विसं नागरजः रामकृष्णस्य आत्मजस्य ।

5844.

9372. *Vīrabhadratantram.*

Substance, country-made paper. 9 × 4 inches. Folia, 6. Lines, 12 on a page. Extent in ślokas, 180. Character, Nāgara. Date, Samvat 1891. Appearance, tolerable. Complete.

The work explains in Hindi the application of a number of mantras intended for use in sorcery. The MS contains three Paṭalas.

Post Colophon Statement :—

संवत् १८९१ पौष सुदि १ ।

5845.

3476. कुलोड्डीशमहातन्त्रम् । *Kuloḍḍīśamahātantram.*

Substance, country-made paper. 16 × 4½ inches. Folia, 1–21, of which fol. 6 is missing. Lines, 9–13 on a page. Extent in ślokas, 925. Character, Bengali. Appearance, good. Complete in four Paṭalas.

For a description of the work see L. IX. 2961.

The object of the work is indicated thus (Fol. 1A):—

देव्युवाच ।

... ...

... ...

श्रुतानि सर्व्वशास्त्राणि त्वत्प्रसादान्महेश्वर ।

शेषोऽस्ति केवलं या हि श्रीमद्घोषोड्डीशे पुरा ॥

उद्दिष्टा मनसा नाथ कथ्यतां भक्तवत्सल ।

... ...

ईश्वर उवाच ।

आदौ तु श्रूयतां देवि या या विद्या सुगोपिता ।
तदा तु कथयिष्यामि श्रीमच्छाषोडशीं ध्रुवम् ॥

देव्युवाच ।

दुर्ल्लभा पञ्चमी विद्या पञ्चकूटात्मिका शुभा ।
नित्या च मुक्तिदा शुद्धा सुखदुःखविनाशिनी ॥
तां विद्यां वद देवेश यदि तुष्टोऽसि मे प्रभो ।

ईश्वर उवाच ।

... ...
... ...

आदौ कामेश्वरी ज्ञेया तथा वज्रेश्वरी शुभा ।
तृतीया भगमाला च तुर्य्या त्रिपुरसुन्दरी ॥
नित्या च पञ्चमी शक्तिः परब्रह्मस्वरूपिनी ।
नित्यचैतन्यरूपा च परमाह्लादकारिणी ।

The Last Colophon :—

इति कुलोड्डीशे महातन्त्रे ब्रह्मज्ञानप्रस्तावः समाप्तः ।

5846.

10418. रावण उड्डीश । *Rāvaṇa-uḍḍīśa.*

Substance, foolscap paper. 6½ × 4½ inches. Folia, 48. Lines, 7 on a page. Extent in ślokas, 336. Character, modern Nāgara Date, Samvat 1922. Appearance, discoloured. Complete.

The work is called रावण उड्डीश in the first line as well as in the last colophon of this MS. In the remaining two colophons, e.g. of chapters I and II (Foll. 12B and 15B), it is called वीरभद्रमहातन्त्र.

Post Colophon :—

मीती फाल्गुने कृष्णे पक्षे षष्ठी सौम्यवासरे संवत् १९२२ दसखत ठाकुरप्रसाद कुनवी साकिम महल्ले गोरखनाथकाटिल्ला ॥

5847.

8475. रावणोड्डीशडामरतन्त्रसारः ।

Rāvaṇoḍḍīśaḍāmaratantrasāraḥ.

Substance country-made paper. $10\frac{1}{4} \times 4\frac{1}{4}$ inches. Folia, 37. Lines, 7 on a page. Extent in ślokas, 150 Character, modern Nāgara. Appearance, fresh. Complete.

It will be noticed that Meghanāda, presumably a name of Bhairava, is found here, at least once, in the extract quoted below, answering the question of Pārvatī. It may be due to a confusion with this name that Indrajit, son of Rāvaṇa who is also called Meghanāda, is associated as its author with a work called *Kriyoḍḍīśa* (Kalyan, 1924). The association of this work with the name of Rāvaṇa might have also given rise to a similar association with the name of Indrajit.

Beginning :—

ॐ श्रीगणेशाय नमः ॥

उड्डीशे च समाकीर्णे योगिवृन्दसमाकुले ।
प्रणम्य शिरसा गौरी पर्य्यपृच्छति शङ्करम् ॥ १ ॥
विशेषेण तु तत्सर्व्वं कथयस्व प्रभो मम ।
अन्येपि विविधैः कार्य्या मन्त्राश्च ब्रूहि भैरव ॥ २ ॥
ईश्वर श्रोतुमिच्छामि लोकनाथ जगत्प्रभो ।
प्रसादं कुरु देवेश ब्रूहि कर्म्मार्थसाधनम् ॥ ३ ॥
सुर शङ्कर महादेव सर्व्वसिद्धिप्रदायक ।
पृच्छामि त्वां जगन्नाथ संसारस्थितिकारणं ॥ ४ ॥
पृच्छामि देवदेवेश लोकानां हितकाम्यया ।
वशीकरणमुच्चाटं मोहनं स्तम्भनं तथा ॥ ५ ॥
शान्तिकं पौष्टिकं कर्म्म विधानेन महेश्वरि ।
चतुर्हानि[र्म]नोहानिः अतिहानिस्तथैव च ॥ ६ ॥

ज्ञानहानिः क्रियाहानिः कौलकं च तथापरं ।
कार्य्यस्तम्भः सुरेप्राप्ति प्रोषणं पोषणं तथा ॥ ७ ॥
परद्रव्यागि विप्रेषेण तत्परं ब्रूहि मे प्रभो ।
अन्यांश्च विविधान् कार्य्यान् सात्त्विकान् ब्रूहि रावने(?) ॥ ८ ॥
सा नत्वास्यंजदोषाश्च भूतैश्चैव सदुर्जयै[:] ।
ज्वरश्चैव महारौद्रैर्ललना च महाद्रुमैः ॥ ९ ॥
मानवा दुर्ज्जने दुष्टे परार्थतत्त्व-तत्परैः ।
पतत् व्याघ्र (?) जगत् सर्व्वं नानाव्याधिसमाकुलं ॥ १० ॥
उदयं च कथं नृणां साधकानां सुखाय च ।
दुर्ज्जनानां च दुष्टानां पापिष्ठानां तथैव च ॥ ११ ॥
अशुभान् कथयं योगान् नानाव्याधिकरानपि ॥ १२ ॥

मेघनाद उवाच ।

पृटग् देवि वरारोहे सिद्ध्यर्थं यदि वाञ्छसि ।
तदादिष्यामि देवेशि तत्सर्व्वं समुदाहृतम् ॥ १३ ॥
देवि प्रयोजि तत्सर्व्वं भवत्येव न संशयः ।
उड्डीशयोग ते देवि मयोक्ता भक्तितस्तव ॥ १४ ॥

पार्व्वत्युवाच ।

उड्डीशं च नमस्कृत्य रुद्रशत्रुत्रयं तथा ।
कपर्द्दिनं विरूपाक्ष सर्व्वदुःखभयापहम् ॥ १५ ॥
ब्रूहि रुद्रो भयोद्वेगान् राजशत्रुर्विनिर्जनात् ।
यैनं प्रयोजितैः सद्यः प्राणान् हन्ति न संशयः ॥ १६ ॥

भैरव उवाच ।

प्रथमं भूपाकर्षणं द्वितीयोन्मादनं तथा ।
तृतीयं विद्वेषणं चैव उच्चाटनं चतुर्थकम् ॥ १७ ॥
अन्याजयिप्रयोगाणि वक्ष्यन् पृटग वरानने ।
शिवेन कथिता योगा उड्डीशे शास्त्रनिश्चये ॥ १८ ॥

ग्रामोच्चाटन पञ्च षष्ठं जलस्तम्भनं शुभनम् ।

++चाग्निस्तम्भनं वशीकरणमुत्तमं ॥ १९ ॥

अन्धीकरणं मूककरणं नात्र सङ्कोचनं तथा ।

स्तब्धीकरणं भूतज्वरकरणं शास्त्र शास्त्रदूषणं ॥ २० ॥

जातीयं विनाशं दधि-मधुनाशं मुखकरणं

वाजवाजिप्रकोपनं आवेशनं भुजङ्गानां तथैव च वरानने ॥ २१ ॥

सर्पाणि नाशनं पर्णविनाशनं तथा ।

गर्दभकरणं परपुरुषप्रवेशनं ।

वेतालसिद्धि अजमूलकं च

अन्यानपि तथा मौद्रान् विवाशास्त्रप्रयोगजं च ।

औषधान् विभाकरान् गुह्यगुप्ततरा कार्य्यान् ।

क्षिप्रव्याप्त प्रयत्नतः ॥ २२ ॥

अम्बलीने यथा चौरे भक्तिहीने सुरेश्वरि ।

निन्दकाय न दातव्या नास्ति कार्य्यान् क्षिप्रव्याप्त प्रयत्नतः ॥ २३ ॥

It ends with a direction in Hindi.

End :—

पालाशबीज मैदाकरै मदारके दूधमे पुट देय १०१ फेर दूधसों गोली वांधि +++ जहा विच्छीमारै तहां मदारके दूधसौ पिमिक लागावै तौ विच्छू उतरि याय ।

Colophons of the different chapters :—

8B, इति श्रीरावणमहातन्त्रे उड्डीशे महातन्त्रे प्रथमः पटलः; 10B, इति श्रीरावणतन्त्रे उड्डीशे मन्त्रकोशो द्वितीयः पटलः; 14A, इति श्रीरावण उड्डीशे महातन्त्रकोशे तृतीयः पटल; 22A, इति श्रीरावणतन्त्रे उड्डीशकोशे चतुर्थः पटलः; 29B, इति गोरोचनकल्पसमाप्तं; 30B, इति उलूकशास्त्रौषध समाप्तं. 31B, इति विधिसिद्धिर्भवति समाप्तं; 33B, इति श्वेतार्ककल्पं समाप्तं ।

37, इति श्रीतन्त्रराजमन्त्रे सारोद्धारे रावण-उड्डीश-डामर-तन्त्रसारे शिवपार्व्वतीसंवादे शङ्करप्रसादात् सत्यं सत्यं सत्यमिति सम्पूर्णम् ॥

.5848.

5621B. उड्डामरतन्त्रम् । *Uḍḍāmaratantram.*

Substance, palm-leaf. 14 × 1½ inches. Folia. 27 51 Lines. 1 5 on a page., Extent in ślokas, 550. Character, Udiya. Appearance. good. Complete.

The *Uḍḍāmareśvaratantra*, included in *Vividhatantra-saṃgraha* of Rasik Mohan Chatterji, refers to itself, in the last colophon, as an extract from the *Rudrayāmala* (*Rudrayāmaloddhṛta*). The last chapter is styled *Uḍḍīśa* in this colophon.

Colophons :—

32B. इति उड्डामरमहातन्त्रे प्रथम पटलः, 35B. इति उड्डामरेश्वरे महाकोषे द्वितीयः पटलः; 36A. इति उड्डामरेश्वरे महातन्त्रे अञ्जनाधिकारस्तृतीयः पटलः; 36B, ०चतुर्थः पटलः; 37A, ०भूतबाह्ये पञ्चमः पटलः; 38A, इति उड्डीशे मन्त्रवादे षष्ठः पटलः; 39A, इति श्रीउड्डामरेश्वरे महातन्त्रे पुरुषवश्याधिकारः सप्तमः पटलः; 39B, ०अष्टमः पटलः; 41A, नवमः पटलः; 42B, ०लम्पटो नाम दशमः पटलः; 44A, ०एकादश पटलः; 46A, ०द्वादशः पटलः; 48B, ०भूतभैरवो नाम त्रयोदशः पटलः; 52A, इति श्रीवीरभद्रमहातन्त्रे मन्त्रकोषो नाम चतुर्दशः पटलः; 54B, इति श्रीउड्डामरेश्वरे महातन्त्रे मन्त्रकोषो नाम पञ्चदशः पटलः ।

5849.

804. भूतडामरतन्त्रम् । *Bhūtaḍāmaratantram.*

Substance, country-made paper. 17½ × 2¾ inches. Folia. 28. Lines, 5, 6 on a page. Extent in ślokas, 532. Character, Bengali. Appearance, old. Complete in 15 Patalas.

The present manuscript is described in L. IV. 1598. Another MS has been described in IO. IV. 2551 (1). Three editions of the work in 16 Paṭalas, as edited by Rasik Mohan Chatterji, were published (Calcutta, 1879, 1891, 1931).

The work is in the form of an interlocution between Unmatta-Bhairava and Unmatta-Bhairavī. The cult of Bhūtaḍāmara has been dealt with by Dr. B. Bhattacharya in *Man in India* (Vol. XI, pp. 83ff.).

5850.

2801. *Bhūtaḍāmaratantram.*

Substance, country-made paper. $16\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 33. Lines, 7 on a page. Extent in ślokas, 980. Character, Bengali. Appearance, discoloured Incomplete.

The present MS contains the first 15 Paṭalas and the beginning of the 16th.

The 16th Paṭala begins thus :—

30B, अथातः संप्रवक्ष्यामि योगिनीसाधनोत्तमम् ।
सर्व्वदा सर्व्वकामार्थं देहिनां सर्व्वसिद्धिदम् ॥

It will be noticed that the first verse of the 16th chapter, as found in Chatterji's edition of the work, is absent here and in 5856 *infra*.

5851.

4025. *Bhūtaḍāmaratantram.*

Substance, country-made paper. $15 \times 4\frac{1}{2}$ inches. Folia, 20. Lines, 11 on a page. Extent in ślokas, 560. Character, Bengali. Date, Śaka 1644. Appearance, old and discoloured. Complete in 15 chapters.

Post Colophon :—

20A, श्रीमदुरुचरणो मम भक्तिरस्तु ।

यन्नभावादसत्कारे श्रीभाण्डाख्या-परगणाधिकारिणः श्रीनरेन्द्रायस्य ताड़नाग्रामे भाद्रस्य त्रयोविंशतिदिवसे बुधवासरे अष्टम्यां तिथौ समाप्तोऽयं ग्रन्थः । शुभमस्तु ॥ शकाब्दाः १६४४ । श्रीश्रीकृष्णदेवशर्म्मणो वटोऽदं ग्रन्थ धर्म्मार्थं मोक्षार्थञ्च । श्रीभवान्यै नमः ॥

5852.

4651. *Bhūtaḍāmaratantram.*

Substance, country-made paper. 19 × 4¼ inches. Folia, 25 Lines, 7 on a page. Extent in ślokas, 700. Character, Bengali. Appearance, old Complete.

The chapters are not numbered in the present MS. What is apparently the 15th chapter is followed by the *mantrakoṣa* according to the *Bhūtaḍāmara* and the *Yakṣaḍāmara* (Foll. 22A–25B). The last colophon has striking agreement with that of 5857 *infra* except for the name of the work.

5853.

5861. *Bhūtaḍāmaratantram.*

Substance, country-made paper. 9¾ × 4¼ inches. Folia, 41. Lines, 8, 10 on a page. Extent in ślokas, 760. Character, Nāgara. Date, Samvat 1780 and Śaka 1645. Appearance, fresh. Incomplete.

The present MS is incomplete in the beginning. The leaf marked 1 is not the beginning of Bhūtaḍāmara, but that of Jyotiṣmatīkalpa which runs :—

अथ ज्योतिष्मतीकल्प[ः] लिख्यते ।

श्रीभैरव उवाच ।

त्यत्यन्तमद्भुतप्रज्ञं लोकविस्मयकारकम् ।
ज्योतिष्मतीति विख्यातं रसायनमनुत्तमम् ॥

After the end of the 15th Paṭala of the *Bhūtaḍāmara* the MS gives (Fol. 40A-B), like IO. IV. 2551 (1), a few verses which are found as the beginning of Bhūtabhairava-tantra (*infra*).

The date of the copying of the manuscript is given (Fol. 40B-41A):—

शुभमस्तु संमत् ++++ १७८० शाके १६४५ वर्षे आश्वनि मासे कृष्णपक्षे दशमी बृहस्पतिवासरे पुष्यनिक्षत्रे सिद्धिना योगे काशीखण्डे आनन्दकानन-अविमुक्तक्षेत्रे स्वर्गद्वारेश्वरनिकटे श्रीहरामानसनमुषे श्रीवटुकभैरवसन्निध्ये मणिकरिणका-तारकेश्वर-ललिता-देवी-सिद्धिपीठे लिखिते गङ्गानाथजी ।

यदि शुद्धमशुद्धं वा ... ...

इति श्रीचूडामणितन्त्रे भूतडामरग्रन्थ संपूर्णं । शुभं मङ्गलं ददातु ।

5854.

8434. *Bhūtaḍāmaratantram.*

Substance, country-made paper. 8¼ × 5 inches. Folia, 51. Lines, 10 on a page. Extent in ślokas, 900. Character, Nāgara. Appearance, fresh Complete.

The 15th Paṭala comes to an end on Fol. 41B and then begins the *Bhūtabhairavatantra* (*infra*) which runs up to the end of the MS. This latter work is also complete in this MS but for the last verse.

5855.

10652. *Bhūtaḍāmaratantram.*

Substance, country-made paper. 11 × 4 inches. Folia, 5. Lines, 12 on a page. Extent in ślokas, 140 Character, Bengali. Appearance, fresh Incomplete.

The present MS contains chapters I–III and four lines of chapter IV.

5856.

2819. भूतडामरे योगिनीसाधनम् ।

Yoginīsādhanam from Bhūtaḍāmara.

Substance, country-made paper. 16 × 5½ inches. Folium, 1. Lines, 13 in all. Extent in ślokas, 22. Character, Bengali. Appearance, fresh. Complete.

This constitutes the 16th chapter of the Bhūtaḍāmara.

Beginning :—

श्रीदुर्गायै नमः ।

योगिनीसाधनम् । भूतडामरे ।

अथ तं संप्रवक्ष्यामि योगिनीसाधनोत्तमम् ।

सर्व्वार्थसाधनं नाम देहिनां सर्व्वसिद्धिदम् ।

Colophon :—

इति डामरोक्त-योगिनीसाधनम् ।

5857.

4584. भूतभैरवतन्त्रम् । *Bhūtabhairavatantram.*

Substance, country-made paper. 17½ × 4 inches. Folia, 6. Lines, 8 on a page. Extent in ślokas, 300. Character, Bengali. Appearance, not good. Complete.

Beginning :—

वह्निं वमन्तमीडे व्योममुखं दुर्निरीक्षमतिदीप्या ।

विबुधा हि यक्ष + + + भूतान्तकमीश्वरमनादिम् ॥

मन्त्राणामेषविशेषज्ञानं ज्ञापितं मुनैर्यत्नात् ।

क्रोधीशभैरवप्रोक्तं तदद्ये भूतभैरवं नाम ॥

... ...

... ...

अथो वक्ष्ये मनुकोषं यदुक्थितं भूतयक्षडामरयोः ।

क्रमणो बीजविधानं तत्र श्रोत्रादिविज्ञानम् ॥

It should be noted that the beginning of this work is also found at the end of No. 5853 above. An incomplete MS of the work is appended to another MS of *Bhūtaḍāmara* (5854 above). The work gives, *inter alia*, the meanings of words used to indicate mantras. A short notice of the work is given in IO. IV. 2551 (II).

End :—

यो भूत-यक्ष-डामरतन्त्रं श्रीभूतभैरवं वेद ।

स स्वर्ग मोक्षभागी शिव++ज्ञानं समपदः ।

Colophon :—

इति परमहंस-परिव्राज-परमरुद्रावतारगुरुचरणशरण-श्रीमत्-क्रोधीशभैरवविरचितं भूतभैरवन्नाम महातन्त्रं समाप्तम् ।

This colophon is in striking agreement with that of a different work described under 5852 above.

5858.

8433. मातङ्गीडामरम् । *Mātaṅgīḍāmaram.*

Substance, country-made paper. 7½ × 5 inches. Folia, 15. Lines, 10 on a page. Extent in ślokas, 300. Character, modern Nāgara. Date, Samvat 1961. Appearance, fresh. Complete.

The Tantra is written mostly in Hindi and deals with a number of magical rites.

Beginning :—

अथ मातङ्गीडामर लिख्यते ।

देव्युवाच ।

कैलासशिखरे देवं गुह्यात् प्रभोः ।

ईश्वरोवाच ।

किं पृच्छसि त्वया देवि गुह्यवार्त्ता महेश्वरि ।

त्वयाग्रे कथयिष्यामि सत्यं सत्यं वरानने ॥

देव्युवाच ।

देवाधिदेव देवे[प्र] यथा वदत्वमम ।

एवं [ए]ष्कामि मया नाथ मातङ्गीक्रमसाधनं ॥

केन प्रकारेण सिध्यंति प्रयोगाणि युगानि च ।

भूतेण देवि वरारोहे पूर्व्वमातङ्ग ऋषिर्भवेत् ॥

तस्याङ्के कुले जाता मातङ्गीस्व[गी] विश्रुता ।

चांडालि प्रेषिता भद्रा मांजारी वगुलामुखि ।

एते चतुर्महागोप्यं भेदगृह्यंस्च पार्वती ॥

एतक्रिया समाः श्रेष्ठजेकगेदिमुंडभेदतः ।

सर्वार्थसिद्धमाप्नोति नान्यथा शंकरोब्रवीत् ॥

उच्चाटनं मारणं च मोहनं वश्यकर्म्मणि ।

आकर्षणं विद्वेषणांस्चैव प्रयोगे षटमेव च ॥

मोहनं द्रावणांस्चैव राजकर्म्माणि चेटकं ।

पक्षादि रसायनं सिध्य नात्र कार्य्य मया युतं ॥

रुद्रायामले दशविद्या सिधिमाप्नोति ।

सर्वोपरि महाश्रेष्ठ मातङ्गिडामरणि च ॥

End :—

नरनाथमुंड १ स्वाननाथमुड २ मातङ्गनाथ ३ रुद्रनाथ ४ कांकलो-

पुत्र-बालनाथ ५ पञ्चभद्र ।

Colophon :—

14B, इति श्रीमातङ्गीडामरे हरगौरीसंवादे संपूर्ण ।

Post Colophon :—

संवत् १९४० मीति जेष्ट कृष्ण २ वार पैके गेज लिषा

वालगोवींदा ।

After this post-colophon occur two small sections in Hindi on two peculiar rites followed by the date of copying

of the MS, the previous date apparently being the date of the original from which the copy was made. This portion runs thus:—

अथ मालकागुणीकल्प लिख्यते मालकागुणी सेर २ तिलका तेल सेर २।

इति श्रीमालकागुणीकल्प संपूर्णः। अथ हाथमे पाग चटावन विधि ... ...

इति श्रीहाथमो पाग चटावनका विधि संपूर्ण:—

Post Colophon:—

हाल सं १९६१ मार्गशीर्ष शुक्ल १४ बुधवासरे मालवीय पंडित रघुनाथ रामेण लिखवाइतं लिखितं हनुमान द्विवेदी कास्याम् गोघट्टतटे।

5859.

8412. गौरीडामरम्। *Gaurīḍāmaram.*

Substance, European foolscap paper. 10 × 4 inches. Folia, 11. Lines, 7 on a page. Extent in ślokas, 132. Character, modern Nāgara. Date, Samvat 1961. Appearance, fresh. Complete.

A Tāntrika work full of Hindi incantations. It begins in Sanskrit thus:—

श्रीपार्वत्युवाच।

देवदेव महादेव + + + +

डामरस्य च व्याख्यातं विधिवत् कथ्यतां प्रभो॥

... ...

... ...

आकर्षणं वश्य मोहनं च मारणो उच्चाटनं तथा।

यक्षिणयां + + व्याख्यानं विधिवत् कथयेश्वर॥

End :—

अथ कौलोद्धारमन्त्रः । ॐ चण्डेश्वर हो डामरजनित कौलो-
द्धारणं कुरु कुरु स्वाहा इत्यनेन कौलोद्धारणं कुर्य्यादिधि विधि
च रे च यथा ।

इति श्रीगौरीडामरे वीरसाधनं संपूर्णं ।

Post Colophon :—

श्रीसंवत् १९४० मीति जेट कृष्ण ९ वार बुध लीखा बालगोविन्द
हाल सं १९९१ मार्ग शु १३ भौ० लिखितं रघुनाथमालवीयेन ।

Fol. 11A-B describe a rite called **मानभङ्गवीरसाधन**. This description is again followed by the name of the copyist, Raghunātha Mālavīya, and the date of copying (same as that given above).

5860.

3185. बृहद्भूतडामरतन्त्रम् । *Bṛhadbhūtaḍāmaratantram.*

Substance, Serāmpore paper. 13×5 inches. Folia, 110. Lines, 6 to 9 on a page. Extent in ślokas, 1,700 Character, Bengali. Appearance, fresh. Incomplete.

The present MS contains 24 Paṭalas and a part of what seems to be the 25th Paṭala. A MS of the work in 25 Paṭalas is in the library of the Vaṅgīya Sāhitya Parishat of Calcutta. An edition of the work in 15 Paṭalas was published in the *Indrajātadisangraha* of Rasik Mohan Chatterji (Calcutta, 1879).

Beginning :—

महोग्रं व्योमवदनं कोटिसूर्य्याग्निभास्वरम् ।
महाकालान्तकं नौमि श्रीबृहद्भूतडामरम् ॥
भुवनांधिपतिं कालं सर्व्वलोकप्रपूजितम् ।
महोन्मत्तं भैरवेशमनन्तं भैरवेश्वरम् ॥

शब्दब्रह्ममयं रौद्रं सर्व्वव्यापकविग्रहम् ।
उन्मत्तभैरवं नत्वाप्रच्छन्नुन्मत्तभैरवी ॥

उन्मत्तभैरव्युवाच ।

हृदानन्द-भूतेश सतीश भक्तवत्सल ।
वदस्व सर्व्वभूतेश श्रीहृद्भूतडामरम् ॥
कथं यक्षा नरा नागाः किन्नराः प्रमथादयः ।
डाकिन्यः कुलखेचर्य्यो देव-गन्धर्व्व-नायिकाः ॥
सिद्धदानवकन्याश्च योगिन्यः कामनायिकाः ।
जम्बद्वीपे कलौ सिद्धिं यच्छन्त्येषां वराङ्गणाः ॥
ये स्युः पापरता मिथ्यावादिनः शीलवर्জ्जिताः ।
सालस्या ये नरास्तेभ्यः साहाय्यं कुरुथ स्वयम् ॥
केनोपायेन नश्यन्ति कलौ क्लेशौघराशयः ।
महापातकलक्षाणि तथोपपातकानि च ॥
दुष्टग्रहा दुष्टनागा दुष्टभूतादयस्तथा ।
विनश्यन्ति तथा दुष्टा महाविघ्नकराश्च ये ॥
लभ्यन्ते सिद्धयः सर्व्वाः मोक्षपद्धतयः शुभाः ।
सिद्धयोऽप्यणिमाद्याः स्युर्महापातकनाशनाः ॥
अन्यान्नाशनतः पापमन्यस्त्रीगमनादिकम् ।
परद्रोहकृतं पापं परद्रव्याभिलाषकम् ॥
विश्वासादिकं पापमभिनिन्दा महाभयम् ।
कथं नश्यति देवेश हेलया नरकं तमः ॥
चन्द्रसूर्य्यप्रभो भूत्वा स्थितोरुद्रपुरे चिरम् ।
सुरेन्द्र-सिद्ध-नागेन्द्र-भूत-यक्षेन्द्र-नायिकाः ।
गुह्यवेतालगन्धर्व्व-महीन्द्रकुलनायिकाः ॥
हठादागत्य कामार्त्ता बलादालिङ्गयन्ति तम् ॥
उक्तयोगेन्द्रकन्याश्च भूतडामरनायिकाः ।
मन्त्रस्मरणमात्रेण केन सिद्धा भवन्ति ताः ॥

तथा ब्रह्मेश-शक्राद्या देवानामधिदेवताः ।
त्रयस्त्रिंशत्कोटयस्तु देवाः समरभैरवाः ॥
कथं स्यु-र्मारिता यूते विद्याशक्तिसमन्विताः ।
पुनः केन प्रकारेण मृता जीवन्ति निर्ज्जराः ॥
कृपया वद भूतेश त्वमेव शरणं प्रभो ।
श्रुत्वेति भैरवीवाक्यमुन्मत्तभैरवोऽब्रवीत् ।
उन्मत्तभैरवी प्राह सर्व्वं नियमपूर्व्वकम् ॥

Colophons of the different chapters :--

5A, इति श्रीबृहद्भूतडामरे महातन्त्रे ग्रन्थफलकथनं नाम प्रथमः पटलः ; 8A, ०द्वितीय पटलः, 13B, ०क्रोधनाम्ना शतनामस्तोत्रे तृतीय पटलः ; 17A, ०सिद्धिमन्त्रप्रभेदो नाम चतुर्थः ; 24A, ०कालात्मक सिद्ध-चक्रप्रभेदो नाम पञ्चमः ; 30B, ०यन्त्रभेदो नाम षष्ठः पटलः, 35B, ०कामभेदचक्र-प्रभेदो नाम सप्तमः पटलः ; 41B, ०मार्गनिर्णय-चक्रप्रभेदो नामाष्टमः पटलः ; 49B, ०भैरवी-भैरवसंवादे वेदचक्रप्रभेदो नाम नवम पटलः, 57B, ०षट्-कालात्मक-चक्रप्रभेदो नामः दशमः पटलः ; 61B, ०मुन्दरीमन्त्रकथने एकादशः पटलः ; 66B, ०मुन्दरीध्यानकथने द्वादशपटलः ; 73A, ०भूतिनीसाधन-विन्यासो नाम त्रयोदशः पटलः ; 78A, ०भूतिनीसिद्धिसाधनं नाम चतुर्दशः पटलः ; 82A, ०कालरात्रिसाधनं नाम पञ्चदशपटलः ; 85A, ०कालरात्रिस्तोत्र-मन्त्रविन्यासो नाम षोडशपटलः ; 88B, ०कालरात्रिकवचं नाम सप्तदशः पटलः ; 91A, महाभूतचेटिकासाधनं नामाष्टादशः पटलः, 93B, भूत-कात्यायनीसिद्धिसाधनं नाम ऊनविंशतिः पटलः ; 95B, भूतकात्यायनीसिद्धि-साधनं नाम विंशः पटलः ; 97B, ०उन्मत्तभैरवभैरवीसंवादे नायिकास्तोत्रकवच-विन्यासो नामैकविंश पटलः ; 100B, ०दिव्यनागेन्द्र नागिनीसाधनं नाम द्वाविंशति पटलः ; 102A, ०नागेन्द्रनागिनी-स्तोत्रात्मककवचविन्यासो नाम त्रयोविंशः पटलः ; 107A, ०देवेन्द्रकुलयोगिनीसिद्धसाधनं नाम चतुर्विंशपटलः ।

5861.

9999. चिदग्निडामरे प्रत्यङ्गिराविधिः ।

Pratyaṅgirāvidhi from Tridaśaḍāmara.

Substance, palm-leaf. 11½ × 2 inches. Folia, 14. Lines, 6 on a page. Character, old Nowari. Date, N.S. 309 Appearance, old. Complete.

The present MS contains only two Paṭalas of the Ḍāmara which is in the form of an interlocution between Devī and Bhairava.

Beginning :—

ॐ स्वस्ति । ॐ नमः शिवादिभ्यो गुरुभ्यः ।

हिमवच्छिखरे रम्ये सुरासुरनिषेविते ।

तत्र स्थाने सुखासीनं देवदेवं महेश्वरम् ॥

सुरासुरेन्द्रनमितं सिद्धगन्धर्व्वपूजितम् ।

कृताञ्जलिपुटा देवी इदं वचनमब्रवीत् ॥

श्रीदेव्युवाच ।

सर्व्वस्रोतोद्भवं ज्ञानं त्वत्प्रसादान्मया श्रुतं ।

का विद्या साकिनीनां तु दैत्यानां गतिनाशिनी ।

संसिद्धा या युगे घोरे सर्व्वसंशयभेदिनी ।

श्रीभैरव उवाच ।

पूर्व्वं गौरि महाघोरे श्मशाने कङ्कवीरके ।

आराधितोहं देवीभिर्यागे संपूजनाय च ॥

तां चोरु-संस्थां कृत्वा तु यातस्तत्र वरानने ।

चतुःषष्टिषु ये कोट्या साकिन्याद्या महाबलाः ॥

यज्ञभागं प्रयच्छन्ति चरुं कृत्वा स्वबान्धवान् ।

भुञ्जामि तमहं भद्रे क्रीडामि च चरामि च ॥

End :—

गुरुद्विष्टे भयाक्ते च कामलोभसमंन्विते ।

दातारो नरकं यान्ति सत्यं सत्यं न चान्यथा ॥

Colophons :—

7B, इति चिदग्निडामरे चतुर्विंशतिसाहस्रे प्रत्यङ्गिरविधि एकाग्नीतितमपटलः ।

14A, इति चिदग्निडामरे चतुर्विंशतिसाहस्रे प्रत्यङ्गिराविधि द्वाग्नीतित[म]पटलः । समाप्तं प्रत्यङ्गिराकल्पं ।

Post Colophon :—

चिदग्नानां तु सिद्ध्यर्थं डामरं निर्म्मितं पुरा ।

साधूनां तु हितार्थाय दुष्टसत्त्वनिपातनं ॥

संवत् ३०९ वैशाख शुक्ल-पञ्चम्यां रविवासरे श्रीश्रीवच्छरुद्रेण लिखितं । श्रेयोस्तु ।

5862.

3171. रुद्रयामलतन्त्रम् । *Rudrayāmalatantram.*

Substance, country-made yellow paper. 13 × 4 inches. Folia, 77. Lines, 6, 7 on a page. Extent in ślokas, 900. Character, Bengali. Appearance, fresh. Complete.

The MS is so very corrupt, that it is almost impossible to read it.

Beginning :—

अथचापि जगन्माता ख्यातिगाद्याद्यगोचरा ।

स्मृतिमात्रेण दुःखानि नाशयेद्देविनां प्रिये ॥

सर्व्वदा देवदेवेशि सर्व्वसिद्धि(ः)प्रदायिनी ।

अन्तर्मखमनोभावा सर्व्वयोगप्रवर्त्तिनी ॥

स्मरणात् सर्व्वजन्तूनां सर्व्वपापप्रणाशिनी ।

तत्त्वतो गुरुतः प्राप्ता विद्याष्टादशबोधिनी ॥

... ...

2B, यो यमन्त्राः परेशानि तेन देवेपि संयुताः ।
तैर्ज्जीवन्ति च मर्त्तेभ्यः कृतेभ्य इति मे मतिः ॥
सप्तर्षिप्र[कृ]त्यार्त्ता जगत् सृष्ट्यादिकर्त्तृका(ः) ।
एतेषां जीवभूतादि द्वादत्वत्तरमयं जगत् ॥

3A, श्रीदेव्युवाच ।
सफला निष्फलाश्चैव मुक्तिमार्गप्रबोधकाः ।
मानवा बहवः सन्ति वद तेषामनुत्तरम् ॥

श्रीशम्भुरुवाच ।
कालश्चिदस्मद्भक्तानामेतन्मूलमुदाहृतम् ।
आवयोर्नैव देवेशि मनूरीकारणात्मनोः ॥
सर्व्वेषामेव मन्त्राणां प्राप्ताधारा महेश्वरि ।
आवयोरपि तत्प्राप्य अनुत्तरमिति स्मृतम् ॥

Colophons of the different chapters :—

6A, इति रुद्रजामले अनुत्तरनिर्णयः प्रथमः पटलः ; 8B, इति रुद्रजामले शक्तिविस्तारनियमो द्वितीयः पटलः ; 10B, इति रुद्रजामले तृतीयः पटलः ; 13A, इति रुद्रजामले चतुर्थः पटलः ; 15A, इति रुद्रजामले पञ्चमः पटलः ; 22B, इति श्रीरुद्रजामले द्वादशसाहस्रके उत्तरषट्कं नाम षष्ठः पटलः ; 26B, इति श्रीरुद्रजामले पञ्चस्रोतोविभाग नाम सप्तमः पटलः ।

In the leaves 27 to 76 there is no colophon. The last leaf contains the following colophon :—

इति रुद्रयामले पञ्चमीपटलः ।

On the left hand margin of the last leaf, the name of the original owner is recorded thus :—

श्रीकृष्णानन्दनाथावधूताचार्य्यस्य पुस्तकमिदम् ।

The present MS seems to contain the Anuttaratantra, or First Part, whereas the printed editions of the work contain the Uttaratantra, or Second Part.

5863.

5213. *Rudrayāmalam.*

Substance, palm-leaf $17\frac{1}{2} \times 2\frac{1}{4}$ inches. Folia, 1–133 of which Fol. 125 is missing, and 124, 126–33 very badly damaged. Lines, 3 on a page. Extent in ślokas, 1,900. Character, Bengali. Appearance, old and worm-eaten. Incomplete.

Two editions of what is called the *Uttaratantra* or Second Part of the work published by J. Vidyasagara and R. Chatterji contain respectively 66 and 69 Chapters. This MS contains only a part of the work—Paṭalas 31–54 (29–52 of J. Vidyasagara's edition). The 54th Paṭala breaks off abruptly.

Beginning :—

ॐ नमो भवान्यै। श्रीआनन्दभैरव्युवाच।

अथ षट्चक्रयोगञ्च प्रवच्यामीह तत्त्वतः।

कुण्डलीयोगविविधं कृत्वा योगी भवेन्नरः॥

Colophons of the different chapters :—

4B, इति श्रीरुद्रयामले महाप्रलयनिर्णयं नाम एकत्रिंशत् पटलः; 9A, ०डाकिनी-ब्रह्मस्तोत्रं नाम द्वात्रिंशत् पटलः; 14A, इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भैरव्यादिस्तोत्रं नाम त्रयस्त्रिंशत् पटलः; 17B, इति श्रीरुद्रयामले कन्यवासिनीस्तोत्रं समाप्तम्; 38B, इति रुद्रयामले सर्व्व-तन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवभैरवीसम्वादे कुलकुण्डल्यष्टो-त्तरशतसहस्रनाम स्तवकवचं नामाष्टत्रिंशत् पटलः; 43A, इति रुद्रयामले उत्तरतन्त्रे स्वाधिष्ठान-श्रीकृष्णडाकिनीसाधनं नाम नवत्रिंशत् पटलः; 47B, इति ०श्रीकृष्णस्वाधिष्ठानप्रवेशो नाम चत्वारिंशत् पटलः; 52B, ०श्रीकृष्णास्तवकवचं नाम एकचत्वारिंशत् पटलः; 55A, ०षड्दलप्रकाशो नाम द्विचत्वारिंशत् पटलः; 60A, ०स्वाधिष्ठानडाकिनीस्तोत्रं नाम त्रिचत्वारिंशत् पटलः; 73B, ०कृष्णाराधि-कोल्लासे अष्टोत्तरसहस्रनामस्तोत्रं नाम चतुश्चत्वारिंशत् पटलः; 78A, इति श्रीरुद्रयामले उत्तरतन्त्रोद्दीपने मणिपूर-चक्रभेदप्रकाशो नाम षट्चत्वारिंशत् पटलः;

82A, इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने चितत्त्वालाकिनीमुक्तिस्तवनं नाम सप्तचत्वारिंशत् पटलः; 87B, इति श्रीरुद्रयामले वर्णध्यानकथनं नाम अष्टचत्वारिंशत् पटलः; 93B, इति रुद्रयामले षट्चक्रप्रकाशे रुद्रमुक्तिलाकिनी-स्तोत्रं ऊनपञ्चाशत् पटलः; 118A, इति श्रीरुद्रयामले उत्तरतन्त्रे शिवमन्त्र-प्रकाशो नाम पञ्चाशत्तमः पटलः; 121A, इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने रुद्रमृत्युञ्जयस्तवनं नामैकपञ्चाशत्तमः पटलः; 129A, इति श्री-रुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धिमन्त्रप्रकरणे भैरवभैरवीसम्वादे मणि-पूरभेदप्रकाशो नाम त्रिपञ्चाशत् पटलः।

5864.

5215. *Rudrayāmalam.*

Substance, palm-leaf. 17 × 1¼ inches. Folia, 1–117. Lines, 3 on a page. Extent in ślokas, 1,400. Character, Bengali. Appearance, old and soiled. Incomplete.

The manuscript begins with the 16th Paṭala and ends abruptly at the 26th. This portion does not agree with that of the printed edition.

5865.

3350B. रुद्रयामले कौलावलीतन्त्रम्। *Kaulāvalītantram from the Uttaratantra of the Rudrayāmala.*

Substance, palm-leaf. 10½ × 1½ inches. Folia, 58. Lines, 3, 4 on a page. Extent in ślokas, 600. Character, Bengali. Appearance, old, dilapidated and worm-eaten. Complete.

This MS contains extracts from different Tantras. The extracts from the *Rudrayāmala* cannot be identified but the extract from the *Kulārṇava* is found in the printed editions of the work.

Beginning :—

देव्युवाच ।

भगवन् सर्व्वमाख्यातं पुरश्चरणमुत्तमम् ।
इदानीं श्रोतुमिच्छामि साधनञ्च महेश्वर ॥

ईश्वर उवाच ।

विना भावेन देवेशि सिद्धिर्न हि भवेत् किल ।
त[था]प्यङ्गीकृते देवि साधको भावमाश्रयेत् ॥
अधिकारी भवेत्तत्र स तु वै साधकोत्तमः ।
भावस्तु त्रिविधः प्रोक्तः सूक्ष्मस्थूलविभागतः ॥

Colophons of the different sections :—

12A, इति रुद्रयामले भैरवभैरवीसंवादे उत्तरतन्त्रे कौलावल्यां गुप्तसाधन-पटलः; 23A, इति रुद्रयामले उत्तरतन्त्रे कौलावल्यां ह[र]गौरीसंवादे प्रश्नोत्तर-पटलः; 34B, इत्युत्तरतन्त्रे षष्ठ पटलः; 46B, इति कुलार्णवे सपादलक्षग्रन्थे ऊर्द्धाम्नाये कुलद्रव्यादिलक्षणं नाम पञ्चमोल्लासः ।

Post Colophon :—

श्रीरामदासदेवशर्म्मणः स्वाक्षरं पुस्तकञ्च । श्रीभवानीचरणे मम भक्तिरस्तु ।

There are several leaves after the Post-colophon dealing with different Tantra topics.

5866.

10799Q. बृहद्रुद्रयामलम् । *Bṛhadrudrayāmalam.*

Substance, country-made paper. 16×4 inches. Folia, 8. Lines, 8–13 on a page. Extent in Slokas, 360. Character, Bengali. Appearance, discoloured. Incomplete.

The present MS contains chapters I–V of Book IV of the work which treats of Vaiṣṇava worship.

Beginnings and ends of the different chapters :—

श्रीनारद उवाच ।

यं विष्णुशैवं सततं दयालुं सत्त्वे समं विष्णुमितीह भाव्यते ।
गुणप्रभावं गुणसिन्धुमव्ययं नमामि श्रीरुद्रपदं सदा मुदा ॥

1A, इति श्रीबृहद्रुद्रजामले श्रीकृष्णनारदसंवादे चतुर्थखण्डे रुद्राष्टकं नाम प्रथमाध्यायः ।

श्रीनारद उवाच ।

श्रीकृष्णकरुणासिन्धो भक्तिमुक्तिषु पारग ।
श्रोतुमिच्छामि यद्देव श्रावयित्वा सुखी कुरु ॥
ब्रह्मचारी-गृही-प्रस्थ-यति-भिक्ष्वादिकाश्च ये ।
तेषामाश्रमधर्म्माणि भक्तिं मुक्तिञ्च मे वद ॥

2B, इति श्रीबृहद्रुद्रजामलीये श्रीकृष्णनारदसंवादे चतुर्थखण्डे द्वितीयोध्यायः ।

श्रीनारद उवाच ।

... ...

को मन्त्रः कस्य वा चार्थः प्रोक्तं वाचा प्रपूरुषकं ।
श्रुत्वा मुक्तिमवाप्नोति परमं पावनं प्रभो ॥
रामाः कृष्णाश्च शैवाश्च शाक्ता वा जगतीपते ।
किं कुर्व्वन्ति किं भजन्ति किं यजन्ति हि माधव ॥

श्रीभगवानुवाच ।

शृणु नारद तत्त्वेन कथां कल्याणदायिनीं ।
महापापं विनिर्धूय मुक्तिमाप्नोति मानवः ॥
अरामो वैष्णवः सिद्धः स्वीयरामः शिवाश्रयी ।
स्वीये परे सदा रम्यभक्तेः सिद्धो न संशयः ॥
वैष्णवो रमणीं रन्तुं यदीच्छति महामुने ।
दीपे यथा पतङ्गाः स्युस्तथा नश्यन्ति तत्क्षणात् ॥
सत्यवादी चिह्नधारी तिलकी माल्ययुग्भवेत् ।
रमेद्धि रमणीं विप्र पुत्रार्थं ऋत्यकालतः ॥

पुत्रीभूते वैष्णवे तु गमनं मुक्तिनाशनं ।
नाशनं भक्तिमार्गस्य गङ्गाकुम्भं यथा मृगा ॥
प्रातरुत्थाय कर्त्तव्यं चयनं पत्रपुष्पयोः ।
स्नात्वा यजेदिष्टदेवं यथाशक्त्युपचारतः ॥

5B, ०चतुर्थखण्डे तृतीयोऽध्यायः ।

श्रीनारद उवाच ।

हे नाथ कमलाकान्त ... ...

ब्राह्मणाद्याश्चतुर्वर्णाः को मन्त्रः कस्य भण्यते

7B, ०चतुर्थोऽध्यायः ।

श्रीनारद उवाच ।

कृपां कृपां महाबाहो ज्ञानसागरपारग ।
मार्गाणां हि क्रियाद्यानां तत्त्वं वद मम प्रभो ॥

भगवान् उवाच ।

... ...

अत्र लोके त्रयो मर्त्या आसन्धिजकुलोद्भव ।
मुमुक्षवो विषयी च मुक्ताश्चेति त्रयो मताः ॥
क्रियामार्गो भक्तिमार्गो योगमार्गस्तथैव च ।
मार्गास्त्रयो मया प्रोक्ता मुक्तिदा याः शृणु द्विज ॥

Last Colophon :--- ०पञ्चमोऽध्यायः ।

5867.

3543. *Bṛhadrudrayāmala.*

Substance, country-made yellow paper. 17 × 4 inches. Folia, 48. Lines, 5 on a page. Extent in ślokas, 1,100. Character, Bengali. Date, Śaka 1741. Appearance, fresh. Complete in thirty adhyāyas.

The present MS, which is accompanied (up to the 12th chapter) by the commentary of Rāmānanda, contains chapters I–XXX of Book II of the work dealing with the folk-cult of Pañcānana, well-known in West Bengal.

Colophon :—

इति रुद्रयामलीये श्रीकृष्णनारदसंवादे द्वितीयखण्डे त्रिंशो-ऽध्यायः । समाप्तोऽयं जन्मखण्डः ।

Post Colophon :—

स्वाक्षरमिदं श्रीनेत्रमोहन देवशर्म्मणः । शाः भोड़ा शक १७४१ तारिख ३१ पो वैशाख ।

5868.

8403. रुद्रयामले मतोत्सवतन्त्रम् । *Matotsavatantram from the Rudrayāmala.*

Substance, country-made paper. 14 × 5½ inches. Folia, 2–25. Lines, 12 on a page. Character, modern Nāgara. Appearance, fresh. Complete.

Topics stated to be taken from the *Rudrayāmala* in this and the subsequent MSS are not found in the printed editions of the work.

Fol. 2 (of which one side is blank) of the present MS contains an extract from a work called the *Vidhānamuktāvalī*. This extract deals with what is called सप्तशतीत्रयोदशशत-दलपूजन । It begins: —

विधानमुक्तावलीधृतवचनानि ।

त्रयोदशशतदलं पद्मं लिखित्वा सुमनोहरं ।

मारणं मोहनं चैव उच्चाटनं वश्यकं तथा ॥

सुवर्णपत्रे लिखित्वा तु त्रयोदशशत-पद्मं भ्रामयेत् ।

From Fol. 3 up to the end of the MS various magical rites are described. The MS contains mystic diagrams required for these rites. The descriptions are mostly in Hindi. The colophon which runs as follows gives the name of the work.

इति श्रीरुद्रयामले तन्त्रे उमामहेश्वरसंवादे मतोत्सवतन्त्रं समाप्तं ।

5869.

10469. रुद्रयामले चण्डीनवार्णपटलम् । *Caṇḍīnavārṇa-paṭalam from the Rudrayāmala.*

Substance, country-made paper. 8½ × 4¼ inches. Folia, 11. Lines, 7 on a page. Extent in ślokas, 132. Character, Nāgara. Appearance, discoloured. Complete.

The mantra of Caṇḍī consisting of nine syllables is here dealt with.

Beginning :—

ईश्वर उवाच ।

शृणु देवि प्रवच्यामि पार्व्वति प्राणवल्लभे ।

चण्डिकायास्तु पटलं सर्व्वस्वं देवि दुर्लभम् ॥

... ...

तत्रादौ तु मनूद्धारं सर्व्वाङ्गमपि निश्चितम् ।

प्रवच्या[मि] महादेवि न प्रकाश्यं कदाचन ॥

वाग्भवं प्रथमं प्रोक्तं मायाबीजं द्वितीयकम् ।

तृतीयं कामराजाख्यं चामुण्डायै ततो वदेत् ॥

विच्चे इति पदं दद्यात् मन्त्रोऽयञ्च नवाक्षरः ।

चण्डिकाया इदं मन्त्रं भुक्तिमुक्तिप्रदायकम् ॥

Colophon :—

इति श्रीरुद्रयामले तन्त्रे षट्तन्त्रे देवीश्वरसंवादे चण्डीनवार्णपटलं समाप्तं संपूर्णम् ।

Post Colophon :—

शुभमस्तु वैशाखमासे सिते पक्षे नवम्यां भौमवासरे ।

पुस्तकं लिखितं चैव शीतलरामशर्म्मणां ॥

5870.

8375. **रुद्रयामले रसार्णवकल्पम्।** *Rasārṇavakalpam from Rudrayāmalatantram.*

Substance, country-made paper. $9\frac{1}{2} \times 4\frac{1}{4}$ inches. Folia, 45. Lines, 10, 11 on a page. Extent in ślokas, 1,000. Character, Nāgara. Date, Saṃvat 1760. Appearance, old and discoloured. Complete.

It deals with the worship of Śiva as also with various chemical preparations, chiefly those combined with mercury.

Beginning :—

श्रीगणेशाय नमः।

द्वे भार्ये सिद्धिबुद्धित्तदनुसहचरि ऋद्धिबुद्धि गुणाद्यौ
द्वौ पुत्त्रौ लक्षलाभौ सकलगुणमयौ मंडपे कल्पवृक्षः।
गेह यस्य प्रसूतं सदत्यनमस्तं मोदकाखंडमिश्रा
भूयाद्भूत्यै गणेशो यगदखिलयशानंदकारि कुटुंबः॥

End :—

संवत्सरप्रयोगेन दैवतै[:] सह मोदतैः॥
सह मोदते
द्वादशाब्दः प्रयोगे शिववद्विचरेभुविः॥

Colophon :—

43B, इति श्रीरुद्रयामले तन्त्रे रसार्णवकल्पकानां सम्पूर्णं॥

Even after the colophon several verses are found, and after a further two leaves, mostly in Hindi, we have the date :—

संवत् १७६०॥

The work has no division of chapters and has no agreement with the *Rasārṇava* (Calcutta, 1908–10) published in the *Bibliotheca Indica Series.*

5871.

8376. **रुद्रयामले रसकल्पम्** । *Rasakalpam from the Rudrayāmala.*

Substance, country-made paper. 12½ × 5 inches. Folia. 14. Lines. 9 on a page. Extent in Slokas, 380. Character, modern Nāgara. Appearance, new, but torn and repaired. Each of the leaves has lost its first few letters.

The *Sāhitya Parisat Patrikā* (Vol. XXXVIII, p. 248) describes another MS of the work. 10. IV. 2550 describes a *Dhātukalpa* (said to be taken from the *Rudrayāmala*). The present work treats of various preparations with mercury.

Beginning :—

... ... अथ श्रीरुद्रयामले रसकल्पं लिख्यते ।

शिवं नत्वा रसाधीशं चण्डिकाचरणौ तथा ।

करोमि रसकल्पोयं रसज्ञा ... ... ॥

अथ पारदोत्पत्तिः ।

स्कन्दात्ताम्रकल्हिंमार्थं कैलासं विष्टतं सुरैः ।

रतं शम्भोश्च्युतं रेतो गृहीतमग्निना मुखे(?) ॥ २ ॥

क्षिप्रं तेन च ... .. पृथक् पृथक् ।

सौम्यादिरूपसंस्थाय गौरीशापान्न कार्य्यकृत् ॥

End :—

साक्षादनुभवैर्दृष्टो न श्रुतो गुरुदर्शितः ।

लोकानामुपकाराय रतत् सर्वं + + + + ॥

+ षां चैव लोकानां द्रावणं परिकीर्त्तितं ॥

Colophons of the different sections :

6B, इति श्रीरुद्रयाम ... ... हेश्वरसंवादे रसशोधनप्रकारो नाम

9A, इति श्रीरुद्रयामले उमामहेश्वरसंवादे रसमारणाधिकारो नाम

11A, इति श्री... ... पार्व्वतीसंवादे सत्त्वपातनाधिकारो नाम

Last Colophon :—

इति श्रीरुद्रयामले उमामहेश्वरसंवादे सर्व्वलोहदूतिपातनाधिकारे रसकल्पः ॥

5872.

10527. **रुद्रयामले रुद्रचण्डी** । *Rudracaṇḍī from the Rudrayāmala.*

Substance, country-made paper. 9 × 3 inches. Folia, 10. Lines, 6 on a page. Extent in ślokas, 70. Character, modern Nāgara. Appearance, fresh. Complete.

The present manuscript contains only the third chapter of the work in four chapters as published by the Chhātra-pustakālaya of Calcutta.

Colophon :—

इति श्रीरुद्रयामले तन्त्रे हरगौरीसंवादे रुद्रचण्डी समाप्ता(म्)॥

5873.

10689. *Rudracaṇḍī from the Rudrayāmala.*

Substance, country-made yellow paper. 15½ × 4½ inches. Folia, 3. Lines, 8, 9 on a page. Extent in ślokas, 102. Character, Bengali. Appearance, fresh. Complete.

Same as above though there is slight difference in names, this being called रुद्रचण्डीस्तोत्र.

The present MS, however, begins with what is called the Saṅkalpa for a regular reading of the work. It then proceeds to lay down the process of the worship of the Devī. The beginning runs thus :—

श्रीजगदीश्वराय नमः ॥

अथ रुद्रचण्डीपूजा ।

अद्येत्यादि अमुकगोत्रस्य श्रीअमुकदेवशर्म्मणः.....चण्डिकां हृदये न्यस्य इत्यादि मृत्युमाप सुदुर्लभमित्यन्तं(मृत्युन्तं) सकृद्रुद्रचण्डीपाठकर्म्माहं करिष्यामि ॥

Colophon :—

इति रुद्रयामले रुद्रचण्डीस्तोत्रं समाप्तं ॐ तत्सत् ।

The Post Colophon runs thus in Nāgara script :—

ग्रन्थाध्यक्ष-श्रीमद् वेचारामहालदारस्य तनय श्रीराखालदास ग्रर्म्मणेन लिखितं । कलिकाता, खिदिरपुर । ग्रकाः १७७२ ज्यैष्ठ ।

5874.

8753. **रुद्रयामले कालीपुराणम् ।** *Kālīpurāṇam from the Mahākālasaṃhitā of Rudrayāmala.*

Substance, country-made paper. 13 × 5 inches. Folia, 8-183. Lines, 10 on a page. Extent in ślokas, 5,400. Character, Nāgara. Date, Saṃvat 1929. Appearance, fresh. Incomplete.

Though stated in the last colophon of the MS to belong to the Rudrayāmala the work generally agrees with the printed edition of the *Kalikāpurāṇa* as published by the Vaṇgavāsī Electro Machine Press (Calcutta, 1909), and begins from the second foot of the 10th verse of chapter 4 of the edition and ends with verse 82 of chapter 60.

There is a single colophon which runs thus (Fol. 183A) :—

इति रुद्रयामले तन्त्रे उमामहेश्वरसंवादे महाकालसंहितायां श्रीकालीपुराणोऽयं समाप्तं ।

Post Colophon :—

शुभमस्तु । संवत् १९२९ शुभं ।

5875.

5562. **रुद्रयामले मेघमाला ।** *Meghamālā from the Rudrayāmala.*

Substance, Serāmpore paper. 10 × 4½ inches. Folia, 52. Lines, 9 on a page. Extent in ślokas, 1,050. Character, Nāgara. Date, Saṃvat 1920. Appearance, fresh. Complete.

The work deals with characteristics of clouds, effects of different types of them on plant-life and kindred topics and is of considerable meteorological interest. Of Tāntric topics in it mention may be made of the मेघाह्वान-मन्त्र in Paṭala X. A lithograph edition of the work was published by the Kāśī Sanskrit Press in V.S. 1878. For other editions cf. BM Catalogue (1906–28, p. 1075).

Beginning :—

श्रीगणेशाय नमः ।

कैलासशिखरासीनं भैरवं परमेश्वरम् ।

... ...

... ...

... ... पार्व्वती परिपृच्छति ।

ॐ नमो वरदेवाधिपार्व्वतीपतये नमः ॥

पार्व्वत्युवाच ।

देवाधिदेवताश्चैव अनादिपरमेश्वरः ।

विख्यातस्त्रिषु लोकेषु सृष्टिसंहारकारकः ॥

मेघास्तु कीदृशं देव कथं विद्युत् प्रजायते ।

कीदृशं वर्णरूपन्तु शरीरं तस्य कीदृशम् ॥

End :—

त्रिसंध्यं ब्रह्मणे विंद्यात् क्षत्रियस्य दिनत्रयः ।

सप्तरात्रेण वैश्यस्य शूद्रस्य दर्शनेन तु ॥

Colophons :—

14A, इति श्रीरुद्रयामले सारोद्धारे उमामहेश्वरसंवादे मेघमालायामर्घ्यकाण्डे राजादिफलाध्यायः; 26B, इति श्रीरुद्रयामले मेघमालायां शनैश्चरक्रियाफलाध्यायः; 29A, ०राश्मिगतग्रहोत्पातफलाध्यायः; 31A, संक्रान्तिफलाध्यायः; 32B, ०ग्रहस्योदयास्तफलाध्यायः; 48B, ०मासफलाध्यायः; (last colophon) इति श्रीरुद्रयामले सारोद्धारे उमामहेश्वरसंवादे मेघमालायामर्घकाण्डे काक-रुद्रफलाध्याय एकादशः । समाप्तः ।

Post Colophon :—

श्रीसंवत् १९२० भाद्रपद शुक्ल १३ तिथौ भृगुवासरे विद्याधर-
द्विवेदिना लिखितं काश्यां स्वार्थं परार्थञ्च ।

5876.

6355. *Meghamālā from the Rudrayāmala.*

Substance, country-made paper 10 × 4 inches Folia, 38. Lines, 11 on a page. Extent in ślokas, 850 Character, modern Nāgara Appearance, fresh. Complete.

This and the following MS generally agree with the above.

Colophons : -

4B, इति श्रीरुद्रयामले मागोद्धारे उमामहेश्वरसंवादे मेघमालायां अर्घकाण्डे गुरुमते मेघस्वरूपं तथा द्वादशराशिगते गुरुफलाध्यायः प्रथमः ; 7A, ०अर्घकाण्डे षष्टिसंवत्सरफलाध्यायो द्वितीयः ; 9A, ०राजफलाध्यायस्तृतीयः ; 16B, ०प्रानेश्वरस्य त्रिविधफलाध्यायः चतुर्थकं ; 18B, ०राशिग्रहोत्पातः फलाध्यायः पञ्चमः ; 20A, ०संक्रान्तिफलाध्यायः षष्ठः ; 21A, ०ग्रहस्योदयास्तफलाध्यायः सप्तमः ; 34B, ०मासस्वरूपवृष्टिफलाध्यायोऽष्टमः ; 35A, ०मेघवातविद्युत्फलाध्यायो नवमः ; 36B, ०मेघाह्वानं नाम दशमोऽध्यायः ; 37B, ०काकरुद्रफलाध्यायो नाम एकादशोऽध्यायः—मेघमालाग्रन्थः समाप्तः ।

After the end of the 11th chapter there is a section on केतूदयफल dealing with the rising of *Ketu* on different days. This is followed by a colophon which runs :

38A, इति केतूदयफलान्यग्रन्थोक्तं इति श्रीमेघमालाग्रन्थ समाप्तम् । शुभमस्तु ।

There are a few lines after this on what is called शुक्रफल-निर्णयः ।

5877.

7831. *Meghamālā from the Rudrayāmala.*

Substance, country-made paper. $10\frac{1}{2} \times 5$ inches. Folia, 36. Lines, 11 on a page. Extent in ślokas, 1,000. Character, Nāgara. Appearance, discoloured. Complete.

Same as above. The section entitled केतूदयफल is found here also

5878.

2341. मयूरचित्रकम् *and* मेघमालायां मयूरचित्रकम् ।

Mayūracitrakam and Mayūracitrakam from Meghamālā.

Substance, country-made paper. 10×4 inches. Folia, 1-10, 2-12. Lines, 11 on a page. Extent in slokas, 550. Character, Nāgara. Appearance, good Complete.

The present manuscript is described in L. X. 4222.

There are two works, separately paged in this manuscript, one Mayūracitraka ending in leaf 10, and the other Mayūracitraka from *Meghamālā* ending in leaf 12. The first leaf of the second work is missing. The total number of the leaves is therefore 21 and not 22, as given in L.

These are astrological treatises, similar in nature, on the forecasting of rains, famines and abundance of crops from the conjunction of particular days, *Tithis* and asterisms in all the twelve months of the year. Though bearing the name Meghamālā (on the basis of which the MS is described here) the second work does not agree with the work of the same name described previously. Neither is it attributed here to the Rudrayāmala.

After the colophon of the second book there occur nine more astrological verses. Then there comes the post colophon statement :—

संवत् १८६५ मिति पौष सुक्ल ६ भृगु० ।

Colophons of the first book :—

(2A) इति चैत्रः, इति वैशाखः; (2B) इति जैष्ठ; (5A) इत्याषाढः; (5B) इति श्रावणः, इति भाद्रपदः; (6A) इति आश्विनः, इति कार्त्तिकमासः; (6B) इति मार्गशीर्षः; (8A) इति पौषमासः गभधारा; (10B) इति मयूरचित्र समाप्तः।

Colophons of the second book :—

(3A) इति अर्घकाण्ड अन्योन्यक्षेत्रग्रहफलसमाप्तः; (3B) इति अर्घकाण्ड प्रथम मंडलगुण; (4A) अर्घकाण्ड मण्डलसमाप्त; (5B) अथार्घफलम्, इति अर्घकाण्डे संक्रान्तिफल समाप्तः; (8A) इति केतुचारः समाप्तः; (9A) इति माघमासः; (9B) इति फाल्गुनमासः; (10B) इति सद्योवृष्टिलक्षणम्; (12A) इति कालान्तरेण शुभाशुभलक्षण सम्पूर्णम् इति मयूरचित्रकं मेघमालायां समाप्तः।

5879.

5498. रुद्रयामले देवीचरित्रम्। *Devīcaritram from the Rudrayāmala.*

Substance, country-made paper. 10 × 4½ inches. Folia, 12. Lines, 20 on a page. Extent in ślokas, 650. Character, Nāgara. Date, Samvat 1781. Appearance, fresh. Complete in 13 chapters.

It gives directions for the worship of Durgā during the Navarātra festival.

Beginning :—

श्रीगणेशाय नमः।

ॐ गजाननाय महमे प्रत्यूहतिमिरच्छिदे।
अपारकरुणापूरतरङ्गितदृशे नमः॥
रुद्रयामलाभिप्रायेण देवीपूजनमुच्यते॥
गोगजवाहनभोजनभव्योद्भूतपर्मित्रसपत्नजयत्रोः।
वाहनवैरिकृतासनरुष्टा सा नः पातु जगत्त्रयतुष्टा॥

ईश्वर उवाच ।

यो नित्यं पूजयेद्देवीं चण्डिकां भक्तवत्सलाम् ।
तस्यायुः पुत्रसौख्यञ्च विद्यानामीश्वरो भवेत् ॥
यश्चण्डीभक्तिसंयुक्तस्तस्य लक्ष्मीश्च किङ्करी ।
राजानो वश्यतां यान्ति स्त्रियो वै मदविह्वलाः ॥
यो भवानीं महामायां पूजयेन्नित्यमादरात् ।
ऐहिकञ्च सुखं प्राप्य परे ब्रह्मणि लीयते ॥
यो वै दौर्भाग्यसंयोगाच्चण्डिकामवमन्यते ।
दरिद्रो व्याधितो नित्यं लोके वै शोच्यतां व्रजेत् ॥

End :—

श्रीमहादेव उवाच ।

रमाकान्त सुराधीश प्रोक्तं गुह्यतरं मया ।
नानसूयाय वक्तव्यं परशिष्याय नो वदेत् ॥
देवीभक्ताय वक्तव्यं मम भक्ताय माधव ।
त्वद्भक्ताय च वक्तव्यं न मूर्खायाततायिने ॥
सत्यं सत्यं पुनः सत्यं उद्धृत्य भुजमुच्यते ।
नानया सदृशी विद्या न गङ्गासदृशी नदी ॥
न वैकुण्ठात् परं धाम न मुक्तिः कार्त्तिकां विना ।
न राजा कार्त्तवीर्य्याद्धि एतत् सत्यं सुरेश्वर ॥

Colophons :—

2A, इति श्रीरुद्रयामले उत्तरखण्डे प्रथमापूजनविधिः; 3A, ०देवीचरित्रे देवीप्रभावो नाम द्वितीयोऽध्यायः; 3B, ०रहस्यं नाम तृतीयोऽध्यायः; 4B, ०चतुर्थोऽध्याय; 5B, ०दुर्गोपाख्याने देवीचरित्रे पञ्चमोऽध्यायः; 6B, ०देवीचरित्रे षष्ठोऽध्यायः; 7B, ०सप्तमोऽध्यायः; 8A, ०अष्टमोऽध्यायः; 9A, ०नवमोऽध्यायः; 9B, ०दशमोऽध्यायः; 10B, ०एकादशोऽध्यायः; 11A, ०द्वादशोऽध्यायः; 11B, ०त्रयोदशोऽध्यायः ।

Last Colophon :—

इति श्रीरुद्रयामले उत्तरखण्डे देवीचरित्रे त्रयोदशोऽध्यायः ।

Post Colophon Statement :—

Fol. 11B, संवत् १७८१ आश्विन कृष्ण ११ लिखितं विषादेवेनेदं स्वार्थम् ग्रन्थसंख्या ६०० (?) ।

After the post-colophon there occurs an extract, in six lines, entitled नवग्रहनिर्णयः, purporting to have been taken from the *Śaktisaṅgamatantra*. A detailed table of contents, of the *Devīcaritra*, chapter by chapter, is given on Fol. 12A.

5880.

3913. **रुद्रयामले देवीरहस्यम्** । *Devīrahasyam from the Rudrayāmala.*

Substance, country-made paper 9×5¼ inches Folia, 254. Lines, 10 per page. Extent in ślokas, 5,080. Character, Nāgarī Appearance, fresh. Complete.

This is a work consisting of sixty chapters, relating to *Kuladharma*. It is divided into two parts, the first in 25 chapters being concerned with the general observances of the Śākta cult, and the second in 35 chapters (26 to 60) with the rules of worship of different deities.

For an analysis of the work see IO. IV. 2546.

The last colophon which is particular to this MS runs :—

इति श्रीरुद्रयामले तन्त्रे श्रीदेवीरहस्ये षष्टितमः पटलः । समाप्तोऽयं देवीरहस्या + + + तन्त्रः परमार्थप्रदीपिकापरनामा तन्त्रराजश्चेति । शिवं लेखकपाठकयोः ।

Post Colophon Statement :-

इति श्रीशम्भुनाथ कर उत्कलदेशस्थ ब्राह्मण वेलं पुरीकर-जाहाजपुरीय वैतरणीय ब्राह्मणाच्छ्रुत्वा लिखितम् ।

संवत् १८५३ पौषकृष्णैकादश्या शुक्रे लिखितम् कलिकातास्थ पट्टने ।

शुभमस्तु सर्व्वजग ताम् ।

Along with the MS are found two leaves of foolscap paper containing a list of eighteen *pīṭhas* attributed to Śaṅkarācārya.

5881.

6084. **रुद्रयामले त्रिपुरसुन्दरीपटलः ।** *Tripurasundarī-paṭalaḥ from the Rudrayāmala.*

Substance, country-made paper. 7 × 4¼ inches. Folia, 19. Lines, 9 on a page. Extent in ślokas, 250. Character, Nāgara. Appearance, fresh. Complete.

It gives the *mantra* and rules of worship of Śrīvidyā, but not the complete *pañcāṅga* consisting of *stava*, *kavaca*, etc.

Beginning :—

ॐ श्रीगुरवे शिवाय ॐ नमः ।

श्रीदेव्यै सिद्धिदायिन्यै नमः ।

ॐ श्रीदेव्युवाच ।

ॐ भगवन् सर्व्ववेत्ता त्वं जगतामुपकारकः ।

देवादिदेवदेवेश त्रैलोक्याभयदायक ॥

प्राक् सुरासुरसंग्रामे मह्यं दत्तो वरस्त्वया ।

तदद्य कृपया शम्भो सम्प्रदातुं क्षमो भव ॥

श्रीभैरव उवाच ।

देवि सत्यं वरो दत्तो देवदानवसंगरे ।
यत्ते मनस्यभीष्टं तु तत्त्वं वदस्व सुव्रते ॥

श्रीदेव्युवाच ।

भगवन् सर्व्वधर्म्मज्ञ सकलागमपारग ।
देवदेवी महादेवी महात्रिपुरसुन्दरी ॥
त्रिकूटा षोडशी देवी श्रीविद्या ब्रह्मरूपिणी ।
तस्याः पञ्चाङ्गमखिलं सारात्सारोत्तमोत्तमम् ॥
वद शीघ्रं महादेव यद्यहं प्रेयसी तव ॥

Colophon :—

इति श्रीरुद्रयामले तन्त्रे देवीभैरवसंवादे महात्रिपुरसुन्दरी-पटलः समाप्तः । इति शुभम् ।

5882.

6087. रुद्रयामले चिक्कूटारहस्यम् । *Trikuṭārahasyam from Rudrayāmala.*

Substance, country-made paper. 7 × 4½ inches. Folia, 11+9. Lines, 9 on a page. Extent in ślokas, 180. Character, Nāgara. Appearance, fresh. Complete.

The work deals with the ceremonial worship of Śrīvidyā on different occasions like eclipses, earthquakes, etc.

Beginning :—

ॐ श्रीभैरव उवाच ।

ॐ अधुना कथयाम्यद्य पूजां सामयिकीं शृणु ।
येन श्रवणमात्रेण कोटिपूजाफलं लभेत् ॥
श्रीदेव्याः षोडशार्त्तर्य्यास्त्रिकूटायाः समर्च्चनम् ।
समयस्य प्रवक्ष्यामि भक्तिपूर्व्वं शृणु प्रिये ॥

विना समयदीक्षाद्यैर्मन्त्रैर्दीक्षापि निष्फला ।
तस्मात् समयपूजां ते वक्ष्यामि पारलौकिकीम् ॥
... ...
... ...
सूर्य्यग्रहणकालो वा चन्द्रग्रहणवासरः ।
भूकम्पसमयो देवि नवरात्रिदिनानि च ॥
कन्यासंक्रान्तिसमया देवानामपि दुर्ल्लभाः ।
एतेषु समयेष्वेवं यः शिवां पूजयेच्छिवे ॥
स साक्षाद्भैरवो ज्ञेयो वरदानक्षमः शिवः ॥

Colophons of the different chapters :—

5A, इति श्रीत्रिकूटारहस्ये सूर्य्यग्रहणपटलः समाप्तः; 8B, ०चन्द्रग्रहण-पटलः; 11A, ०भूकम्पपटलः समाप्तः ।

The second batch of nine leaves contains two chapters of which the colophons run :—

5A, इति श्रीरुद्रयामले तन्त्रे त्रिकूटारहस्ये दशमः पटलः ।

9A, इति श्रीत्रिकूटारहस्ये एकादशः पटलः ।

5883.

10601. रुद्रयामले भुवनेश्वरीरहस्यम् । *Bhuvaneśvarī-rahasyam from Rudrayāmalatantra.*

Substance, country-made paper. $11 \times 6\frac{1}{4}$ inches. Folia, 90. Lines, 14 on a page. Extent in ślokas, 3,000. Character, Nāgara. Appearance, old and discoloured. Complete.

This work, in 26 chapters, deals in detail with the worship and rituals of Bhuvaneśvarī.

Beginning :—

ॐ श्रीगणेशाय नमः । ॐ नमः श्रीमहात्रिपुरसुन्दर्य्यै ।
अथ श्रीभुवनेश्वरीरहस्यं लिख्यते ।
ॐ चिद्रूपं यद्रूपशून्यं स्वरूपं रूपै रूप्यं योगिभिः सर्व्वसंस्थम् ।
जीयाच्छम्भोस्त्रैपुराख्यं महत्तन्नासन्नोसत्सदसच्चिच्चिच्चम् ॥

ॐ श्रीशैलराजशिखरे नानाद्रुमलताकुले

....समासीनमुमापतिं ॥

एकदा देवमीशानं शशिशेखरमीश्वरं ।

... .

उत्थाय विनता भूत्वा पर्य्यपृच्छत पार्व्वती ॥

श्रीपार्व्वत्युवाच ।

... .

महेश श्रोतुमिच्छामि भुवनेशीरहस्यकम् ॥

श्रीभैरव उवाच ।

... ...

एकाक्षरी या देवेशी भुवनेशी महेश्वरी ।

हृदि लेखेव जागर्त्ति प्राणशक्तिरियं परा ॥

हृल्लेखा कथ्यते तस्मात् मायानुच्चित्तवैभवात् ।

अनया रहिताः सर्व्वे निर्ज्जीवा मन्त्रगणायः ॥

अतस्तु सर्व्वमन्त्राणामियमुद्बोधिनी मता ।

पृटगाख्यावच्छिता भूत्वा तामेकाक्षररूपिणीम् ॥

कथयामि महादेवीं भुवनेशीं महेश्वरि ।

मायाबीजं नाममध्ये नमो मन्त्रान्ते वदेत् ॥

एकाक्षरीयं विच्हि(वि)ता भुवने भुवनेश्वरी ।

अनया सदृशी विद्या नास्त्यस्या ज्ञानसाधने ॥

Colophons of the different chapters :—

2A, इति श्रीभुवनेश्वरीरहस्ये एकाक्षरीप्रकाशो नाम प्रथमः पटलः ; 3A, ०चतुर्दशकथनं नाम द्वितीयः पटलः ; 4B, ०एकाक्षर्य्यादिषोडशाक्षरी प्रकटनविधिर्नाम तृतीयः पटलः ; 5A, ०तत्त्वविद्याप्रकाशको नाम चतुर्थः पटलः. 7B, ०पूजाविधिर्नाम पञ्चमः पटलः ; 67B, ०नित्यपूजाविधिर्नाम षष्ठः पटलः. 69B, ०कवचकथनं नाम सप्तमः पटलः ; 74A, ०मन्त्रनाममहस्रपटलोऽष्टमः ; 74B, ०तत्त्वविद्यास्तोत्राख्यः पटलो नवमः ; 75A, उत्कीलनादिकथनपटलो

दशमः ; 75B, ईश्वरमन्त्रप्रकाशनपटल एकादशः ; 76A, ०दीक्षाविधिपटलो द्वादशः ; 77B, ०पुरश्चरणविधिपटलस्त्रयोदशः ; 78B, ०होमविधिपटलश्चतुर्दशः ; 79B, ०चक्रपूजाविधिपटलः पञ्चदशः ; 80A, ०आचारविधिपटलः षोडशः ; 81A, ०सूर्य्यग्रहणपूजाविधिपटलः सप्तदशः ; 82A, ०चन्द्रग्रहणपूजाविधिपटलो-ष्टादशः ; 82B, ०भूकम्पपूजाविधिपटल एकोनविंशः ; 84A, ०नवरात्रिदिनार्च्चा-विधिपटलो विंशः ; 84B, ०कन्यासंक्रान्तिपूजाविधिपटल एकविंशः ; 85B, ०शक्तिपूजापटलो द्वाविंशः ; 86A, ०नवकुमारीपूजाविधिपटलस्त्रयोविंशः ; 87B, ०प्रयोगविधिपटलश्चतुर्विंशः ; 88B, ०घटार्गलयन्त्रविधिपटलः पञ्चविंशः ; 90A, ०दशम्यर्च्चनविधिपटलः षड्विंशः । इति श्रीरुद्रयामले तन्त्रे श्रीदेवीभैरवसंवादे श्रीभुवनेश्वरीग्रह्ये संपूर्णं समाप्तम् ॥

5884.

10605. **रुद्रयामले कालीपंचवाणम्** । *Kālīpañcavāṇam from the Rudrayāmala.*

Substance, country-made paper. 6×4½ inches. Folia, 6. Lines, 7 on a page. Extent in ślokas, 45 Character, modern Nāgara. Appearance, fresh. Complete.

The work deals with the six black rites of the Tantra, described as so many arrows.

Beginning :—

श्रीगणेशाय नमः ॥

पार्व्वती उवाच ।

देवाधिदेव देवेश महारुद्र नमोस्तु ते ।
इदानीं श्रोतुमिच्छामि कालीवाणस्य लक्षणम् ॥
... ...

श्रीमहादेव उवाच ।

अथ वक्ष्ये वाणविद्यां कालिकायाः सुदुर्लभं ॥ ३ ॥
यस्य विज्ञानमात्रेण कर्त्ता हर्त्ता सदाशिवः ।
कामत्रयं वह्निसंस्थं रतिविन्दुसमन्वितम् ॥ ४ ॥

कूर्चद्वयं तथा लज्जां युगलं तदनन्तरम् ।

दक्षिणे कालिके चेति मध्ये वाणानि योजयेत् ॥ ५ ॥

मन्त्रः क्रौं क्रौं क्रां फ्रूं फ्रूं फ्रौं फ्रौं दक्षिणे कालिके अमुकवाणं क्रौं क्रौं फ्रूं फ्रूं फ्रौं फ्रौं स्वाहा etc. etc.

Colophon :—

इति श्रीरुद्रयामले तन्त्रे चिंतामणिप्रयोगे ईश्वरपार्व्वतीसंवादे कालीपंचवाणपंचकं साधनं समाप्तम् ।

Post Colophon : —

शुभमस्तु संवत् १९१६ मीती माघसु ९ बुधवार लिखितं ब्राह्मभवानीरामजोसि पोथि कालिपंचवाणकी लिखि ॥

5885.

6083. रुद्रयामले नवदुर्गापूजारहस्यम् । *Navadurgāpūjā-rahasyam from the Rudrayāmala.*

Substance, country-made paper $7 \times 4\frac{1}{2}$ inches Folia, 30. Lines, 9 on a page Extent in ślokas, 300 Character, modern Kashmiri. Appearance, fresh. Complete in 11 chapters.

The work consists of 11 Paṭalas—the first two are introductory, and the remaining nine are devoted to the details of worship of the nine forms of Durgā.

Beginning :—

ॐ श्रीगुरवे शिवाय ॐ नमः ।

श्रीगणपतये नमः ।

ॐ देवदेवं महादेवमीशानं शूलधारिणम् ।

प्रसन्नवदनं दृष्ट्वा प्रणम्योत्थाय पार्व्वती ॥

कृताञ्जलिपुटा देवी विनयानतमस्तका ।

स्मितपूर्व्वं वचो दीनं जगाद परमेश्वरम् ॥

श्रीदेव्युवाच ।

भगवन् परमेशान शरणागतवत्सल ।
त्वत्प्रसादान्मया सर्व्वं श्रुतं डामरमुत्तमम् ॥
तन्त्राणां सारमाद्यं तं यामलादिषु विस्तरम् ।
इदानीं भगवन् श्रोतुमिच्छामि त्वन्निवेदितम् ॥
नवदुर्गार्च्चनं दिव्यं सर्व्वतन्त्रेषु गोपितम् ।
सर्व्वकामप्रदं काम्यं साधकानां सुभावहम् ॥

श्रीभैरव ।

एतद् गुह्यतमं देवि न कस्य कथितं मया ।
पूजां समयदीक्षायाः कोटिपूजा-फलप्रदाम् ॥
गुह्याद् गुह्यतमं गोप्यं कृतं तद्भुजकालकम् ।
इदानीं तव भक्त्याहं कथयामि सुविस्तरम् ॥

... ...

... ...

सन्ति नानाविधैर्मन्त्रैरागमोक्तैः सबीजकैः ।
तन्त्राणि विविधान्यत्र सहितानि महेश्वरि ॥
ते मन्त्रा निष्फला जाताः कलौ वीर्य्यविवर्ज्जिताः ।
स्त्रीशुद्धिरहिताद् द्रव्याद् भूम्यन्तःशुद्धिकारणात् ॥
अनृतान्मत्सराद् दम्भात् पैशुन्याद्द्रव्यलोलुपात् ।
न सिध्यन्ति वरारोहे सर्व्वे निष्फलतां गताः ॥
सत्यागमानां प्रास्त्वन्तु प्रतिज्ञासिद्धिमेव च ।
अनादरेण तद् दृष्टं गुरुभक्तिं विना तथा ॥
तन्मध्ये सारभूतं तु प्रत्यक्षफलदायकम् ।
रुद्रयामलतन्त्रञ्च चतुःषष्ट्यात्मकं परम् ॥
नानाविधैः शुभैर्मन्त्रैर्युक्तं समयपूजनैः ।
विना समयदीक्षाद्यैः मन्त्रैर्दीक्षापि निष्फला ॥
समयो हि शिवे ब्रह्मा समयो विष्णुरेव हि ।
समयः शिव एव स्यात् समयो मृत्युरेव च ॥

न सिध्यन्ति सदा देवि नित्यपूजाजपादयः ।
यज्ञा होमादयो देवि विना समयपूजया ॥
काले संपूजयेद्दिर्गां काले संपूजयेच्छिवम् ।
समये पूजयेच्छक्तिं समयोऽपीष्टदेवता ॥
कालः सृजति भूतानि कालो रक्षति नित्यशः ।
कालः संहरते चान्ते कालो हि दुरतिक्रमः ॥
षष्टिकल्पसहस्राणि ये स्मरन्ति महेश्वरीम् ।
समये क्षणमात्रेपि पूजया तत् फलं लभेत् ॥

श्रीदेवी ।

समयः कीदृशो देवः पूजा कीदृग्विधा प्रभो ।
एतद्विस्तरतो देव वक्तुमर्हसि साम्प्रतम् ॥

श्रीभैरवः ।

अष्टोत्तरशतप्रख्याः समयाः सन्ति पार्व्वति
तेषु यः पूजयेद्देवीं इष्टदेवीञ्च साधकः ॥
तस्य देवि भवेद्दुर्गा यथाभीष्टफलप्रदा ।
समयार्च्चनमेतत्ते वक्ष्यामि शृणु पार्व्वति ॥
यस्य कस्य न वक्तव्यं श्रुत्वा गोप्यतमं कुरु ।
चैत्रे मासि सिते पक्षे दिनानि नव पार्व्वति ॥
नवदुर्गार्च्चनं कुर्य्यात् साधकोऽभीष्टसिद्धये ।
तथैषमासि देवेशि सितपक्षादिवासरे ॥
नवम्यन्तां चरेत् पूजां विधिं विधिवदीश्वरि ।
सर्व्वेषु समयेष्वेतौ समयौ देवदुर्ल्लभौ ॥
तत्र यः कुरुते पूजां पठेत् स्तोत्राण्यनेकशः ।
चरेद्धोमं यथाशक्त्या स साक्षाद्भैरवोपमः ॥

श्रीदेवी ।

भगवन् श्रोतुमिच्छामि नवदुर्गार्च्चनं परम् ।
सत्वरं ब्रूहि मे देव यद्यस्ति मयि ते दया ॥

श्रीभैरवः ।

शृणु देवि प्रवक्ष्यामि नवदुर्गार्च्चनं परम् ।
रुद्रयामलतन्त्रेऽस्मिन् भाषितं साधकश्रिये ॥
तद्वक्ष्यामि महादेवि पूजासारमनुत्तमम् ।
यन्न दृष्टं पशुज्ञानैः कुपथभ्रान्तदृष्टिभिः ॥
यन्न साङ्ख्यैर्न योगैर्वा न च वै पाञ्चरात्रकैः ।
स्वभाववादिभिर्नापि न च कर्म्मप्रवादिभिः
नापि संशयवादैश्च नग्नार्थक्षपणादिभिः
न भूतवादिभिश्चैव नापि वा लौकिकैरुत
न चात्मचिन्तकैर्वापि नापि तर्कप्रवादिभिः ।
न च वैशेषिकैर्वापि षट्पदार्थपरायणैः ॥
वेदान्तवादिभिर्वापि न चाप्येकत्ववादिभिः ।
इदं पूजादिकं सारं दुर्गाया नवरात्रिकम् ॥
अज्ञानतिमिरान्धानामुन्मीलनकृदुत्तमम् ।
संसारपङ्कमग्नानां नौरिवोत्तारणं परम् ॥
... ...
... ...

The nine forms of Durgā are indicated : -

6A, ॐ आदौ श्रीशैलपुत्रीति ततः स्याद्ब्रह्मचारिणी ।
चण्डघण्टा च कुष्माण्डी स्कन्दमाता च पञ्चमी ॥
कात्यायनी कालरात्रिर्महागौरी तथाष्टमी ।
देवदूती च नवमी नवदुर्गा इतीरिताः ॥

End :—

इति श्रीनवदुर्गायाः पूजापद्धतिमीश्वरि ।
गोपनीयं महादेवि गोपयेन्निजयोनिवत् ॥

Colophons of the different chapters :—

6A, इति श्रीदुर्गासमयपूजायां प्रथमः पटलः ; 7B, इति श्रीदुर्गाकल्पे द्वितीयः पटलः ; 17A, इति श्रीरुद्रयामले तन्त्रे समयपूजाकल्पे नवदुर्गापूजा-

संग्रहे शैलपुत्रीपूजाविधिर्नाम तृतीयः पटलः ; 18B, ०ब्रह्मचारिणीपूजाविधिर्नाम चतुर्थः पटलः ; 20A, इति श्रीचण्डघण्टापूजाविधिर्नाम पञ्चमः पटलः ; 21B, इति कुष्माण्डीविधिः षष्ठः पटलः ; 23A, इति श्रीस्कन्दमातृपूजाविधिः सप्तमः पटलः ; 24A, इति श्रीकात्यायनीपूजाविधिरष्टमः पटलः ; 25B, इति श्रीकालरात्रिपूजाविधिर्नवमः पटलः ; 27A, इति श्रीमहागौरीपूजाविधिर्नाम दशमः पटलः ; (last colophon) इति श्रीरुद्रयामले तन्त्रे नवदुर्गापूजाराहस्ये देवदूतीपूजाविधिर्नाम एकादशः पटलः ।

5886.

2364. रुद्रयामले रामनामलिखनविधिः । *Rāmanāmalikhanavidhiḥ from the Rudrayāmala.*

Substance, foolscap paper 10×3¼ inches. Folia, 4. Lines, 7 on a page. Extent in ślokas, 50. Character, Nāgara. Date, Samvat 1932. Appearance, fresh. Complete.

For a description of the present MS see L. X. 4217.

The essence of the book is summed up in the following lines :—

2A, रामनन्त्रं लिखेन्नित्यमष्टगन्धेन भक्तितः ।
भूर्ज्जपत्त्रे ताडपत्त्रे शाणपत्त्रे तथैव च ॥
नामसहस्रं नामशतं लिखेदनुदिनं सुधीः ।
मासमेकं शुद्धचेता यावल्लक्षं समाप्यते ॥
... ...
... ...
एवं मन्त्रं लिखेद्यन्तु लक्षसंख्यो जितेन्द्रियः ।
तस्य सिद्धो भवेन्मन्त्रः सर्व्वकामफलप्रदः ॥
शुद्धोदकेन संलिख्य कज्जलं घृतदीपकम् ।
पत्त्रं शाणमयं प्रोक्तं लेखनी काशजा प्रिये ॥

3B, मुक्तिकामो लिखेल्लक्षं साधको विधिपूर्व्वकम् ।
सकामो वाञ्छितं लब्ध्वा भुक्त्वा भोगान् मनोरमान् ॥
जातिस्मरश्चिरं भूत्वा याति विष्णोः परं पदम् ॥

Colophon :—

इति श्रीरुद्रयामले रामनामलिखनविधिप्रकाशपटलं समाप्तम् ।

श्रीजगदम्बार्पणमस्तु ॥

Post Colophon :—

संवत् १९३२ ।

5887.

5014. **रुद्रयामले अयोध्यामाहात्म्यम् ।** *Ayodhyā-māhātmyam from the Rudrayāmala.*

Substance, country-made paper. 10×5¼ inches. Folia, 69. Lines, 7 on a page. Extent in ślokas, 500. Character, Nāgara. Date, Saṃvat 1910. Appearance, discoloured. Complete.

The work contains 10 chapters. It refers to and describes the greatness of Ayodhyā proper and various other Tīrthas included within it.

Beginning :—

श्रीरामचन्द्राय नमः ।

वन्देऽहं रामचन्द्रस्य पादौ प्रणतरक्षकौ ।
सीतायास्च पुनः पादौ सर्व्वसिद्धिविधायकौ ॥ १ ॥

... ...

... ...

श्रीपार्व्वत्युवाच ।

त्व[त्]तः श्रुत्वा महाभाग नानातीर्थकथाः शुभाः ।
साम्प्रतं श्रोतुमिच्छामि सरहस्यं सनातनम् ॥ ४ ॥

अयोध्याया महापुर्य्या महिमानं गुणोज्ज्वलम् ।
कीदृशी सा सदामेध्यायोध्या विष्णुप्रिया पुरी ॥ ५ ॥
आद्या सङ्गीयते वेदैः पुरीणां मुक्तिदायिका ।
संस्थानं कीदृशं तस्याः तस्यां के च महीभुजः ॥ ६ ॥
कानि तीर्थानि पुण्यानि माहात्म्यं तेषु कीदृशम् ।
अयोध्यासेवनान्नृणां फलं स्याद्वद कीदृशम् ॥ ७ ॥

End :—

मतिविपुलनिदानैर्वर्णितं धर्म्ममाद्यं
कलयति पर(म)भक्त्या चेत्थमाहात्म्यमेतत् ।
य इह नर उदारः श्रीसनाथः स सम्यक्
व्रजति हरिनिवासं सर्व्वभोगांश्च भुक्त्वा ॥ २४ ॥

Colophon :—

इति श्रीरुद्रयामले हरगौरीसम्वादे श्रीमदयोध्यामाहात्म्ये दशमोऽध्यायः ।

Post Colophon :—

शुभमस्तु सम्वत् १९१० मिति ज्येष्ठ शुक्ल ४ ।

5888.

5570. **रुद्रयामले सूर्य्यपटलः ।** *Sūryapaṭalaḥ from the Rudrayāmala.*

Substance, country-made yellow paper. 10½ × 4½ inches Folia, 22. Lines, 9 on a page. Extent in ślokas, 100. Character, Nāgara. Appearance, fresh. Complete.

This relates to the worship of the Sun-god according to the Kaula form, the first chapter in it dealing with the *mantra* of the deity and the rules for its use, the second chapter, in prose, laying down the rules of worship (*paddhati*).

Beginning : --

श्रीगणेशाय नमः ... ...

श्रीभैरव उवाच ।

श्रीशैलशिखरासीनभैरवीपतिमीश्वरम् ।
भैरवं चन्द्रमुकुटं गणगन्धर्व्वसेवितम् ॥
पन्नगाभरणोपेतं जटामुकुटमण्डितं ।

.. ..

.. ..

... ... दृष्ट्वा प्रोवाच भैरवी ॥

श्रीदेव्युवाच ।

... ...

... ...

पुरा पृष्टोऽसि भगवन् मया त्वं भक्तिपूर्व्वकम् ।
अद्य तदद तत्त्वं मे यद्यहं तव वल्लभा ॥

... ...

... ... कौलिकानां हितेच्छया ॥
वद शीघ्रं तथेशान पश्चाङ्गं पूर्व्वसूचितम् ।
(श्री)देवदेवस्य सूर्य्यस्य सर्व्वतत्त्वतमोत्तमम् ॥

End : --

इत्येषा नित्यपूजायाः पद्धतिर्गद्यरूपिणी ।
तव स्नेहेन निर्गीता नाख्येयाकौलिकै[ः] प्रिये ॥

Colophons :—

7A, इति श्रीरुद्रयामले ईश्वरपार्वतीसंवादे देवीरहस्ये तन्त्रे श्रीसूर्य्यपटलाख्यानं नामैकत्रिंशः पटलः समाप्तम् ।

22A, इति श्रीरुद्रयामले देवीरहस्ये श्रीसूर्य्यपूजापद्धतिवर्णनं नाम द्वात्रिंशः पटलः समाप्तः ।

5889.

2154. **रुद्रयामलोक्तनवग्रहसिद्धयन्त्रपूजाविस्तारः ।**

Navagrahasiddhayantrapūjāvistāraḥ from Rudrayāmala.

Substance, country-made paper. 8¼×3¼ inches Folia, 2. Lines, 12–14 on a page. Extent in Ślokas, 10. Character, Nāgara. Appearance, discoloured. Complete.

It gives directions for drawing and worshipping the *Yantra* or symbolic diagram, an illustration of which is given on Fol. 2A.

Beginning :—

कदाचिद्दनवासीनां पाण्डवानां मुप्रेक्षणे ।
आगतः कृष्णनाथश्च दृष्ट्वा पूजाकृतं विधिम् ।
सतुष्टः कृष्णनाथ च पप्रच्छ पाण्डुनन्दनः ।

युधिष्ठिरोवाच ।

देवदेव जगन्नाथ उपायं ब्रूहि तत्त्वतः ।
येन संग्रहमात्रेण साम्राज्यं सौख्यदं सदा ।

Colophon :—

इति श्रीरुद्रयामलोक्त-नवग्रहसिद्धयन्त्रपूजाविस्तारः समाप्तः ।

For a *Navagrahamantroddhāra* from the *Mahābhārata* cf. 5838 above.

5890.

2147. **रुद्रयामले मङ्गलविधिः ।** *Maṅgalavidhiḥ from the Rudrayāmala.*

Substance, country-made paper. 7×4¼ inches. Folia, 10. Lines, 9 on a page. Extent in Ślokas, 100. Character, Nāgara. Appearance, fresh Complete.

The work deals with Tāntrika worship of the planet Mars.

Beginning :

अथ मङ्गलव्रतविधानमन्त्रमभिधीयते। ब्राह्मे मुहूर्त्ते उत्थाय प्रातःकृत्यं कृत्वा शौचादिकं विधाय अरुणोदये अपामार्गकाष्ठेन दन्तधावनं कृत्वा नद्यादौ गत्वा ... ... रक्तवस्त्रोत्तरीयं धृत्वा ... ...रक्तचन्दनरक्तपुष्पैः ताम्रपात्रस्थिततोयेन अङ्गारकगायत्रीपठनाष्टोत्तरशतं भौमाय अर्घं दत्त्वा गृहमागत्य वितस्तिमात्रं रक्तगोगोमयमूत्राभ्यां विलिप्य तदुपरि रक्तचन्दनेन मण्डलं विधाय तत्र गोधूमान्नं संस्थाप्य उपरि ताम्रकलशं वा मृन्मयं वा संस्थाप्य जलेनापूर्य्य ... ... तदुपरि भौमयन्त्रं त्रिकोणमेकविंशति त्रिकोणांकितमेकविंशति भौमनामसहितं संस्थाप्य तत्सम्मुखे स्वयं रक्तासने उपविष्टः ... ... मङ्गलव्रतमहं करिष्ये।

End :—

एषांगारकगायत्री जप्ताभीष्ट-प्रदायिनी।
माहेयोप[ा]सनं प्रोक्तं देवदेवेन सिद्धिदं॥

Colophon :—

इति रुद्रयामले मङ्गलविधिः समाप्तः।

5891.

10040. कृष्णयामले त्रिभङ्गचरित्रम्। *Tribhaṅgacaritram from the Kṛṣṇayāmala.*

Substance, country-made paper. 11 × 4½ inches. Folia, 4. Lines, 9 on a page. Extent in ślokas, 112. Character, modern Nāgara. Date, Saṃvat 1952. Appearance, fresh. Complete.

A *Kṛṣṇayāmala* is noticed in Bik. 1284 and HPR I. 78. MSS of *Śeṣadevaśatanāmastotra* and *Caitanyakalpa*, said to be taken from the Kṛṣṇayāmala, are found in the old collection of the Asiatic Society of Bengal.

The work deals with the Tribhaṅga (three-bended) form of Kṛṣṇa.

Beginning :-

याहि स्थावरतां भद्रे न त्वां त्यक्ष्यामि मा रुद ।
ततो दिव्ये मणिमये स्थाने देवी सरस्वती ॥
आविरासानन्तफलाकारा सा पूतपर्व्विणी ।
सर्व्वरत्नमयी वृन्दावने सत्यपिपालिते ।
तरुराजस्य महिषी राजयन्ती दिशास्त्विषा ॥
2B. वंशीमाहात्म्यमेतन्मे पठिष्यन्ति द्विजातयः ।
श्रोष्यन्ति च भविष्यन्ति द्रुतं द्रुतकवीश्वराः ॥
इदानीं श्रोतुमिच्छामि त्रिभङ्गत्वं कथं तव ।
तन्मे कथय गोविन्द विंद्यानन्दमनन्तं ॥
... ...

कृष्ण उवाच ।

शृणु ते कथयिष्यामि बलराम कथां मम ।
त्रिभङ्गत्वं कामिनीनां मनोनयनरञ्जनम् ॥
महानन्दाभिधां वंशीं कराभ्यां परिगृह्य वै ।
प्रहसद्वदनो लीलारसचञ्चलमानसः ॥
जगाम पानकै-र्नृपमूलमानन्दविग्रहः ।
यस्मिन् दिव्ये तरोर्मूले मणिबद्धे महाप्रभे ॥
... ...
... ...
3A, ततो मे मुग्धचित्तस्य बभूव सरसं मनः ।
ततः शृङ्गारनामायं रसः प्रादुर्बभूव ह ॥
श्यामवर्णः सुखमयः सर्व्वलोकैकमोहनः ।
रसादानन्द व्यानन्दादनुभावो बभूव ह ॥
आत्मना रन्तुमिच्छामि नारी भूत्वा पृथगवपुः ।
इति सञ्चिन्त्यमानस्तु मनस्तत्र मतां गतं ॥
स्वयमेव द्विधा भूत्वा परमानन्दरूपिणी ।
रसस्वरूपिणी चाहं स्वयंरूपा विनिर्गता ॥

... ...

... ...

4A, पश्यन्तस्त्वां वरारोहां लज्जयाधोमुखा द्रुतम् ।
तत्प्रेमपाशसंबद्धचित्तस्य चरणद्वयम् ॥
मणिनूपुरयुग्मेन पट्टशृंखलाबद्धवद् बभौ ।
ततो मम पदाम्भोजाद्भक्तकाद्या महौजसः ॥
तुष्टुवुः प्रेमवचसा प्रणयाविष्टचेतसा ।
हे नाथ चरणं त्वेकं अस्मभ्यं दर्शय प्रभो ॥
तच्छ्रुत्वा वचनन्तेषां तुष्टये स्वयमेव हि ।
ध्वजवज्राङ्कणाम्भोजलक्षणं दर्शितं पदम् ॥
तिर्य्यग्रीवमुदारास्त्र ब्रह्मविष्णुशिवार्चितं ।
अकार्षं राम सततं यतोहं भक्तवत्सलः ॥

... ...

एतान्येव कारणानि त्रिभङ्गत्वं गतस्य मे ।
नित्यं सत्यं चित्स्वरूपमानन्दरूपविग्रहम् ॥
रूपमेतत् सदा ध्यायन् महाविष्णुस्तपश्चरेत् ।
ब्रह्मैवेदं हृदि ध्यात्वा सृष्टिकृच्चासकृत् विभो ॥
रुद्रोपीदं चित्स्वरूपं ध्यात्वा सिद्धिमितो गतः ।
एतत्त्रिभङ्गरूपविग्रहमादिभूतं
भूतेषुविष्णुविधिचित्रविचित्र + + ।
ध्यात्वा त्रिभङ्गचरितं पण्डितः प्रवणोति
यस्तस्य हृत्पङ्कजे सततं वसामि ॥

Colophon :

इति ते सर्व्वमाख्यातं त्रिभङ्गचरितं मम ।

Post Colophon Statement (in a later hand) : –

संवत् १९५२ कु० सू० १ बुधको श्रीकृष्णायामलतन्त्र मे से लिखवयो श्रीराधामोहन गोस्वामी रायसाहव काशी औ ५० वालोंक गृह्यराधाचरणजी की कृपासे ५ । ५ । ९० व्यास गणेशराम ।

5892.

6392. ब्रह्मयामलम् । *Brahmayāmalam.*

Substance, country-made paper. $9 \times 3\frac{1}{2}$ inches Folia, 1–58 (bound in wrong order) of which Fol. 52 is missing. Lines, 10 on a page. Extent in ślokas, 1,000. Character, Nāgarā Appearance, old and soiled. Incomplete.

The topics dealt with herein relate to divination by means of various diagrams, illustrations of which are given. Some of the colophons give the title as Brahmayāmala while others simply write yāmala.

Beginning :

मोहान्धकारमग्नानां जनानां ज्ञानरश्मिभिः ।
कृतमुद्धरणं येन तन्नौमि शिवभास्करम् ॥
अथातः संप्रवक्ष्यामि प्रोक्ता ये ब्रह्मयामले ।
मात्रादिभेदभिन्नानां स्वराणां षोडशोदयाः ॥
मातृकायां पुरा प्रोक्ताः स्वराः षोडशसंख्यया ।
तेषां द्वावन्तिमौ त्याज्यौ चत्वारश्च नपुंसकाः ॥
शेषा दशस्वरास्तेषु स्युरेकैको दिक्षु दिक्षु ।
ज्ञेया अतोऽस्वराद्यास्ते स्वराः पञ्च स्वरोदये ॥
लाभालाभौ सुखं दुःखं जीवितं मरणं तथा ।
जयं पराजयं चैव सर्वं ज्ञेयं स्वरोदये ॥
स्वरादिमातृकोच्चार्णे मातृव्याप्तं जगत्त्रयम् ।
तस्मात् स्वरोदयं सर्व्वं त्रैलोक्यं सचराचरम् ॥

Colophons of the different chapters : -

2A, इति यामले मात्रास्वरचक्रम्; 2B, ०वर्णस्वरचक्रम्; 3A, इति जीवस्वरचक्रम्; 3B, इति राशिस्वरचक्रम्; इति भेदनस्वरचक्रम्; 4A, इति यामले द्वादशवर्षिकचक्रम्; 4B, ०ऋतुस्वरचक्रम्; 5A, ०पक्षस्वरचक्रम्; इति तिथिस्वरचक्रम्; 7A, इति ब्रह्मयामले तिथिवारनक्षत्र-[चक्रम्]; 8A, इति यामले दिनास्वरचक्रम्; 8B, इति तात्कालिकस्वरचक्रे

प्रश्नभेदः ; 9B, इति तात्कालिकस्वरचक्रे जातस्य शुभाशुभः ; 10A, इति यामले स्वरप्रकारनिर्णयः ; 11A, इति ब्रह्मयामले दिक्फलस्वरचक्रम् ; 19A, ०षडङ्ग-सर्व्वतोभद्रचक्रम् ; 20B, ०अंशुकचक्रम् ; 22A, ०छत्रचक्रम् ; 23B, ०सिंहासन-चक्रम् ; 29A, इति हृदयादियोगषट्कम् ; 29B, उदरादियोगषट्कम् (the space for the illustration is left blank) ; 28B, इति मुखादियोग-षट्कम् (30A has the space for illustration left blank) ; 30B, इति गुदादियोगषट्कम् ; 31A, इति ब्रह्मयामले वचाङ्गयोगषट्कम् 31B, इति कपालादियोगषट्कम् ; 32A, इति दशाङ्गराजकालानलचक्रम् (space for illustration left blank) ; 33A, इति ब्रह्मयामले राजकालानल-चक्रम् ; 33B, इति यामले सूर्य्यकालानलचक्रम् ; 34A, इति चन्द्रकालानल-चक्रम् ; 34B, इति यामले चन्द्रसप्तशलाकचक्रम् ; 35A, इति सप्तशलाकनल-चक्रम् ; 35B, इति यामले वक्रेन्दुचन्द्रचक्रम् ; 36A, ०प्रथम माटकास्वरचक्रम् ; 36B, इति द्वितीयमाटकास्वरचक्रम् ; इति तृतीयमा[ट]कास्वरचक्रम्, 37A, इति यामले विजयचक्रम् ; 38A, तोरणचक्रं समाप्तं ; 38B, राशिसूर्य्यकालानल-चक्रम् ; 39A, इति संघट्टकालानलचक्रम् ; 39B, इति यामले गूढकालानल-चक्रम् ; 40A, ०कुलाकुलचक्रम् ; 40B, ०कुम्भचक्रम् ; 42B, ०तुम्बुरचक्रम् ; 43A, ०तुम्बरावर्त्तचक्रम् ; 44B, ०अहि+लचक्रम् ; 45A, ०लाङ्गलचक्रम् ; 45A, [सर्पचक्रम्] ; 45B, इति वृषचक्रम् ; 47B, इति यामले नाड़ीगत-वृष्टिचक्रम् ; 48A, ०सूर्य्यफणिचक्रम् ; चन्द्रफणिचक्रम् ; 49A, इति कविचक्रम् ; 50A, इति यामले खलचक्रम् ; 54B, ब्रह्मयामले कोट्टचक्रम् ; 56A, इति यामले अश्वचक्रम् ; 56B, इति रथचक्रम् ; 57A, इति यामले कूर्म्मचक्रम् । The MS ends abruptly in the middle of the next topic.

5893.

10335. जयद्रथयामलम् । *Jayadrathayāmalam.*

Substance, country-made paper. $9 \times 3\frac{1}{2}$ inches. Folia, 103. Lines, 5 on a page. Extent in ślokas, 600. Character, Nāgara. Appearance, old and discoloured. Complete.

Jayadrathayāmala is said to be 24,000 ślokas in extent, divided into four ṣaṭkas or four parts of 6,000 ślokas each. The present MS contains the last ṣaṭka which principally deals with the worship of Vagalā, the eighth Mahāvidyā. For the first ṣaṭka cf. Nep., Vol. II. pp. 1–4, and for the last ṣaṭka, Nep., Vol. I. pp. 175–177.

Beginning :

श्रीदेव्युवाच ।

देवाधिदेव भूतेश नित्यानन्दनिरञ्जन ।
निराकारगुणातीत सर्व्वज्ञ शशिशेखर ॥ १ ॥
... ...
इदानीं श्रोतुमिच्छामि विद्याभेदं सुदुर्लभं ।
उत्पत्तिं + + + देव तन्मे वद दयानिधे ॥

Colophons of the different chapters :—

5A, इति श्रीजयद्रथयामले उत्तरषट्के देव्युपनिषदे महेशकुलशासन आनन्दभैरवसंवादे(स्तोत्रे) श्रीमहाविद्याभेदकथनं नाम प्रथमः पटलः ।

22B, ०महाविद्या उत्पत्तिकथनं नाम द्वितीयः पटलः ; 27B, ०वगलादीप-विधिर्नाम तृतीयः पटलः ; 36B, ०काम्यप्रयोगकथनं नाम चतुर्थः पटलः ; 58B, ०मन्त्रोद्धारपूर्व्वकं श्रीवगलामुखीसाधनं नाम पटलः ।

97A, ०प्रातःकृत्यादि उद्दामनान्तश्रीवगलामुखीनित्यायाः गद्यमयी-पूजा-पद्धतिकथनं नाम पटलः ॥ ६ ॥

103B, ०वगलामुखीकवचकथनं नाम पटलः ॥ ७ ॥

5894.

1926. **यामले कालपुरुषदानविधिः ।** *Kālapuruṣadāna-vidhiḥ from Yāmala.*

Substance, country-made paper. $8\frac{1}{2} \times 4\frac{1}{4}$ inches. Folia, 5. Lines, 9 on a page. Extent in ślokas, 70. Character, Nāgara. Appearance, old and faded. Complete.

The work contains both the *vidhi* (Foll. 1–3A) and *paddhati* (Foll. 3A–5) of the function.

Beginning :—

अथ कालपुरुषदानं लिख्यते ।

अतः परं प्रवक्ष्यामि दानानामुत्तमोत्तमम् ।

कालमृत्युहरं साक्षादपमृत्योश्च का कथा ॥

आसाध्याख्यमहारोगमहाभयहरक्षमम् ।

शुभवर्गक्षयकरं ग्रहदोषनिवर्हणम् ॥

तापत्रयहरं सद्यः सर्व्वोत्पातहरं शुभम् ॥

... ...

... ...

कालरूपमिति ख्यातं दानं दोषविनाशनम् ॥

The description of Kālapuruṣa, a human representation of Time clothed in black, is given as follows (Fol. 1B) :—

कालस्य पुरुषाकारं कृष्णवस्त्रेण कल्पयेत् ।

पादादिमस्तकान्तं च पञ्चारत्निप्रमाणतः ॥

वितस्तिद्वयमानेन शिरोभागं प्रकल्पयेत् ।

अर्द्धारत्या कण्ठदेशमधोभागे भुजद्वयम् ॥

तदर्द्धं हृदयस्थाने स्तनमण्डलमाचरेत् ।

अरत्निमात्रमुदरं मध्ये नाभिं प्रकल्पयेत् ॥

तदर्द्धं कटिदेशं च जघनं वृषणादिकम् ।

अधोवितस्तिद्वितये उरू जानू च गुल्फकम् ॥

पादद्वयं प्रकुर्व्वीत अङ्गुल्यग्रसमन्वितम् ।

कर्णाक्षिनासिदीर्घाश्च तत्तद्देशे प्रकल्पयेत् ॥

तिलैश्च पूरयेदत्र तत्तदंशो विचक्षणः ।

पद्मासने समानीतं शिल्पकैः परिशोभयेत् ॥

ततः सौवर्णरजतताम्रैर्मुक्ताफलादिकैः ।

भूषणैर्भूषितं चैव स्थाने स्थाने विशेषतः ॥

सुवर्णनूपुरौ कुर्य्यादलयौ राजतेन तु ।

कटिसूत्रं राजतेन कांस्यघण्टासमन्वितम् ॥

हस्तद्वयं राजतेन सुवर्णेनाङ्गुलीयकम् ।
कटकं राजतेनैव सुवर्णं बाहुभूषणम् ॥
ग्रैवेयं पदकं चैव स्वर्णेन राजतेन वा ।
मुक्ताहारं कण्ठदेशे मध्ये रत्नसमन्वितम् ॥
कर्णद्वयं च ताम्रेण तथैव भ्रूयुगं च वै ।
अक्षिद्वयं राजतेन नासिकाग्रं सुवर्णतः ॥
शुक्त्या सुदन्तपंक्तिं च ताम्रेणोष्ठद्वयं तथा ।
तिलकं राजतेनैव पट्टं स्वर्णविनिर्म्मितम् ॥
स्वर्णयज्ञोपवीतं च रक्तोष्णीषं च वेष्टयेत् ।
वामहस्ते कांस्यपात्रं खड्गं दक्षिणहस्तके ॥
मुक्ताप्रवालरत्नाद्यैः कर्णाभरणमाचरेत् ।

In leaf 3A the Vidhi ends and the Paddhati begins. The latter goes to the end of the MS.

Last Colophon :—

यामलोक्तकालपुरुषदानविधिः समाप्तः ।

The last colophon is followed by several verses about some Tāntrika rite.

5895.

3179. **महाशैवतन्त्रे आकाशभैरवकल्पम् ।** *Ākāśabhairava-kalpam from the Mahāśaivatantra.*

Substance, Serāmpore paper. $12\frac{1}{2} \times 5\frac{1}{4}$ inches. Folia, 82. Lines, 9–12 on a page. Extent in ślokas, 2,000. Character, Bengali. Appearance, fresh. Complete.

Two Stotras from this work are mentioned in *Burnell* 198[b], 203[a]. MSS of an *Ākāśabhairavatantra* and a *Mahāśaivatantra* are also noticed there.

Beginning :—

श्रीगणेशाय नमः ॥ श्रीदक्षिणामूर्त्ति नमः ॥
गुरुं गणपतिं देवीं भैरवं क्षेत्रभैश्वरम् ।
नमस्कृत्य प्रवक्ष्यामि धर्म्मशास्त्रं विभूतये ॥
साङ्गं सलक्षणं वेदसारभूतमभीष्टदम् ।
ज्ञानदं जीवजन्तूनां साधकानां सुखावहम् ॥

श्रीदेव्युवाच ।

श्रीशिवेशानदेवेश श्रीनाथ जगतां पते ।
श्रीगलागलचिद्रूप श्रीपते भवते नमः ॥
अन्यथा क्षेत्रगं नास्ति क्षेत्रगं त्वं महेश्वर ।
यदुक्तं परमं लोके यं क्षास्त्वमखिलप्रदम् ॥
यद्धितं साधकेन्द्राणां तद्वदस्व दयानिधे ।

श्रीश्वरोवाच ।

श्रीमत्परमसौभाग्यमन्त्रयन्त्रं गतात्मनां ।
त्रयाणामुपदेवानामतिगुह्यतमं परम् ॥
महामन्त्रक्रियाक्षास्त्रं महासिद्धिप्रदायकम् ।
सर्व्वदोषप्रशमनं पावकं लोकजीवनम् ॥
धर्म्मार्थकाममोक्षाणां फलदानप्रदं हितम् ।
सर्व्वज्ञानप्रदं ब्रह्मज्ञानदं सर्व्वसिद्धिदम् ॥
तादृक्षं कल्पमाणेयं सर्व्ववेदाङ्गमात्मकम् ।
क्षीघ्रसिद्धिप्रदं श्रेष्ठं शृणु सर्व्वमयेम्बिके ॥
वक्ष्यमाणं महाक्षास्त्रं शृण्वतां पठतामपि ।
तथालोकय तां पुंसां (य)[व]नितानां विशेषतः ॥
क्षिप्रसिद्धिप्रदं दिव्यं कथयामि जगन्मयम् ।

2A, महसा तस्य सौभाग्यं अस्तु ज्ञा + नुभूतिकम् ॥
लब्धमन्त्रः समुत्थाय प्रभाते देशिकं स्मरेत् ।
वक्ष्यमाणेन मन्त्रेण सान्ध्यं कर्म्म समाप्य सः ।
यथा तथा पुरायुक्तामेकान्ते भवने शुभे ॥

यथाविधि समाभूतोच्चाविंश्येटचरे स्थितः ।
अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिता ॥

... ...

... ...

आराधनोपयोगानि संपाद्य तदनन्तरम् ।
ब्रह्मरन्ध्रे जगन्नाथं ब्रह्मानन्दमयं विभुम् ॥
परम्पराक्रमेणैव गन्धपुष्पाक्षतादिभिः ।
चिरं ध्यात्वा ततो देवि भूतशुद्धिं यथाविधि ॥
ऋषिन्यासादिकं कुर्य्यात् प्रसन्नात्मा यथाविधि
सर्व्वकार्य्यार्थसिद्धौ च सर्व्वविघ्ननिवृत्तये ॥
पञ्चाङ्गैरेकविंशेन यजेद्विनायकं पुरा ॥

Colophons of the different chapters : —

2B, इति श्रीमहाशैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शङ्करेण विरचिते उत्साहप्रक्रमो नाम प्रथमोऽध्यायः ; 3B, इति महाशैवमन्त्रे अतिरहस्ये पक्षिराजकल्पे उत्साहगणपतियजनविधिर्नाम द्वितीयोऽध्यायः ; 4B, इति श्रीमहाशैवतन्त्रे अतिरहस्ये उत्साहभैरवयजनविधिर्नाम तृतीयोऽध्यायः ; 6A, इति श्रीमहाशैवतन्त्रे अतिरहस्ये उत्साहाभिषेकविधानं नाम चतुर्थोऽध्यायः ; 7B, ०आकाशभैरवकल्पे मन्त्रयन्त्रं नाम पञ्चमोऽध्यायः ; 8B, इति श्रीशैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे चित्रमालाविधिर्नाम षष्ठोऽध्यायः ; 9A, इति श्रीमहाशैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे वश्याकर्षणप्रयोगो नाम सप्तमोऽध्यायः ; 9B, ०रहस्ये मोहनद्रवकप्रयोगो नाम अष्टमोऽध्यायः ; 10A, इति श्रीशैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे स्तम्भन-विद्वेषणप्रयोगो नाम नवमोऽध्यायः ; 10B, इति श्रीमहाशैवतन्त्रे अतिरहस्ये उच्चाटननिग्रहप्रयोगो नाम दशमोऽध्यायः ; 11A, इति श्रीमहाशैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसंवादे शङ्करेण विरचिते भोगमोक्षप्रकरणं नाम एकादशोऽध्यायः । इति प्रथमकल्पः समाप्तः ॥

12B, इति ०सङ्कर्षणेन विरचिते आसुगरुडविद्या नाम द्वादशोऽध्यायः; 14A, इति श्रीमद्दाशैवतन्त्रे अतिरहस्ये आसुगरुडप्रयोगो नाम त्रयोदशोऽध्यायः; 15B, इति श्रीमद्दाशैवतन्त्रे अतिरहस्ये आसुगरुडकवचविधिर्नाम चतुर्दशोऽध्यायः; 16B, ०आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे शिष्याचारविधिभेदो नाम पञ्चदशोऽध्यायः। द्वितीयः कल्पः समाप्तः॥

19A, इति श्रीमद्दाशैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे शरभसालुवपक्षिराजकल्पे मन्त्रोद्धारविधिर्नाम षोडशोऽध्यायः; 22A, इति श्रीमद्दाशैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे शरभसालुवपक्षिराजस्तोत्रं नाम सप्तदशोऽध्यायः; 25A, इति श्रीशैवतन्त्रे अतिरहस्ये प्रयोगभेदो नाम अष्टादशोऽध्यायः; 26A, इति श्रीपक्षिराजकल्पे निग्रहानुग्रहविवेको नाम एको[न]विंशोऽध्यायः; 27B, इति श्रीमद्दाशैवतन्त्रे होमविधिर्नाम विंशोऽध्यायः; 30A, इति श्रीमद्दाशैवतन्त्रे प्रत्यक्षसिद्धिप्रदे पक्षिराजकल्पे निग्रहविधिर्नाम एकविंशोऽध्यायः; 33A, इति श्रीमद्दाशैवतन्त्रे अतिरहस्ये आकाशभैरवे कल्पे रक्षाभिषेको नाम द्वाविंशोऽध्यायः; 36B, इति श्रीमद्दाशैवतन्त्रे पक्षिराजकल्पे क्षुद्रविधिर्नाम त्रयोविंशोऽध्यायः; 40B, इति श्रीमद्दाशैवतन्त्रे अतिरहस्ये आचारपुरश्चर्यासिद्धिर्नाम चतुर्विंशोऽध्यायः; 42B, इति श्रीमद्दाशैवतन्त्रे शरभाराधनविधिर्नाम पञ्चविंशोऽध्यायः; 47A, इति श्रीशैवतन्त्रे अतिरहस्ये शरभकल्पे मातृकाक्षरबलिविवेको नाम षड्विंशोऽध्यायः; 48B, इति श्रीभैरवशैवतन्त्रे कल्पे भद्रकालीविधिर्नाम सप्तविंशोऽध्यायः; 51B, इति श्रीमद्दाशैवतन्त्रे आकाशभैरवकल्पे तैलाञ्जनविधिर्नाम अष्टाविंशोऽध्यायः; 52B, इति श्रीमद्दाशैवतन्त्रे कल्पे मालामन्त्रे शूलिनीदुर्गाध्यायत्रयं विना एकोनत्रिंशोऽध्यायः; 54A, इति श्रीमद्दाशैवतन्त्रे आकाशभैरवकल्पे त्रिंशोऽध्यायः; 56B, इति श्रीशैवतन्त्रे आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे बलिकर्म्मविधानं नाम एकत्रिंशोऽध्यायः; 57B, इत्याकाशभैरवकल्पे द्वात्रिंशोऽध्यायः; 59A, इत्याकाशभैरवकल्पे महाशैवतन्त्रे प्रत्यक्षसिद्धिप्रदे वडवानलमन्त्रं नाम त्रयस्त्रिंशोऽध्यायः; 60B, इति श्रीमद्दाशैवतन्त्रे आकाशभैरवकल्पे दिक्पालमन्त्रं नाम चतुस्त्रिंशोऽध्यायः; 61B, इत्याकाशभैरवकल्पे व्याधिमन्त्रं नाम पञ्चत्रिंशोऽध्यायः; 62A, इत्याकाशभैरवकल्पे मृत्युप्रयोगं नाम षट्त्रिंशोऽध्यायः; 68B, इत्याकाशभैरवकल्पे शरभकवचं नाम

सप्तत्रिंशोऽध्यायः ; 70A, इत्याकाशभैरवकल्पे कामराजमन्त्रं नामाष्टत्रिंशोऽध्यायः ; 71B, इति श्रीआकाशभैरवकल्पे रक्तचामण्डीमन्त्र नाम एकोनचत्वारिंशोऽध्यायः ; 72B, इत्याकाशभैरवकल्पे मोहिनीमन्त्रं नाम चत्वारिंशोऽध्यायः ; 73A, इत्याकाशभैरवकल्पे शब्दाकर्षण-भाषामन्त्रनामैकचत्वारिंशोऽध्यायः ; 74A, इत्याकाशभैरवकल्पे लक्ष्मीमन्त्रं नाम द्विचत्वारिंशोऽध्यायः ; 74B, इत्याकाशभैरवकल्पे मायामन्त्रं नाम त्रिचत्वारिंशोऽध्यायः ; 75A, इत्याकाशभैरवकल्पे पुलिन्दिनीमन्त्रं नाम चतुश्चत्वारिंशोऽध्यायः ; 77B, इति श्रीमहाशैवतन्त्रे आकाशभैरवकल्पे महाशास्तामन्त्रं नाम पञ्चचत्वारिंशोऽध्यायः ; 78A, इत्याकाशभैरवकल्पे महाशैवतन्त्रे प्रत्यङ्गसिद्धिप्रदे मंत्रोभिणीमन्त्रं नाम षट्चत्वारिंशोऽध्यायः ; 79A, इत्याकाशभैरवकल्पे धूमावतीमन्त्रं नाम सप्तचत्वारिंशोऽध्यायः ; 80A, ०प्रत्यङ्गसिद्धिप्रदे धूमावतीमन्त्रं नामाष्टाचत्वारिंशोऽध्यायः ; 80B, इत्याकाशभैरवकल्पे नद्युत्तारणप्रयोगो नाम एकोनपञ्चाशत्तमोऽध्यायः ; 82B, इत्याकाशभैरवकल्पे महाशैवतन्त्रे प्रत्यङ्गसिद्धिप्रदे चित्रविद्यामन्त्रं नाम पञ्चाशत्तमोऽध्यायः ॥

5896.

4634. उत्तरतन्त्रे स्वप्नाध्यायः । *Svapnādhyāyaḥ from Uttaratantra.*

Substance, country made paper $9\frac{1}{2} \times 4\frac{1}{4}$ inches. Folia, 3. Lines, 8 on a page. Extent in ślokas, 30 Character, Bengali. Appearance, discoloured and worn-out. Complete.

The work relates to the interpretation of dreams.

IO. V. 3135 describes a *Svapnādhyāya* which, in its colophon, is stated to belong to the *Itihāsapurāṇa* by Bṛhaspati. For almost identical topics from the *Mārkaṇḍeya Purāṇa* and *Bhaviṣya Purāṇa* cf. ASB. V. 3733, 3754-5. A MS of an *Uttaratantra* in 16 chapters is described in HPR. I. 35.

Beginning .—

नमो गणेशाय ।

अथोत्तरतन्त्रोक्तः स्वप्नाध्यायः ।

श्रीदेव्युवाच ।

देवदेव महादेव भक्तवत्सल शङ्कर ।
प्रायः कलियुतादेव लोकाः कल्मषभाजनाः ॥
कथं ज्ञानं भवेत्तेषां शुभाशुभफलेष्विह(ः) ॥
भविष्ये वर्त्तमाने वा अतीते वा महेश्वर ।
विस्तरेण समाचक्ष्व यदि तेऽस्ति कृपा मयि ॥

ईश्वर उवाच ।

गुह्यं चैतत् प्रवक्ष्यामि तव प्रीत्या वरानने ।
साधकस्यापि देवेशि सर्व्वं प्रत्यक्षतां व्रजेत् ॥
देशिकस्याथ वक्ष्यामि लक्षणं शृणु साम्प्रतम् ।
पुरश्चर्य्यापवर्गार्थं भक्तिश्रद्धान्वितस्य च ॥
जपपूजारतस्यापि कापट्यरहितस्य च ।
दातुर्भोक्तुः पालकस्य सर्व्वं प्रत्यक्षतां व्रजेत् ॥
स्वच्छन्दचरितस्याथ स्वच्छन्दहृदयस्य च ।
स्वप्ने दृष्टे तु देवेशि स्वप्नं प्रत्यक्षतामियात् ॥
संदेहे संशये गर्त्ते भवे च समुपस्थिते ।
अरोगी शुद्धदेहः सन् जप्त्वा स्तुत्वा च भक्तितः ॥
नत्वा च देवतां देवि सुतल्पे शयनं चरेत् ।
यथा यथा प्रसुप्तस्य आर्त्तस्य च महेश्वरि ॥
प्रसादं कुरुते स्वप्ने किञ्चिद्दर्शनसंहतः ।
सद्यस्त्विराचसप्ताहे द्विसप्ताहेऽथवा पुनः ॥
एकविंशतिरात्रेण ख्यात एव धियां पतिः ।
प्रसादं कुरुते स्वप्ने ततः सिद्धेर्निदर्शनम् ॥
स्वप्ने पश्यति यो देवं महेशं सर्व्वतोमुखम् ।
देवीं वा स्वप्नमुक्ताश्च गृहं वाऽथ यथाविधं ॥

देवतादर्शनं चाथ निर्म्मलं चक्रमण्डलम् ।
गङ्गां भागीरथीं भानुं लिङ्गं विज्ञानमैश्वरम् ॥
प्रसन्नं तत्र जानीयात् सिद्धिं स्वप्नप्रदर्शने ॥
क्षितिलाभो भोजनञ्च रोदनं रुधिरक्षतम् ।
संग्रामविजयो होमो हर्म्माद्यारोहणं तथा ॥
नदीसमुद्रतरणं व्याकाशगमनं तथा ।
भास्करोदयनं चैव ज्वलनं तु ऊताशनम् ॥
हर्म्माद्यारोहणं चैव प्रासादशिखरेऽपि च ।
... ...
2B, लभेत् सिद्धियुतञ्चैव देवीनाञ्चैव दर्शनम् ॥

End :—

दुःस्वप्नं यदि देवेशि खगादिरोहणान्तथा ।
भक्तानामन्यथा भावो दुःस्वप्नमिति निश्चितं ॥

Colophon :—

इत्युत्तरतन्त्रोक्तः स्वप्नाध्यायः समाप्तः ॥

5897.

10528. मार्ज्जारीतन्त्रम् । *Mārjārītantram.*

Substance, country-made paper. 10×5 inches. Folium, 1. Lines, 9. Character, Nāgara. Appearance, discoloured. Incomplete. Fragmentary.

The name Mārjārītantra is indicated on the left hand upper margin. It contains only ten verses dealing with the worship of Ucchiṣṭaganeśa.

Beginning :—

गणेशाय नमः ॥

देव्युवाच ॥

देवदेव जगन्नाथ सर्व्वज्ञ परमेश्वर ।
भैरवानन्द चिन्मात्र नमः स्वच्छन्दवृत्तये ॥ १ ॥

शीघ्रेण सर्व्वसिद्धिः स्यात् केनोपायेन शङ्कर ।
वेदाचारविहीनानां सद्योच्छिष्टशरीरिणां ॥ २ ॥
शीघ्रेण सिद्धिदं मन्त्रं ब्रूहि मे परमेश्वर ।

ईश्वर उवाच ॥

उच्छिष्टगणनाथाख्यं सर्व्वसिद्धिप्रदायकम् ॥ ३ ॥
सर्व्ववश्यकरं लोके स्त्रीणां पुंसामिदं शुभम् ।
वश्यं करोति राजानं स्त्रियं वा पुरुषं तथा ॥ ४ ॥

5898.

4745. **कालोत्तरे मुद्रापटलम् ।** *Mudrāpaṭalam from the Kālottaratantram.*

Substance, palm-leaf. 12 × 2¼ inches. Folia, 8, of which five are marked 27, 43, 81, 98 and 110; the rest are without leaf-marks. Lines, 5 on a page. Extent in ślokas, 18. Character, Kuṭila. Appearance, old and dilapidated. Fragmentary.

All the folia except 27 are more or less damaged and they do not belong to the same work. The damaged and fragmentary condition of the MS does not make it possible to ascertain the works to which the folia belong. On fol. 110A, the *Gālavacarita* is mentioned twice. Leaf 27B contains the following colophon :—

इति कालोत्तरे मुद्रापटलम् ।

5899.

2889. **योनितन्त्रम् ।** *Yonitantram.*

Substance, country-made yellow paper. 15 × 4 inches. Folia, 17. Lines, 5 on a page. Extent in ślokas, 250. Character, Bengali. Appearance, fresh. Complete in 8 chapters.

The work is described in L. IX. 3185.

5900.

4672. *Yonitantram.*

Substance, country-made paper. 14 × 5 inches. Folia, 8. Lines, 9 on a page. Extent in ślokas, 200. Character, Bengali. Appearance, old and discoloured. Complete in 8 chapters.

5901.

5093. *Yonitantram.*

Substance, country-made paper. 14 × 4 inches. Folia, 9. Lines, 8 on a page. Extent in ślokas, 225. Character, Bengali. Appearance, old and discoloured. Complete in 8 chapters.

5902.

6088. *Yonitantram.*

Substance, country-made paper. 7½ × 4¼ inches. Folia, 25. Lines, 7 on a page. Extent in ślokas, 225. Character, modern Kashmiri. Appearance, fresh. Complete in 8 chapters.

The last verse of the previous MSS of the work is not found here.

5903.

10000. योनिगह्वरतन्त्वम् । *Yonigahvaratantram.*

Substance, palm-leaf. 12 × 2 inches. Folia, 10. The corners of the leaves which may have borne leaf-marks are worn away. Lines, 5 on a page. Extent in ślokas, 550. Character, old Newari. Appearance, old. Complete.

The work seems to belong to the Nātha school.

Beginning -

या मान्तकाग्निकुहरोत्थितभास्वरायां
सोमार्कवह्नित्रिपथोदरमध्यसंस्था ।
चिच्चेतच्चिन्तविघ्नं + + + भावां ।
स्वाभावभ[ा]सक्रियरां प्रणमामि कालीं ॥

श्रीमदुत्तरपीठे तु श्मशाने करवीरके ।
सर्व्वयोगिनी मेला पो + + + मये ॥
योनिगह्वरमुद्भृत्य मन्त्रसद्भावमुत्तमम् ।
श्रीज्ञाननेत्रनाथेन भूतले संप्रकाशितम् ॥
ब्रह्मप + + + + + भैरवं विगतामयं ।
शक्तिस्थं शक्तिरहितं परमानन्दरूपिणम् ॥
निर्वाणं निर्व्विकारञ्च अप्रतर्क्यं मनो प +
+ + गुणगणैर्हीनं उदयास्तमवर्ज्जितम् ॥
भूचरी खेचरी चैव दिक्चरी गोचरी तथा ।
योगिनी शाकिनी लामा सिद्धसङ्घैः + + + + ॥

A list of the *gurus* of the school is given thus :—

17B, गुरुक्रमं प्रवक्ष्यामि शृणु वीरेन्द्रनायकम् ।

श्रीदेव्यवाच ॥

शृणु भैरव-राजे[शा] कथयामि महा[ा]द्भुतम् ।
य[न्न] कस्यचिदाख्यातं सिद्धानां खेचरीषु च ॥
तव स्नेहात् प्रवक्ष्यामि सिद्धिचक्रचतुष्टयम् ।
अनाख्येया परा निष्ठा ज्ञात्वा मोक्षप्रदायिनीं ॥
प्रथमं क्रमपूर्व्वन्तु द्वितीयं सिद्धपूर्व्वकं ।
संहारं तु तृतीयं स्यात् अनाख्येयं चतुर्थकम् ॥
एतेषां क्रमराजानां सिद्धसंज्ञा वदामि ते ।
पश्चान्मन्त्र महाभीमं विद्या सङ्कर्षणी तथा ॥
आद्ये युगे यथा जातं त्रेतायां द्वापरे तथा ।
चतुर्थं महाघोरे समासा शृणु भैरव ॥

खगेन्द्रनाथचिज्जा अचा आयातानि कृतो युगे ।
द्वितीये कूर्म्मनाथं तु मंगलादूतिमेव च ॥
तृतीये भूनाथश्च कामसङ्कलया सह ।
चतुर्थे मीननाथं च कुङ्कणादूतिसंयुतम् ॥
तस्यैव क्रीडमानस्य उत्पन्ना द्वाद[श] सुताः ।
तेषां नामानि वक्ष्यामि आम्नायं च यथास्थिताः ॥
भट्टामरमहेन्द्रं च वल्कलं चित्रमेव च ।
विन्ध्यालिं वरदेवं च अहेन्द्रं च गजेन्द्रकम् ॥
महीधरं च गुडिकं सिद्धेषाः गुरुसन्ततौ ।
एभ्योर्द्ध्वरेताः षट् चैव सादिकाग्टिस्तथा ॥
तेषां च प्रविभागं तु कथयामि वृषध्वज(ः) ।
भट्टमहेन्द्रनाथं च वल्कलं च तथा परम् ॥
अहेन्द्रं च गजेन्द्रं च महीधरस्तथैव च ।
एते सिद्धा महादेव ऊर्द्ध्वरेता गता[ः] सदा ॥
अमरनाथपादं तु वरदेवस्तथापरः ।
चित्रालिं विन्दनाथस्य गुडिकानाथमेव च ॥
एते षट् स्यात् विकारास्ते कथिता[ः] सुरपूजित(ः) ।
निष्कृयानाथपादं च ज्ञानदीप्तिः महेकतः ॥
विद्यानन्द च रक्तं तु द्वितीयं कथिता तव ।
मक्तयानन्दं महानन्दं तृतीयं सिद्धपूजितम् ॥
शिवानन्दं च रत्ना च आयातं च चतुर्थके ।
खगेन्द्राद्यादिसिद्धानां कथिता गुरुसन्ततौ ॥
एते वै कुलमार्गे स्य रहस्यं शिवनिर्म्मितम् ।

The origin of the scriptures of the school and the order of creation of the world are indicated as follows :—

34B, सम्यक् महाशासनसम्प्रदायं पूजाकथासंक्रमपूर्व्वमेवं ।
सम्प्राप्य कौलोत्तरमाम्भृतं अभूतपूर्व्वं अथ कारणादिं ॥

देवी श्रीवीरसिंहाख्यस्वामिनी प्रसूता भुवि ।
तत्पादपद्मयुगलात् प्राप्तं चैव महानयम् ॥
श्रीरूपानन्दविधा देवी दत्तं तस्य प्रसादतः ।
तया दत्तं स्वशिष्यस्य ओघानन्दाभिधानतः ॥
दत्तं परामृतरसं महाप्यासनमुत्तमम् ।
तेनेदं चरितं सर्व्वं यथा प्राप्तं गुरोर्मुखात् ॥
सम्प्रदायं सुसंबद्धं सरहस्यं सुखागमम् ।
रचितं गुरुवाक्येन स्वसन्तानहिताय च ॥
आदौ सर्व्वमिदं शून्यं निराभासं निराश्रयम् ।
ततो आभासमुत्पन्नं आभासध्वनिसम्भवम् ॥
ध्वनिस्तु शब्दमापन्नं शब्दो नादत्वमागतम् ।
नादविन्दुरिवोत्पन्नं विन्दुपद्मं प्रजायते ॥
ततः पृष्ठा त्रिकोणन्तु क्लादरूपं सुतेजसम् ।
ततस्तत्पृष्ठके चक्रं त्रिकोणं तापरूपिणम् ॥
क्लादताप-क्रमेणैव अवतीर्णं महानयं ।
ततो मध्या परा योनि एकाराक्षतमुत्तमा ॥
तत्र मध्या विस्फुलिङ्गं उत्पन्नं भूरितेजसम् ।
विस्फुलिङ्गात् समुत्पन्ना रावं सम्पूर्णलक्षणम् ॥
ततो रावात् समुत्पन्ना देवी द्वोक्षीणपूर्णगा ।

End :—

जयति विभवसाक्षं रौद्रचण्डप्रमूर्त्तिमम् ।
ममल-कमल-सान्तं मन्त्रदेहप्रसिद्धं
कुमतिमिह देवी साधकः सिद्धिदा तु ॥

The last colophon which is the only colophon in the whole work runs :—

इत्युत्तराम्नाये श्रीॐकारपीठविनिर्गते श्रीचण्डभैरवे षोडशसहस्रे उड्डिते योनिगह्वरं समाप्तं । इति शुभं ।

5904.

3160. कुलार्णवतन्त्रम् । *Kulārṇavatantram.*

Substance, country-made paper. 14 × 5½ inches. Folia, 66. Lines, 11 on a page. Extent in ślokas, 2,150. Character, Bengali. Appearance, fresh. Incomplete.

The work, in 17 chapters, has been published in the *Tantrasaṅgraha*, *Sulabha Tantra-Prakāśa* and *Tantric Texts* of Arthur Avalon (Calcutta, 1917). The present MS goes to the end of the 14th ullāsa. Of the 15th ullāsa there is only one leaf.

5905.

3452. *Kulārṇavatantram.*

Substance, country-made paper. 17½ × 4 inches. Folia, 1-69 (as indicated on the right hand side) and 76-111 (as indicated on the left hand side). Lines, 7 on a page. Extent in ślokas, 2,300. Character, Bengali. Date, Śaka 1640. Appearance, discoloured. Complete in 17 chapters.

Post Colophon :

ऋतुरन्ध्रा : : ग्यामु शुक्लेषु कृष्णाशर्म्मगा ।
रहस्योयं मुदालेखि शिवोक्तः शिवया सह ॥

रुद्रयामले ।

उड्डीयाने महापीठे न सिद्धिः स्यात् स्त्रियं विना ।
स्त्रीविहीनो साधने च विघ्नं कुर्व्वन्ति देवताः ॥
तथैव देविदैकोठे पीठे देवि सुनिश्चितम् ।
भक्ताहारविहारा च सर्व्वलोक-मनोहरा ॥
यस्या दर्शनमात्रेण मनःक्षोभः प्रजायते ।
अक्षोभो मनमश्चैव तत्र सिद्धिः प्रजायते ॥
सुजातीया सर्व्वदा ग्राह्या ब्राह्मणीं यवनीं विना ।
रजकी नापिती ग्राह्या विदग्धा सर्व्वदैव च ॥

ब्राह्मणीं यवनीं वापि यः स्पृशेद्दैवयोगतः ।
न तस्य विद्यते सिद्धिः कल्पकोटिशतैरपि ॥
दरिद्रः स्यात् महारोगी सर्व्वलोकविनिन्दितः ।
विमुखी त्रिपुरा तस्य ह्रसन्ती याति नित्यदा ॥
हिङ्गुलाख्ये महापीठे मत्स्यं खादति यो जनः ।
न तस्य जायते सिद्धिः कल्पकोटिशतैरपि ॥
देविदैकोटिमुद्राख्यपीठयोरन्तरे वसन् ।
मद्यं दत्त्वा जपेद्यस्तु तस्य सिद्धिर्न जायते ॥
जालन्धरे महापीठे तथा मद्यं परित्यजेत् ।
वाराणस्यां महाभागे शिवभक्तिपरायणाः ॥
एकया मुद्रया सिद्धिर्जायते नात्र संशयः ।
अन्तर्वेदिप्रयागे [च] मिथिलायां तथैव च ॥
मागधे मेखलायाञ्च मद्यात् सिद्धिः प्रजायते ।
तत्र देवाः प्रकुर्व्वन्ति किं मद्यरसं विना ॥
अङ्गवङ्गकलिङ्गेषु स्त्रिया सिद्धिर्भवेद्ध्रुवम् ।
तथैव सिंहलादौ च स्त्रीराज्ये द्रौपदीकृते ॥
गढायां मत्स्यमांसैश्च मुद्रयाङ्गनयापि च ।
गौडे च पञ्चभिर्द्रव्यैः सर्व्वसिद्धिः प्रजायते ॥
एवमन्येषु देशेषु पञ्चभिः सिद्धिरुत्तमा ॥

तन्त्रान्तरे ।

दधिना समभागञ्च गुडं दत्त्वा दिनत्रयम् ।
वदरीमूलसंयुक्तं मद्यं भवति पार्व्वति ॥

तन्त्रान्तरे ।

कुलं शक्तिः समाख्याता तस्यां पूजादिकञ्च यत् ।
कुलाचारः स विज्ञेयः साधकस्येष्टदायकः ॥

समाप्तश्चायं ग्रन्थः ॥

शुभमस्तु शकाब्दाः १६४० । श्रीगङ्गाधर देवशर्म्मणः स्वाक्षर-
मिदं पुस्तकञ्च । कृष्णाय गोविन्दाय नमः ॥

The date given here seems to be the date of copying of the present MS whereas the date found in the beginning of the post-colophon appears to be the date of the MS from which the present MS was copied.

The above extract from the *Rudrayāmala* agrees generally with what appears to be the 18th chapter of the *Kulārṇava* in a Vaṅgīya Sāhitya Pariṣat MS (No. 602).

5906.

4730. *Kulārṇaratantram.*

Substance, country-made yellow paper. 9¼ × 4½ inches. Folia, 44–53. Lines, 7 on a page. Extent in ślokas, 105. Character, Nāgara. Date, N.S. 924. Appearance, fresh. Incomplete.

The present MS contains only the ninth chapter of the work.

Post Colophon :–

संवत् ९२४ माघशुक्ले चतुर्दश्यां लिखितमिदम् ।

5907.

3714. *Kulārṇavatantram.*

Substance, country-made paper. 19½ × 4½ inches. Folia, 14. Lines, 8 on a page. Extent in ślokas, 490. Character, Bengali. Appearance, old and dilapidated. Incomplete.

This MS runs from the beginning up to verse 39 of the fourth chapter of the work.

5908.

3917E. *Kulārṇavatantram.*

Substance, country-made paper. 14½ × 4½ inches. Folia, 39A–41A. Lines, 11 on a page. In tripāṭha form. Character, Bengali. Appearance, old and discoloured. Incomplete.

This MS contains what is called the "36th" chapter of the work.

Beginning :—

ॐ गुरवे नमः। श्रीशिव उवाच—

शृणु दुर्गे प्रवक्ष्यामि साधकानां सुखोत्तमम्।

End :—

तवैव सेवानिपुणो जनो वा तन्नास्ति चित्तं फलभाग् न वेश्वरः।

Colophon :—

इति कुलार्णवे देवीश्वरीसंवादे परमार्थ-तत्त्वज्ञानतरङ्गिण्यां नाम-महात्म्यं षट्चिंशत् पटलः।

5909.

3917G. *Kulārṇavatantram.*

Substance, country-made paper. 14½ × 4½ inches. Folia, 54B–83B. Lines, 11 on a page. Character, Bengali. Date, Śaka 1614. Appearance, old and dilapidated. Incomplete.

This MS runs up to verse 74 of the 11th chapter. The date of the MS is given at the end of the Muṇḍamālā-tantra which is completed at fol. 54B of the same MS.

5910.

4668. *Kulārṇavatantram.*

Substance, country-made paper. 17 × 6¼ inches. Folia, 152–216 (as indicated on the right side of the leaves) or 1–65 (as indicated on the left side). Lines, 10 on a page. Character, Bengali. Appearance, fresh. Complete in 17 chapters.

The seven verses at the end of Avalon's edition of the work are not found in the present MS.

5911.

5912. *Kulārṇavatantram.*

Substance, country-made paper. 9 × 5½ inches Folia. 123 Lines, 10 on a page. Extent in ślokas, 2,150. Character, modern Nāgara. Appearance, fresh. Complete in 17 chapters.

5912.

5862A. *Kulārṇavatantram.*

Substance, country-made paper. 9½ × 4½ inches Folia, 1-5. Lines, 13 on a page. Character, Nāgara Appearance, good. Incomplete.

This MS runs up to verse 117 of chapter I of the work. In the beginning there are three additional introductory verses not found in Avalon's edition of the work. They run as follows:—

श्रीगुरून् गणपतिं दुर्गां वटुकं शिवमच्युतम् ।
ब्रह्माणं गिरिजां लक्ष्मीं वाणीं वन्दे विभूतये ॥
अनाद्यायाखिलाद्याय मायिने गतमायिने ।
अरूपाय स्वरूपाय शिवाय गुरवे नमः ॥
परप्रसादमन्त्राय सच्चिदानन्दमूर्त्तये ।
अग्नीषोमस्वरूपाय त्र्यम्बकाय नमो नमः ॥

5913.

166. कुलार्णवे ईशानसंहिता । *Īśānasaṃhitā from Kulārṇavatantram.*

Substance, country-made yellow paper 18 × 3 inches. Folia, 9. Lines, 5 on a page. Extent in ślokas, 215. Appearance, good. Complete.

The manuscript has been noticed in L. I. 424. No such topic as dealt with in this MS is found in the printed editions of the *Kulārṇava*.

It is in the form of an interlocution between Nārada and Gautama and also between Śaṅkara and Pārvatī. It is a Vaiṣṇava work.

The present work obtains its name from the name of the sixth mouth of Śiva which is hidden and called Īśāna.

The six Āmnāyas of the Tantras describing the rites of various deities are stated to have issued from the six mouths of Śiva as follows (cf. also pp. 119-20 below):—

Fol. 3B. भुवनेशी चान्नपूर्णा महालक्ष्मीः सरस्वती ।
चतुर्वर्गप्रदा देव्यो मन्त्रास्त्रासाश्च कामदाः ॥
साधनानि च सर्व्वाणि पूर्व्ववक्त्रेण कीर्त्तिताः ।
प्रसादर्क्षिणामूर्त्तिगोपाल-गरुडध्वजाः ॥
चतुर्वर्गप्रदा एते मन्त्रास्त्रैषां ससाधनाः ।
दक्षवक्त्रेण कथिता मया जनविमुक्तये ॥
कृष्णनारायणौ विष्णुराघवौ नरसिंहकः ।
हयग्रीव-वराहाद्यास्तथान्ये प्रङ्करादयः ॥
चतुर्वर्गप्रदा लोके मन्त्रास्त्रैषां ससाधनाः ।
प्रत्यक्-वक्त्रेण कथिता मया कारुण्यतः प्रिये ॥
काली तारा महिषी च त्वरिता वगला तथा ।
जयदुर्गा तथा चान्या मातङ्ग्यादयः प्रिये ॥
युगे युगे पूर्णकला विशेषेण कलौ युगे ।
मन्त्राः ससाधनास्त्रासां उदक्वक्त्रेण कीर्त्तिताः ॥
त्रिपुरेशी तथा चण्डा तथा त्रिपुरभैरवी ।
त्रिपुटा त्रिपुरा नित्या तथा चान्यास्त्र देवताः ॥
चतुर्वर्गप्रदा नित्यं मन्त्रास्त्रासां ससाधनाः ।
ऊर्द्ध्ववक्त्रेण कथिता भुक्तिमुक्तिप्रदे नृणां ॥
सूर्य्यश्चन्द्रो हनूमांश्च गौराङ्गो ह्यपराजिता ।
प्रत्यङ्गिरा विषहरा तथा चान्यास्त्र देवताः ॥

चतुर्वर्गप्रदास्त्वेमे कलिकाले विशेषतः ।
मन्त्राः ससाधनास्त्वेषां गुप्तवक्त्रेण कीर्त्तिताः ॥
इत्येष कथितः कान्ते मम वक्त्रविनिर्णयः ।
गोपनीयः प्रयत्नेन न देयः पशुघातिने ॥

The name of Gaurāṅga in the sixth Āmnāya provokes a question from Pārvatī in reply to which Maheśvara emphasizes the divinity of Gaurāṅga and gives the details of his Tāntrika worship.

5914.

3764. **कुलार्णवे षट्कर्म्मविधिः ।** *Satkarmavidhiḥ from Kulārṇavatantram.*

Substance, country-made paper. 9½ × 4 inches. Folia, 2. Lines, 9 on a page. Extent in ślokas, 30. Character, Nāgara. Appearance, fresh. Complete.

This work deals with the six black rites of the Tantras. This topic is dealt with, though not in identical language, in the 16th chapter of the *Kulārṇava*. The first three verses of the extract quoted below are found in *Śāradātilaka* (XXIII, 128–30).

Beginning :—

अथ षट्कर्म्मप्रयोगः ।
सूर्य्योदयं समारभ्य घटिकादशकं क्रमात् ।
ऋतव[स्त्र] वसन्ताद्याः दिवारात्रौ दिने दिने ॥
वसन्तग्रीष्मवर्षाख्यशरद्धेमन्तसंभवात्(?) ।
हेमन्ते शान्तिकं प्रोक्तं वसन्ते वशकर्म्मणि ॥
म्रिम्रिंरः स्तम्भने ज्ञेयो विद्वेषो ग्रीष्मके मतः ।
प्रावट् उ[च्]चाटने ज्ञेया शरत् मारण[कर्म्मणि] ॥
सर्व्वाभिमुखतः कुर्य्यात् शान्तिकस्य कुलेश्वरि ॥

Colophon :— इति श्रीकुलार्णवे षट्कर्म्मविधिः ।

For an account of the contents of the Kulārṇava-tantra cf. C. Chakravarti—*Extent and contents of the Kulārṇavatantra* (Annals of the Bhandarkar Oriental Research Institute, Vol. XIII, p. 206ff.).

5915.

163. गुप्तसाधनतन्त्रम् । *Guptasādhanatantram.*

Substance, country-made paper. 19 × 3 inches. Folia, 16. Lines, 5-7 on a page. Extent in ślokas, 400. Character, Bengali. Date, Śaka 1691(?). Appearance, old and soiled. Complete in 12 chapters.

The work, in 12 chapters, has been published in the *Tantrasaṅgraha* of Rasikmohan Chatterji and described in L. II. 738. For other editions cf. BM Catalogue (1877–1892, p. 414; 1906–28, p. 1073).

Post Colophon Statement :—

शशिग्रहषडास्यशमितेऽब्दे माघमासे लिखितो श्रीराजकिशोर शर्म्मणा गुप्तसाधनतन्त्रकः ।

5916.

4666. *Guptasādhanatantram.*

Substance, country-made yellow paper. 16½ × 4¼ inches. Folia, 17. Lines, 7 on a page. Extent in ślokas, 400. Character, Bengali. Appearance, fresh. Complete in 12 chapters.

5917.

2760. *Guptasādhanatantram.*

Substance, country-made paper. 16½ × 4 inches. Folia, 4. Lines, 5 on a page. Extent in ślokas, 84. Character, Bengali. Appearance, new. Incomplete.

The present MS contains the 6th and the 7th Paṭala of the work.

5918.

159. गुरुतन्त्रम् । *Gurutantram.*

Substance, country-made paper. 15 × 5½ inches. Folia, 7. Lines, 7 on a page. Extent in ślokas, 190. Character, Bengali. Appearance, fresh. Complete.

The present MS has no division in chapters. The work is described in L. I. 247 in which the concluding colophon is given as belonging to the fifth chapter of the work. The beginning and end of the present MS agree with those of L.

5919.

1621. निर्व्वाणतन्त्रम् । *Nirvāṇatantram.*

Substance, country-made yellow paper. 14 × 3½ inches. Folia, 17. Lines, 8 on a page. Extent in ślokas, 550. Character, Bengali. Appearance, old. Complete in 14 chapters.

Printed in 14 chapters in *Tantrasaṃgraha* and *Sulabhatantraprakāśa*. For a description of the work cf. L. I. 274.

5920.

31. समयाचारतन्त्रम् । *Samayācāratantram.*

Substance, country-made paper. 9½ × 4 inches. Folia, 16. Lines, 9 on a page. Extent in ślokas, 300. Character, Nāgara. Appearance, old. Complete.

The present MS is described in L. II. 755, where it is stated to be in prose but as a matter of fact the work is mostly in verse. The portions of mantras and directions only are in prose. The work has been described also in HPR. II. 241.

The object of the work is given in the following verses (Fol. 1) :—

शृणु देवि प्रवक्ष्यामि गुह्याद्गुह्यतरं महत् ।
समयाचारसङ्केतं तन्त्रं परमदुर्ल्लभम् ॥ ६ ॥

पूजनादिषु यः कालो देवतानां पृथक् पृथक् ।
स कालः समयो नाम यं ज्ञात्वामृतमश्नुते ॥ ७ ॥

कालेष्वाचरणं देवि यस्य देवस्य यं विधिं ।
तं नाम समयाचारं देवानामपि दुर्ल्लभम् ॥ ८ ॥

सङ्कीर्त्तनात् पुनर्देवि रहस्यानां रहस्यकम् ।
समयाचारसङ्केतं नाम्ना तन्त्रं प्रकीर्त्तितम् ॥ ९ ॥

अथवा समयाचारात् समयाचारमुच्यते ।
समया गोपनीयानां सदा गोप्या प्रकीर्त्तिता ॥ १० ॥

The origin of the six Āmnāyas is indicated :—

5B, पूर्व्वाम्नायस्तदा ज्ञातो यदा प्राची दिशि स्थितः ।
एवं पश्चिम आम्नायः पश्चिमस्यां दिशि स्थितः ॥ ६८ ॥

एवमुत्तर आम्नाय उत्तरस्यां दिशि स्थितः ।
मुखमूर्द्धकृतं देवि यत्प्रोक्तं तव सन्निधौ ॥ ६९ ॥

स ऊर्द्ध आम्नायः कथितो देवानामपि दुर्ल्लभः ।
अधोमुखं कृतं देवि यत्प्रोक्तं गिरिशप्रिये ॥ ७० ॥

अध आम्नायः इत्युक्तं सत्यं सत्यं वरानने ।
षडाम्नायकथिताश्चोत्पत्तिक्रमनामतः ॥ ७१ ॥

In this enumeration the southern Āmnāya is omitted by inadvertence of the scribe or of the author. But it appears in the next extract which gives the names of different goddesses described in the various Āmnāyas :—

6A, यस्मिन् यस्मिंश्च ये देवाः कीर्त्तिताश्च वरानने ।
तांस्तान् देवान् प्रवक्ष्यामि साधका[नां] सुखाय च ॥ ७२ ॥

श्रीविद्याभेदसहिता बाला च त्रिपुरा च या ।
भुवनेश्वर्य्यन्नपूर्णा च पूर्व्वाम्नायप्रकीर्त्तिताः ॥ ७३ ॥
वगलामुखी च दर्पिनी त्वरिता स्वफलप्रदा ।
महिषमर्दिनी महालक्ष्मी दक्षिणाम्नायकीर्त्तिता ॥ ७४ ॥
कालिकाभेदसहिता ताराभेदैश्च संयुता ।
मातङ्गी भैरवीच्छिन्ना तथा धूमावती मता ॥ ७५ ॥
उत्तराम्नायकथिता शीघ्रकामफलप्रदा ।
समस्तभेदसहिता कालिका या प्रकीर्त्तिता ॥ ७६ ॥
दार्वि[प्र]त्यङ्गरी नाम दक्षिणाम्नायसंज्ञिका ।
परापरादो मन्त्रश्च ऊर्द्धाम्नायप्रकीर्त्तितः ॥ ७७ ॥
वागीश्वर्य्यादयो विद्या अधश्चाम्नायकीर्त्तिताः ।
ऊर्द्धाम्नायो ह्यधश्चैव केवलं मोक्षदो भवेत् ॥ ७८ ॥

An enumeration of the various original Tantra works is given as follows:—

8B, नाना तन्त्राणि देवेशि पटलानि पृथक् पृथक् ॥ १२८ ॥
डामराणि च सर्व्वाणि तन्त्राणां हृदयानि च ।
समासतः प्रवक्ष्यामि शृणु देवि वरानने ॥ १२९ ॥
चतुःषष्टीनि तन्त्राणि यामलान्यष्ट सुन्दरि ।
डामराणि च चौणि स्युः कथयामि शुभानने ॥ १३० ॥
तन्त्राणां बन्धनाश्च मया पूर्व्वं प्रकाशितं ।
यामलान्यत्र वक्ष्यामि डामराणि तथा पुनः ॥ १३१ ॥
विष्णुब्रह्मशिवानाञ्च यामलानि पृथक् पृथक् ।
शक्तेर्गणपतेश्चैव स्कन्दस्य च पृथक् पृथक् ॥ १३२ ॥
सूर्य्याचन्द्रमसोश्चैव कथितानि वरानने ।
ऊड्डीशडा[म]रं नाम भूतडामरकं तथा ॥ १३३ ॥
शक्ति-डामरकं नाम कथितानि च डामरम् ॥

It mentions Vijayākalpa as another work previously mentioned (*v.* 239).

5921.

3112. *Samayācāratantram.*

Substance, country-made paper. $10\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 23. Lines, 9 on a page. Extent in ślokas, 300. Character, Nāgara. Date, Samvat, 1944. Appearance, fresh. Complete.

Post Colophon :—

संवत् १९४४ ॥ मीः कु आर मासे शुक्लपक्षे ॥ १० ॥ वार सोमाः ॥

श्रीशिवशङ्कराय नमो नमः ॥ श्रीरामानुजाय नमो नमः ॥

5922.

3172. *Samayācāratantram.*

Substance, foolscap paper. 15 × 5 inches. Folia, 9. Lines, 11 on a page. Extent in ślokas, 325. Character, Bengali. Appearance, discoloured. Complete.

5923.

11251. *Samayācāratantram.*

Substance, country-made paper. 11 × 5 inches. Folia, 1–7. Lines, 14 on a page. Extent in ślokas, 270. Character, Nāgara. Appearance, discoloured. Incomplete.

The present MS begins with the last foot of a verse marked 30.

5924.

3712. समयातन्त्रम् । *Samayātantram.*

Substance, country-made paper. 18 × $3\frac{1}{2}$ inches. Folia, 39. Lines, 8 on a page. Extent in ślokas, 1,200. Character, Bengali. Appearance, dilapidated and pasted. Incomplete.

It contains the first nine Paṭalas and a portion of the tenth.

The topics dealt with in the work as well as the significance of the name of the deity Samayā have been indicated on Fol. 38A :—

कथितं परमज्ञानं समया सा समार्च्चनम् ।

कर्म्मयोगात्मकं वेदज्ञानयोगात्मकं परम् ॥

न्यासविन्यासनं भद्रं नित्यज्ञानपरापरम् ।

पूजासङ्केतममलं बलिसङ्केतमुत्तमम् ॥

जपसङ्केतमीशान-वह्निहोमविधानकम् ।

त्रिबीजसाधनं गुप्तं तथा भावप्रकाशनम् ॥

महाप्रयोगसङ्केतं संशयच्छेदकारणम् ।

... ...

काले सम्पद्यते सर्व्वं काल एव हि लीयते ।

सृष्टिसंहारयोर्देवि काल एव हि कारणम् ॥

कालभैरवरूपोऽहं त्वञ्च कालस्वरूपिणी ।

कालः समय एव स्यात् समया त्वं परापिये ॥

अहं सामयिकस्तेन यस्मात्तव वशं सदा ॥

5925.

3161. वीरतन्त्रम् । *Vīratantram.*

त्वया विद्या च देवेश कथिता न प्रकाशिता ।
इदानीं कथयिष्यामि कथयानन्दसुन्दर ॥

ईश्वर उवाच ।

भुवनेशा महाविद्या देवराजेन वै पुरा ।
आराधिता च विद्येयं ब्रह्मणानेन मोहिता ॥
एकाक्षरी बीजहीना वाग्भवेनोज्ज्वला परा ।
कामराजाख्यविद्या सा सुसिद्धा पुष्पधन्विका ॥
शक्रेण पूजिता पूर्व्वं भुवनेशी प्रतिष्ठिता ।
कुमारी या च नार्य्येयं त्वया गुप्ता रतिच्युता ॥
केवलं शिवभावेन शक्तिरूपेण केवलम् ।
माया प्रतिष्ठिता देवी तारा चन्द्रस्वरूपिणी ॥
भैरवी तु महाविद्या महासम्पत्करी शुभा ।
छिन्नमस्ता सुरामांसप्रिया रक्तस्वरूपिणी ॥
धूमावती महाविद्या मारणोच्चाटने मता ।
वगला वश्यस्तम्भादि नानागुणसमन्विता ॥
मातङ्गी तु महाविद्या त्रैलोक्यवशकारिणी ।
कमला त्रिविधा प्रोक्ता एकाक्षरतया स्थिता ॥
एकाक्षरी महाविद्या सर्व्वसम्पत्प्रदायिनी ।

Chapter II (Fol. 2A) :—

श्रीदेव्युवाच ।

अक्षमालेति कथिता यत्नेनैव प्रकाशिता ।
अक्षमालेति किं नाम फलं किं वा वदस्व मे ॥
अक्षमाला तु देवेशि काम्ये नैमित्तिके तथा ।
भवत्यत्रापि एतेऽपि विस्तरात् कथ्यते मया ॥

Chapter III (Fol. 4A) : —

देव्युवाच ।

स्थानासनं देवदेव कथयानन्दहेतवे ।
मदाश्रया विनिर्दिष्टाः सर्व्वे मन्त्राः सुसिद्धिदाः ॥

ईश्वर उवाच ।

नदीतीरे विल्वमूले श्मशाने शून्यवेश्मनि ।
महालिङ्गे पर्व्वते वा देवागारे चतुष्पथे ॥
शवस्योपरि मुण्डे वा जलकण्टकपूरके ।
संग्रामभूमौ वा योनौ वा श्मशाने विजने वने ॥

Chapter IV (Fol. 5A) :

देव्युवाच ।

केवलं बलिदानेन तुष्टा भवति चण्डिका ।
कथितं पूर्व्वमखिलं प्रकाशं कुरु शङ्कर ॥

ईश्वर उवाच ।

अत्यन्तगुह्यं देवेशि विधानं बलिपूजनम् ।
कथयामि वरारोहे स्वस्वभावेन सुन्दरि ॥
दधिक्षीरं गुडं चान्नं पायसं शर्करान्वितम् ।
पायसं क्षीरमम्लतं नारिकेलफलोदकम् ॥
महिषञ्च दिधं दद्यात् मांसं माहिषमेव च ।
पायसं क्षुद्रमांसञ्च नारिकेलसमोदकम् ॥
शशकं मेषखड्गञ्च सार्द्रकञ्च सशर्करम् ।
रम्भाफलञ्च लड्डुकं भर्ज्जितान्नञ्च पिष्टकम् ॥
... ...
... ...
... ...
छागे दत्ते भवेद्वह्नी मेषे दत्ते भवेद्ध्रुवम् ।
महिषे धनवृद्धिः स्यात् मृगे भोगफलं लभेत् ॥
पक्षिदत्ते महर्षिः स्यात् गोधिकायां महाफलम् ।
नरे दत्ते महर्द्धिः स्यादष्टसिद्धिमनुत्तमम् ॥

Chapter V (Fol. 6B):—

देव्युवाच ।

रहस्यातिरहस्यं मे पुरश्चर्य्याविधिं प्रभो ।
वदस्व यदनुष्ठानं सर्व्वकामा भवन्ति हि ॥

ईश्वर उवाच ।

गृहीत्वा सद्गुरोर्दीक्षां शुभे काले दिवानिशि ।
आश्रमे वैष्णवः प्रोक्तो मध्यमः सैव दीक्षितः ॥
मुख्या दीक्षितो यो वै स एव परमो गुरुः ॥

Chapter VI (Fol. 7B):—

देव्युवाच ।

देवदेव महादेव सृष्टिस्थितिलयात्मक ।
कालिकाया महाविद्या कथयस्व समाहितः ॥

ईश्वर उवाच ।

अथ वक्ष्ये महाविद्यां कालिकाया सुदुर्ल्लभाम् ।
यस्य विज्ञानमात्रेण जीवन्मुक्तो भवेन्नरः ॥

Chapter Vii (Fol. 10B):—

देव्युवाच ।

कैलासशिखरारूढं देवदेवं जगद्गुरुम् ।
पृच्छामि शृणु देवेश तारिण्या मन्त्रसाधनम् ।

शङ्कर उवाच ।

शृणु देवि प्रवक्ष्यामि मन्त्रोद्धारञ्च कथ्यते ।
ॐकारं पूर्व्वमुच्चार्य्य हकारं तदनन्तरम् ॥

Chapter VIII (Fol. 13A):—

देव्युवाच ।

देवदेव परानन्द परिचर्य्याविशारद ।
सुन्दरीमन्त्रसाधन्तु (?) वदस्व करुणानिधे ॥

ईश्वर उवाच ।

गुह्यं देवि प्रवक्ष्यामि षोडशीमन्त्रसाधनम् ।
येन विज्ञानमात्रेण कुलकोटीः समुद्धरेत् ॥

Chapter IX (Fol. 15A) :—

देव्युवाच । (?)

अथ देवि प्रवक्ष्यामि गुप्तां त्रिभुवनेश्वरीम् ।
यामासाद्य सुराः सर्व्वे शक्तिभावेऽभवन् पुरा ॥

Chapter X (Fol. 16B) :

देव्युवाच ।

महेश श्रोतुमिच्छामि भैरवीमन्त्रनिर्णयम् ।
येन विज्ञानमात्रेण कुलकोटीः समुद्धरेत् ॥
वायुबीजञ्च प्रथमं बीजं प्राणसमन्वितम् ।
सकलं भुवनेशानि द्वितीयं बीजमुद्धृतम् ॥

Chapter XI (Fol. 18A) : —

देव्युवाच ।

महेश श्रोतुमिच्छामि छिन्नमस्ताविधिर्भवेत् ।
येनानुष्ठितमात्रेण सर्व्वपापैः प्रमुच्यते ॥

Chapter XII (Fol. 21A) :—

श्रीमहादेव उवाच ।

अथान्यातु (?) म वक्ष्यामि देवी गुह्यतमं प्रिये ।
उद्दिष्टपूर्व्वकां देवि मातङ्गी सर्व्वसिद्धिदाम् ॥
सर्व्वापत्तारिणी देवि सर्व्वदोषविवर्ज्जितां ।
यया विज्ञानमात्रेण क्षयं गच्छन्ति चापदः ॥

Chapter XIII (Fol. 23A) :

श्रीदेव्युवाच ।

महेश श्रोतुमिच्छामि बगलाविधिमुत्तमम् ।
येन विज्ञानमात्रेण नामाध्यं भुवनत्रये ॥

ईश्वर उवाच ।

शृणु देवि प्रवक्ष्यामि वगलामन्त्रनिर्णयम् ।
वह्निहीनेन्द्रखड्गयो वगलामुखी सर्व्वयुक् ॥

Chapter XIV (Fol. 24B) :-

देव्युवाच ।

कैलासशिखरारूढ देवदेव जगद्गुरो ।
ग्रमामन्त्रस्य किं + + तद्वदस्व करुणानिधे ॥

ईश्वर उवाच ।

शृणु देवि प्रवक्ष्यामि कमलामन्त्रनिर्णयम् ।
येन विज्ञानमात्रेण नासाध्यं भुवनत्रये ॥

Chapter XV (Fol. 26A) :-

श्रीदेव्युवाच ।

कमलाया मनुयुगं कथयस्व महाप्रभो ।
केनोपायेन देवेश कमला वरदा भवेत् ॥

ईश्वर उवाच ।

कुलेशि श्रोतुमिच्छामि (?) कमलामन्त्रमुत्तमम् ।
येन विज्ञानमात्रेण महादारिद्र्यखण्डनम् ॥

5973.

3917F. *Muṇḍamālātantra.*

Substance, country-made paper. 14½ × 4½ inches. Folia, 14 (beginning from 41A and ending in 54B) Lines, 11 on a page. In tripāṭha form. Character, Bengali. Date, Śaka, 1614. Writing effaced. Appearance, old and dilapidated. Complete in 12 chapters.

The present MS contains paṭalas I to XII of which the first five chapters agree with those of the previous MS.

Post Colophon Statement :—

शुभमस्तु शकाब्दाः १६१४ ।

5974.

179. *Maṇḍamālātantra.*

Substance, country-made paper. 14 × 3 inches. Folia, 1–13. Lines, 5–6 on a page. Extent in ślokas, 198. Character, Bengali. Appearance, old Incomplete.

This MS which runs up to the end of the sixth chapter has been described in L. I. 469.

5975.

10724. ज्ञानतिलकम् । *Jñānatilaka.*

Substance, palm leaf. 11 × 2¼ inches. Folia, 11–24. Lines, 4 on a page. Character, Kuṭila. Appearance, discoloured. Incomplete.

A MS of a *Jñānatilaka*, in the form of an interlocution between Nārada and Viṣṇu, is described in Nep. Vol. I, p. 180. The present work which is in the form of an interlocution between Śiva and his son Kārttikeya is apparently different and it deals with supreme knowledge.

The MS contains chapters V–VIII and a portion of chapter IV. The colophon of the 7th chapter (Fol. 19A) calls the work *Kālajñānatilaka*. Beginnings of the different chapters are as follows:—

Chapter V (Fol. 12A):—

श्रीकार्त्तिकेय वाच

त्वमीश सर्व्व ईशानः सर्व्वज्ञ शिवशाश्वतः ।
एभिर्वकोक्तिभिर्देव किं भ्रामयसि शङ्कर(:) ॥
मूढो[ऽ]हं अल्पबुद्धिश्च संसारभयपीडितः ।
स्पष्टं कथय देवेश समूलमभिप्रीणकैः ॥

12B, श्रीईश्वर उवाच ।

त्वां मुक्ता नास्ति मे कश्चित् इष्टो पार्व्वतिनन्दन ।
यस्याहं कथयिष्यामि एतत् परमकारणम् ॥
... ...

13A, अभावभावना येषां अभावन्तत्त्वनिश्चयात् ।
अभावगतचैतन्यास्ते मुक्ता नात्र संशयः ॥
अभावलब्धसंघातं यैर्गृहीतं नरेश्वरैः ।
दुस्तरं तेपि निस्तीर्णा महामाया भवार्णवे ॥
तीव्रेणापि न दह्येत घोरसंसारवह्निना ।
ये प्रविष्टा महात्मानो अभावविमलाम्भसि ॥
क्रोधदंष्ट्रो दुराधर्ष माया-कुटिलविग्रहः ।
अभावभाविनां पुंसां किं करोति भवोरगः ॥
लोभजिह्वा महामाया संसारजननीचरः ।
शून्यसंधरतानां तु नराणां स पराङ्मुखः ॥

Chapter VI (Fol. 15B) :—

15B, श्रीकार्त्ति + + + + ।
+ वाधिदेव ईशान सर्व्वज्ञ सुरपूजित(:) ।
प्रत्यक्षं दर्शयं देव त्यज वक्रोक्ति शंकर ॥

श्रीशङ्कर उ + + ।
+ + पश्य महासेन अनन्तं सर्व्वतोमुखं ।
महाज्ञानार्णवं शान्तं यं ज्ञात्वा वत्स मुच्यते ॥

Chapter VII (Fol. 17A) :—

[कार्त्तिके]य उवाच ।
तत्प्रसादाच्च देवेश अज्ञानतिमिरं घनं ।
ज्ञानसूच-समायोगात् विस्तीर्णं मन तत्क्षणात् ॥
+ + + + य नामानि अनामस्य सुरेश्वर ।
शिवस्य सूक्ष्मरूपस्य येन मे निश्चयो भवेत् ॥

श्रीईश्वर उ[वाच] ।

+ प्राप्तं आदिरहितं सशिखं यस्य मध्यतः ।
नामस्य पश्यतं नित्यं बाह्यं ते परकारणं ॥
नमस्तृतीययुग्मे + + मनामयमच्छगं ।
तेन विज्ञातमात्रेण मुक्तस्त्वं भवबंधनात् ॥
शिरद्वितीयकं पंचयुग्मोर्द्धशिरसं शिवं ।
ईश्वरालंकृतं मूर्द्धि तं ज्ञात्वा निर्वृतो भव ॥
संहारार्द्विंदुसंयुक्ता वह्निरीकारसं + + + ।
अभिस्थानं च रुद्रं च दुःखपंचकलक्षया ॥

Chapter VIII (Fol. 19A) :

श्रीकार्त्तिकेय उवाच ।

गङ्गातरङ्गनिर्धूतजटाजूट प्रणाङ्गदृक् ।
सगरैर्देव ईशान वृषभाङ्कित चासन ॥

... ...

श्रीईश्वर उवाच ।

... ...

19B, तथापि दुःप्रसाध्यस्य मार्गात्सारतरं महत् ।
समाधिनिर्णयं सूक्ष्मं भूयोपि कथयामि ते ॥
यदेतदात्मनो पिंडं शून्यावस्थं विचिन्तयेत् ।
हृते चैव स्वके पिंडे सर्व्वशून्यमिदं जगत् ॥
अहं विष्णु चिरं वत्स भूतानि च जगत्त्रयं ।
विगृह्य समवायेन मनोध्वनि नियोजयेत् ॥
सर्व्वं समरसीकृत्य बुद्धा परमकारणे ।
नमो निश्चलचित्तेषु न किञ्चिदपि चिन्तयेत् ॥

5976.

9991. *Jñānatilaka.*

Substance, palm-leaf. 11 × 2¼ inches. Folia, 3 (marked 2, 9, 10). Lines, 4 on a page. Extent in ślokas, 30. Character, Kutila. Appearance, old. Incomplete.

This is a mere fragment. Fol. 9B contains the colophon of the third chapter.

5977.

2890. मृत्युञ्जयतन्त्रम् । *Mṛtyuñjayatantra.*

Substance, country-made paper. 13 × 4½ inches. Folia, 16. Lines, 5 on a page. Extent in ślokas, 300. Character, Bengali. Appearance, fresh. Incomplete.

This MS, which contains chapters I–IV and a portion of chapter V, has been described in L. X. 4204.

A *Mahāvidyāsahasranāmastotra* mentioned in a MS in VSP (p. 44) as part of this Tantra is not found in the present MS.

5978.

187. पुरश्चरणरसोल्लासतन्त्रम् । *Puraścaraṇarasollāsatantram.*

Substance, country-made paper. 11½ × 4 inches. Folia, 32. Lines, 7 on a page. Extent in ślokas, 488. Character, Bengali. Appearance, old. Complete in ten chapters.

This MS has been described in L. I. 457. The work is also described in CS. V. 48. Besides with *Puraścaraṇa* proper, which is a well-known Tāntrika rite, the work deals with other topics as well, e.g. initiation (*dīkṣā*), greatness of the ten mahāvidyās, etc. The present MS contains chapters I–X. The greatness of the yavanas and the

success to be obtained by them by the performance of Tantra rites are referred to on Fol. 8B as follows :

सूर्य्यग्रहणकालाद्धि नान्यः कालः प्रशस्यते ।
स कालः परमेशानि परं ब्रह्म स्वमूर्त्तिमान् ॥
प्रजपेद् यदि चार्व्वङ्गि यवना यवनोद्भवाः ।
विचार्य्य यदि देवेशि यवनः प्रजपेद् यदि ॥
तत्काले चञ्चलापाङ्गि सिध्यन्ति यवनास्ततः ।
ग्रहणे चन्द्रसूर्य्यस्य न जपेद् यदि पामरः ॥
पूर्व्वपुण्यं परित्यज्य विष्ठायां जायते कृमिः ।
तस्मात् यत्नेन देवेशि कर्त्तव्यो ग्रहणे जपः ॥
न तिथिर्नामगोत्रञ्च न च सङ्कल्पमाचरेत् ।
कलिकाले महेशानि यवनो बलवांस्ततः ॥
मत्स्यमांसरताः सर्व्वे य[व]ना मद्यसेविताः ।
अतएव महेशानि य[व]नाः सिध्यते कलौ ॥

5979.

2783. *Puraścaraṇarasollāsatantra.*

Substance, country made paper. 17 × 5½ inches. Folia, 16. Lines, 10 on a page. Extent in ślokas, 400. Character, Bengali. Appearance, fresh. Complete in ten chapters.

Same as above.

5980.

2894. *Puraścaraṇarasollāsatantra.*

Substance, country-made yellow paper. 17½ × 4½ inches. Folia, 23. Lines, 5 on a page. Extent in ślokas, 400. Character, Bengali. Date, B.S. 1276. Appearance, fresh. Complete in eight chapters.

The present MS runs up to the end of the 8th Paṭala.

Post Colophon :—

श्रीहरिहरब्रह्मभ्यां श्रीश्रीदुर्गाशरणम् । सन १२७६ साल २२ वैशाख मङ्गलवार ।

5981.

2900. फेत्कारिणीतन्त्रम् । *Phetkāriṇītantra.*

Substance, country-made yellow paper. 17 × 4 inches. Folia, 40. Lines, 6 on a page. Character, modern Bengali. Extent in ślokas, 1,000. Appearance, fresh. Incomplete at the end.

The work which deals with the black rites of Tantra like *māraṇa*, *uccāṭana*, etc., has been published in 20 chapters in the *Tantrasaṅgraha* and *Sulabhatantraprakāśa*. VSP (p. 39) notices a MS of the work which has 22 chapters.

Chapters are not indicated by numbers in the present MS. It generally agrees with the printed editions up to Fol. 7 A where the 13th chapter of the printed editions almost reaches its end.

5982.

8476. परानन्दमतम् । *Parānandamata.*

Substance, country-made paper. 7½ × 3½ inches. Folia, 1-18 of which Fol. 5, 9, 11, 13, 15, 16 are missing. Lines, 6 on a page. Extent in ślokas, 70. Character, modern Nāgara. Appearance, fresh. Complete.

The work deals with the views of the Parānanda school of the Tantras.

Beginning :—

श्रीः विघ्नेशं भैरवं शक्तिं विष्णुं सूर्य्यं महेश्वरम् ।
भक्तेषु वात्सल्ययुतान् नमाम्येतान् पुनः पुनः ॥
आचार्य्यं परमानन्दं नमामि च जगद्गुरुम् ।
शिष्यतापप्रहर्त्तारं दातारं सर्व्वसम्पदां ॥
देवानन्दं च तच्छिष्यं नित्यानन्दं तु भ्रातरं ।
सिद्धांश्च ह्युत्तमाचारान् उत्तराचारदीक्षितान् ॥

नारदादीनगस्त्यादीन् वामाचारस्थितान् मुनीन् ।
वशिष्ठादीन् मुनिवरान् दक्षिणाचारदीक्षितान् ॥
नमामि परमानं[द]मतस्थान् ऋषिपुंगवान् ।
मतानि च बहून्यत्र तामसादिप्रभेदतः ॥
वेदाप्रामाण्यवादीनि तन्मतस्था नराः क्वचित् ।
तमोमुख्यानि तेष्वेव नास्तिकानां मतानि च ॥
कुर्व्वतश्चैव धर्म्मं स्वं यथोक्तं मतभावितं ।
क्वचिज्जन्मनि ते यान्ति वेदप्रामाण्यवादिषु ॥
जैमिन्याद्यास्तिकानां च राजसेषु मतेषु च ।
तत्रापि पण्यपञ्चानां सम्प्राद्यादीन् प्रयत्नतः ॥
परानन्दमते चास्मिन् सर्व्वोत्कृष्टोत्तमे शुभे ।

इति उपोद्घातप्रकरणम् ॥

परानन्दमतं वक्ष्ये त्रैलोक्येपि सुदुर्लभं ।
परमात्मा चेश्वरश्चेति जीवश्चेति पृथक् पृथक् ॥ १ ॥
नित्यानन्दः सुरूपी च दिव्यश्चेश्वरभावितः ।
ईश्वराणां स्वभक्तानां निग्रहानुग्रहक्षमः ॥ २ ॥

इति परमात्मवर्णनम् ।

तस्य लोको महान् दिव्यः परमानन्दसंज्ञकः ।
यत्र गत्वा न यात्यत्र पुनः संसारमण्डले ॥ ३ ॥
मुक्ताश्च चेश्वरा यत्र रमन्ते च यथासुखं ।
यत्र ध्यानासक्तचित्ता ह्यनिर्देश्यश्रिया युताः ॥ ४ ॥

इति परमानन्दलोकवर्णनम् ॥

ज्ञानवान् पुरुषोयं कर्त्ता सकलकर्म्मणां ।
मनसा च समायुक्तः तत्तदिन्द्रियसौख्यदृक् ॥ ५ ॥
पापं कुर्व्वन् नरकगः पुण्यं कुर्व्वन् हि स्वर्गगः ।
कुर्व्वन्त्युपासनामैक्यीं तत्तदीशस्य लोकगः ॥ ६ ॥
एतेन लक्षणेनैव युक्तजीवाद्यसंख्यकाः ।

इति जीवलक्षणम् ॥

परानन्दैकदेशस्तु स्वानन्दस्येत्युदाहृतः ॥ ८ ॥
कृतपापान् दुराचारान् कृतपुण्यांस्तथैव च ।
आगते प्रलये ह्येतान् सानन्दे स्थापयत्यसौ ॥ ९ ॥
वैष्णवा विष्णुना सार्द्धं गच्छन्ति परमं पदम् ।
स्वेन स्वेनेष्टदेवेन गच्छन्ति परमं पदम् ॥ १० ॥
परमात्मा कदाचित् स ब्रह्माण्डमसृजत् प्रभुः ।
कृतायुतास्त्र मेध्यं तु जीवसानन्दसंस्थितं ॥ ११ ॥
सर्गस्य कारणं देवं ब्रह्माणमकरोत् परः ।
पुण्यभावो यथा यस्य तथा तस्मै ददौ ततः ॥ १२ ॥
विष्णुत्वं वा शिवत्वं वा परमात्मा भक्तभावितः ।
जगत्यस्मिन् शून्यमये ह्यागता ईश्वरास्तु ये ॥ १३ ॥
ध्यायन्तस्ते परवपुः जपन्तः परमं मनुं ।
नीत्वा तु कतिचित् कालान् ब्रह्मा ब्राह्ममवासृजत् ॥ १४ ॥
लोकं दृष्ट्वा तु दुष्प्रेक्ष्यं तपसा दिव्यमुत्तमम् ।
चक्रुर्नवकनवकं लोकमेवं ईशास्तपोन्विताः ॥
तत्र स्थित्वा ब्रह्मदेवस्त्रीन् लोकानसृजत् प्रभुः ॥ १५ ॥
आकाशाद्वायुमसृजत् वायोरग्निं चकार सः ।
चकारैवं त्रिलोकीं तां पुण्यापोचितां दृढां ॥ १६ ॥
तस्यां प्रवेशयामास जीवान् सानन्दसंस्थितान् ।
पापान् जीवांस्तु ब्राह्मस्थस्तिर्य्यग्योन्यामपातयत् ॥ १७ ॥
राजसान् मानुषे ब्रह्मा सात्त्वान् दैवे ह्यपातयत् ।
सृष्टेषु त्रिषु लोकेषु पञ्चतत्त्वात्मकेषु च ॥ १८ ॥
अग्न्यादिभ्यो हि देवेभ्यः ह्यधिकारान् ददौ प्रभुः ।
विष्णुस्तु पालयामास चोज्जहार तथा शिवः ॥ १९ ॥

Some of the characteristics of the school will be noticed in the extracts quoted below :—

5A. तदोचुस्ते वशिष्ठाद्याः कुरु शिष्यान् कृपानिधे ।
आचार्य्यः परमानन्दस्तदोवाच महामुनीन् ॥

इयानेव विशेषोक्ति मन्मते मुनिसत्तमाः ।
न न्यासो न च हिंसास्ति जङ्गमस्य जडस्य वा ॥
तदोचुर्मुनयः सर्व्वे यज्ञे हिंसाः श्रुताः शिव ।
शिव उवाच ।
अतएव मया प्रोक्तं मन्मते नास्त्यदो द्वयं ।
भाषणं त्रिविधं लोके युक्तं योज्यं च योजितं ॥
यदुक्तं गुरुणा वाक्यं सत्यमित्यवधारयेत् ।
न तत्र तर्कः कर्त्तव्यो न युक्तिर्नाथ नौचितिः ॥
यद् यद् ब्रूयाद् गुरुः साक्षात्तत्तत्कुर्य्यादसंशयी ।
इदं तु भाषणं युक्तं द्वितीयं परिकथ्यते ॥
अन्यर्थकं तु योज्यं स्याद्योजितं विजिगीषवः ।
कुर्व्वन्ति भाषणं विप्रा वादिनो वादतत्पराः ॥
न युष्माभिर्मया योज्यं योजितं नापि भाष्यते ।
मया युक्तं भाषणं तु क्रियते सर्व्वदैव हि ॥
श्रोतव्यं चेत् प्रगृह्णध्वं भो नो चेद् गच्छत मा चिरं ।
इत्युक्ता मुनयः सर्व्वे ववन्दुः पादपङ्कजम् ॥
10B, परमानन्दमतप्राप्तिर्यावन्नैवोपजायते ।
तावन्ग्रामो यज्ञविधौ जंगमस्य च हिंसनं ॥
परमानन्दमते प्राप्ते न [च] कुर्य्यात्त्विदं द्वयं ।
भृत्यन्तवर्त्तिनामेव ह्यधिकारो मते मम ॥

End :—

वानप्रस्थोपद्रवकर्त्तृन् वन्यान् हिंस्रान् जन्तून् व्याघ्रादीन् हन्यादेव राजा । तानेव हिंस्रान् कात्यग्रे बलिदानविधिना क्षित्त्वा वह्निं समर्पयेत् काल्यै वा । ... ... इत्युक्तौ वसिष्ठसुदर्शनाभ्यां पूजितोन्तर्दधे शिव इति ।

... ...

परमानन्दमतस्थस्तु यः पठेत् सुसमाहितः ।

क्षत्स्नं तु स्वमतं ज्ञात्वा स्वेष्टलोकं व्रजेत्सुधीः ॥
अनेन प्रीयतां देवी महाकाली सुरार्चिता ।

There is no division into chapters in this MS.

5983.

3387. भूतशुद्धितन्त्रम् । *Bhūtaśuddhitantram.*

Substance, country-made paper. 19½ × 4¼ inches. Folia, 19. Lines, 8 on a page. Extent in ślokas, 750. Character, modern Bengali. Appearance, fresh Complete.

This and the following MS have 17 chapters each. VSP (p. 43) notices a MS of this work which has 13 chapters.

Beginning :—

ॐ नमः कालिकायै ।

श्रीदेव्युवाच ।

देवदेव महादेव सम्यतं कथय प्रभो ।
भूतशुद्धिं देहशुद्धिं प्राणायामं ततः परम् ॥
क्रमेण कथ्यतां देव मूलपाणे पिणाकधृक् ।
मन्त्रं तन्त्रं महादेव येन शुध्यति भूतले ॥

ईश्वर उवाच ।

कथयामि वरारोहे खञ्जनाक्षि शुचिस्मिते ।
तत्त्वत्रयं प्रवक्ष्यामि गुह्याद् गुह्यतमं महत् ॥

[illegible] विविधा मुक्तिः काश्यां निर्व्वाणमुत्तमम् ।
[illegible]प्नात्तत्र म्रियन्ते यैश्च जन्तुभिः ।
[illegible] शिवतां प्राप्यते क्षणात् ॥

[illegible] सप्तदशः पटलः ।

5984.

4611. *Bhūtaśuddhitantram.*

Substance, country-made paper 19 × 4 inches. Folia, 1 28 Lines, 8 on a page. Extent in Slokas, 700 Character, Bengali Appearance, fresh. Incomplete.

The present MS runs up to the end of the 16th Patala, which is followed by the beginning of the 17th Patala devoted to the praise of the work.

5985.

3188. मायातन्त्रम् । *Māyātantram*

Substance, country-made yellow paper 14 × 5½ inche Folia, 12 Lines, 12, 13 on a page. Extent in Slokas, 132 Character, Bengali Date, B.S. 1287. Appearance, fresh Complete in 12 chapters

The present MS contains chapters I XII. The manuscript of the work described in L. I. 214 runs up to the 7th chapter. HPR. I. 285, which also bears the same name, appears to be a quite different work.

Beginning.

श्रीश्रम उवाच ।

पृच्छा देवि प्रवक्ष्यामि तत्त्वमन्यद् यथा पु॥ ।
तोये व्याप्ते तु सर्व्वत्र स्वर्गे मर्त्ये ऽमातले ॥
विश्वे चैकार्णवीभूते न सुरासुरमानवाः ।
नैव क्षितिर्न वा किञ्चित्तोयमात्रावशेषतः
तदा विश्वम्भरो देवात् सिसृक्षा म
ध्यात्वा स्वर्गादिमर्त्ये

67340
LOOK IN THE VOUCHER NO. T.....
FOR SEVEN DAYS.
Signature
Date.....20

विचचार तदा तोये स्वेच्छाचारः स्वयम्भुः ।
विचरन्तं वटदले तोयेषु परमेश्वरम् ॥
वटवृक्षस्थितस्तत्र मार्कण्डेयो महामुनिः ।
ददर्श्व परमेशानं शिवमव्यक्तरूपिणम् ॥
तुष्टाव स तदा हृष्टो मुनिः परमकारणम् ।
नमस्ते सर्व्वदेवेश ... ...
... ...
इति स्तुत्वा मुनिस्तत्र विरराम सुसंयतः ।
कृताञ्जलिपुटो भूत्वा दण्डवत् प्रणपात च ॥
तत उत्थाय देवेशं नाभिपद्मसमुद्भवम् ।
चतुर्वर्णं चतुर्वक्त्रं ददर्श्व परमं शिवम् ॥
सृष्टौ नियोजयामास तं ब्रह्माणं सुरेश्वरम् ।
ध्यात्वा ब्रह्मा तदा तत्र सप्तर्षीन् परमेश्वरि ॥
जनयामास मनसा मानसास्ते ततः प्रिये ।
विना शक्तिं न शक्तास्ते सृष्टिं कर्त्तुं महेश्वराः ॥
योनौ सृष्टिरतो ज्ञेया ततो योनिमकल्पयत् ।
ततः कश्यपनामानं मुनिं पुनरजीजनत् ॥
पुनः सृष्टौ च तं पुत्रं ब्रह्मा प्रोवाच यत्नतः ।
जनयामास ततः कन्यां रूपयौवनमन्वितां ॥
नियोज्य मुनये तां तु ब्रह्मा प्रोवाच सृष्टये ।
नानायोन्याकृतिस्तास्तु समस्ता जीवजातयः ॥
उत्पादयामास तदा प्रजापतिरखण्डितः ।
ततो नारायणो देवस्तुष्टो मायामुवाच सः ॥
वटपत्रस्वरूपा त्वं यतो मां विश्रताभसि ।
अतो धर्म्म-स्वरूपासि जगत्यस्मिन् सनातनि ॥
आराधयिष्यन्ति भुवि मनुजास्त्वां सनातनीं ।
सर्व्वकामेप्सवो लोके मायाधर्म्मस्वरूपिणीम् ॥

मन्त्रमाराधने चास्याः प्रवक्ष्यामि पृथग् प्रिये ।
नादेन्दुसंयुतं दान्तं धर्म्माय ङ्च तत्परम् ॥
षडक्षरो महामन्त्रो धर्म्ममाराधने मतः ।
यं कामं समनुद्दिश्य पूजयिष्यन्ति मानवाः ॥
अचिरादेव लभ्यन्ति सर्व्वकामं न संशयः

So it proceeds to give the different mantras and different modes of worship of Māyā on particular occasions.

8A. एष्वीम्रतुमतौ वीक्ष्य सङ्क्रमं यदि नित्यशः ।
जपेदेकाग्रमनसा कुलपूजारतः सुधीः ॥
आषोडशदिनं यावत् वाक्पतिर्भवति ध्रुवम्
मधुपानरतो रात्रौ चन्द्रबिम्बं प्रपूज्य च ॥
पुनः पुनः साधकाग्रो भवेत् कविवरः क्षणात् ।
मर्द्दयन् गिरियुगं देवि तत आलिङ्ग्य यत्नतः ॥
एवमष्टोत्तरशतं कृत्वा धनपतिर्भवेत् ।
कुण्डगोलोद्भवं पुष्पं समादाय प्रयत्नतः ॥
निवेदयेन्महादेव्यै प्रसादं तिलकं चरेत्
घृताभिमन्त्रितं कृत्वा मोहयेदखिलं जगत् ॥

Curiously enough, it gives mantras to be used by Yavanas as well.

8A, कलिकाले तु देवेशि यवना बलवत्तराः ।
मत्स्यमांसरताः सर्व्वे सर्व्वदा मद्यसेविनः ॥
अनाचाररतास्तेन सिध्यन्ति यवनाः कलौ ।
यवनानां महेशानि यक्षराजो ब्रह्मरूपिणी ॥
निगदामि वरारोहे सावधानावधारय ।
कलावतो समुद्धृत्य रङ्किणी तदनन्तरम् ॥
रतिबीजान्वितो देवि ततस्तु कद्रयोगिनीम् ।
एषा तु यक्षराजी विद्या यवनेषु प्रतिष्ठिता ॥

संयुक्तैषा यदा विद्या तदैवैकाङ्गगी भवेत् ।
साचारा ब्राह्मणाद्यास्तु सिध्यन्ति बज्रकालतः ॥
अनाचाराः प्रणश्यन्ति सत्यमेतन्न संशयः ।
उपायाः ब्राह्मणादीनां तेनोक्ताः शतशो मया ॥
सिध्यन्ति तैर्यथोक्तेन नियमेश्च यथाविधि ।

End :—

12A, इदानीं शृणु देवेशि पूजाधारं विशेषतः ।
जले यन्त्रे शिलायान्तु वि[न्व](ह्न)मूले घटोपरि ॥
लिङ्गे योनौ महापीठे शून्यागारे चतुष्पथे ।
कुट्टनीगृहमध्ये च कदलीमण्डपे तथा ॥
पुष्पयुक्ते भगे देवि गणिकागेहमध्यतः ।
महारण्ये प्रान्तरे च शवे च शक्तिसङ्गमे ॥
पञ्चानन्दपरो भूत्वा साधयेत् सकलेप्सितान् ।
यं यं कामयते कामं तं तं प्राप्नोति निश्चितम् ॥
नूनं तद्गृहमागत्य कुबेरो दीयते वसु ।
वातस्तम्भं जलस्तम्भं गतिस्तम्भं विवस्वतः ॥
वह्नेः सत्यं करोत्येवं महामाया प्रसादतः ।
नासाध्यं विद्यते तस्य त्रैलोक्येपि च सुन्दरि ॥
योनिकुण्डे हुते होमे साक्षाद्वज्राधरो भवेत् ।
पूजास्थाने कामबीजं लिखित्वा शिवयोजनात् ।
कवचं प्रपठेद्यस्तु शतावृत्तं सुरेश्वरि ॥
वाग्मी भवति मासेन सत्यं सत्यं न संशयः ।
अचिराल्लभते देवि कवितां मुखशालिनीं ॥
मोदते सर्व्वलोकेषु शिववत् परमेश्वरि ।
इति ते कथितं देवि सर्व्वतन्त्रेषु गोपितम् ॥

The Last Colophon :—

इति मायातन्त्रे हरपार्व्वतीसंवादे द्वादशः पटलः ।

Post Colophon :

इति सन १२८७ तां कार्त्तिक माह संक्रान्तिदिवसे ग्रन्थः समाप्तः ।

5986.

181. *Māyātantram.*

Substance, foolscap paper 15×4 inches. Folia, 10 Lines, 7, 9 on a page. Extent in ślokas, 200. Character, Bengali Appearance, fresh. Complete.

The present MS contains chapters I VII.

5987.

193. उत्तरतन्त्रे पुरश्चरणविवेकः । *Puraścaraṇaviveka from the Uttaratantram.*

Substance, country made yellow paper Folia, 3 Lines, 6 8 on a page Extent in ślokas, 63 Character, Bengali Appearance, old Complete

According to the colophon this MS contains the first chapter of the Uttaratantra. The present MS is described in L. I, 460.

5988.

139. ब्रह्मज्ञानमहातन्त्रराजः । *Brahmajñāna-mahātantrarāja.*

Substance, yellow country-made paper Folia, 17 Lines, 11 on a page. Extent in ślokas, 340. Character, Bengali Complete. Appearance, old. Complete in six chapters

This MS has been noticed in L. I, 408. The work is also noticed in L. II, 642 and in VSP (p. 40). It speaks of the knowledge of Brahman in the manner of a Tantra, *e.g.*, in the form of an interlocution between Śiva and Pārvatī.

5989.

4628. *Brahmajñānamahātantrarāja.*

Substance, country-made paper. 13½ × 5 inches. Folia, 10. Lines, 8 on a page. Extent in ślokas, 200. Character, Bengali. Appearance, fresh. Complete in two chapters.

Same as above.

5990.

5973B. **ब्रह्मसन्धानम् ।** *Brahmasandhānam.*

Substance, country-made paper. 11 × 5½ inches. Fol. 17B–104. Lines, 11 on a page. Character, Nāgara. Extent in ślokas, 1,400. Appearance, old. Complete.

This is a yogic text.

Beginning :—

17B, अथ ब्रह्मसन्धानं लिख्यते ।

ॐ नमः कमलदलविपुलनयनाभिरामाय श्रीरामचन्द्राय नमः ।

नमः सूर्य्याय परमहंसाय लेखकस्य नेत्ररोगनाशकायेति शुभम् ॥

ॐ नमो भगवते वासुदेवायेति ।

ॐ यया लिप्तदेहस्य त्रैलोक्याद्भाग्यसम्पदः ।

तत्प्रभावत् प्रतिभासन्ते ब्रह्मलक्ष्मीं नमाम्यहम् ॥

स्कन्द उवाच ।

वेदवेदान्तसांख्यं वै स्मृतिसिद्धान्तमेव च ।

सर्व्वं मे विदितं चैव ब्रह्मसन्धानवर्ज्जितम् ॥

ईश्वर उवाच ।

शरीरं प्रथमं ज्ञात्वा धातुसाम्यं समं शुभम् ।

पश्चाद्गृह्णीत योगीन्द्रो योगोपकरणानि च ॥

पू[र]कं कुम्भकं चैव रेचकञ्च तथैव च ।

एते शरीरसाम्येन सम्भवन्ति हि योगिनाम् ॥

नाड्यः पवनाग्रन्थिर्धातवः कारणमेव च ।
धातुसाम्ये स्थिते वत्स भवन्त्येतानि सङ्गताः ॥

Colophons of the different chapters :

19B, इति ब्रह्मसन्धान उत्क्रान्तिनिर्णयो नामः प्रथमः पटलः ; 21A, ०चिस्थानावस्थितब्रह्मनिर्णयो नाम द्वितीयः पटलः ; 22A, ०प्राणनिर्णयो नाम तृतीयः पटलः ; 22B, ०अयनद्वयनिर्णयो नाम चतुर्थः पटलः ; 23A, ०सूर्य्य विचारो नाम षष्ठः पटलः ; 23B, ग्रहणनिर्णयो नाम सप्तमः पटलः ; 24A, ०द्वादशान्तविचारो नामाष्टमः पटलः ; ०स्थूलब्रह्मनिर्णयो नाम नवमः पटलः , 24B, ०निष्पपञ्चसमरसो नाम दशमः पटलः ; 25B, ०भूतोत्पत्तिविचार निर्णयो नाम एकादशपटलः ; 26A, ०भूतप्रलयो नाम द्वादशपटलः ; 28A, ०प्राणोत्पत्तिविचारनिर्णयो नाम त्रयोदशपटलः , 28B, ०स्त्रीपुरुषोत्पत्तिवीर्य्य विचारनिर्णयो नाम चतुर्दशपटलः ; 29A, ०बीजोत्पत्तिविचारनिर्णयो नाम पञ्चदशपटलः ; 31A, ०निजोत्पत्तिविचारनिर्णयो नाम षोडशः पटलः ; 31B, ०धातूत्पत्तिविचारनिर्णयो नाम सप्तदशः पटलः ; 32B, ०शरीरावयवसंख्या-निर्णयो नाम अष्टादशपटलः ; 33A, ०ब्रह्मवैषम्यविचारनिर्णयो नाम एकोनविंशः पटलः ; 34A, ०परब्रह्मनादोत्पत्तिविचारनिर्णयो नाम विंशतितमः पटलः ; 35A, ०कालविचारनिर्णयो नाम एकविंशतितमः पटलः ; 36B, ०शक्त्युदयविचार निर्णयो नाम द्वाविंशः पटलः ; 37A, ०इष्टोपदेशविचारनिर्णयो नाम त्रयो विंशतितमः पटलः ; 38A, ०शिवतीर्थविचारनिर्णयो नाम चतुर्विंशतितमः पटलः ; 38B, ०ध्याननिर्णयो नाम पञ्चविंशः पटलः ; 40B, मानसपूजाविचारो नाम षड्विंशतितमः पटलः ; 41A, ०जपविधाननिर्णयो नाम सप्तविंशतितमः पटलः ; 42A, ०अग्निपूजाविचारनिर्णयो नामाष्टाविंशः पटलः ; इति महाज्ञान-परम-रहस्य-चतुर्दशविधभूतसर्ग लयोत्पत्तिविचार सिद्धान्तकुलज्ञान ब्रह्मसंधानं समाप्तम् ।

Titles appearing on the upper ends of the margin of every folium (*Brahmasandhāna* on the left and *Kumārī-kalpa* on the left) of the subsequent portion of the MS (Fol. 42B–104) would seem to represent it as a part of the

Brahmasandhāna or *Kumārīkalpa*. The contents, however, show that we have here extracts from six Tāntrika works as will appear from the descriptions given below :—

I. Kumārīpūjā (Fol. 42–48) which quotes from Saṅkarṣaṇatyāmala, Viśvabhairava, Pātālapiṅgala, etc.

48B, इति कुमारीपूजाविधिसंग्रहः समाप्तः।

II. Uddhārakośa (Fol. 49-72) by the sage Dakṣiṇāmūrti which quotes from works like Tripurātilaka, Āgamālaṅkāra, Chinnāśiromaṇi, etc.

Colophons of the different chapters :—

52A, दक्षिणामूर्त्तिविरचिते उद्धारकोश-सर्व्वागमसारे दशविद्या-मन्त्रोद्धार-कोशगुणाख्यानं नाम प्रथमः पटलः ; 55B, इति श्रीदक्षिणामूर्त्तिविरचिते उद्धारकोशे सर्व्वागमसारे षट्देवीमन्त्रोद्धारकोशसूचको नाम द्वितीयः कल्पः ; 60B, ०सप्तविद्या-सप्तकुमारकोशाख्यानं नाम तृतीयः कल्पः ; 62B, ०नवग्रह-मन्त्रोद्धारकोशाख्यानं नाम चतुर्थः कल्पः ; 66A, ०सर्व्ववर्गकोशाख्यानं नाम पञ्चम-कल्पः ; 72B, सर्व्वागममन्त्रसागरे सप्तमः कल्पः ; समाप्तोऽयं उद्धारकोशः।

III. Durgārahasya (Fol. 72–84).

Colophons of the different chapters :—

74B, इति श्रीदुर्गारहस्ये मन्त्रविद्याप्रकाशो नाम प्रथमः पटलः ; 75A, ०द्वितीयः पटलः ; 75B, ०तृतीयः पटलः ; 77A, ०चतुर्थः पटलः ; 78B, ०पुरश्चर्य्याविधिर्नाम पञ्चमः पटलः ; 79B, ०मन्त्रविद्याप्रकाशो नाम षष्ठः पटलः ; 81A, ०सप्तमः पटलः ; 82A, ०चक्रपूजाविधिर्नाम अष्टमः पटलः ; 83A, ०नवमः पटलः ; 84B, इति श्रीरुद्रयामले तन्त्रे दुर्गारहस्ये मन्त्रप्रकाशो नाम दशमः पटलः। सम्पूर्णोऽयं दुर्गारहस्याख्यस्तन्त्रराजश्चेति। शिवम्।

IV. Matsyodara Tantra (Fol. 85–96) which deals with yoga.

Beginning :

85A, ॐ श्रीदेव्युवाच ।

श्रुतं देव मया सर्व्वं यामलं ब्रह्मयामलम् ।

कीदृशन्तु भवेज्ज्ञानं सकलं निष्कलं तथा ॥

कीदृशन्तु भवेत्तीर्थं प्रणीतस्थन्तु भैरव ।

एतत्पृच्छाम्यहं देव सारं विज्ञानमुत्तमम् ॥

Colophon : —

96A. इति श्रीपरमरहस्यं सर्व्वागमोद्भूतमात्मामृतं मत्स्योदरतन्त्रं नाम योगशास्त्रं समाप्तम् ।

V. प्राणाग्निहोत्रतन्त्र which is also a work on yoga (Fol. 96–102).

Beginning :

श्रीकार्त्तिकेय उवाच ।

अल्पवित्ता नरा ये च अग्निहोत्रं न कुर्व्वते ।

तेषां प्राणाग्निहोत्रन्तु प्रसादं कुरु सुलभम् ॥

प्रणीरेऽस्मिन् कृत्वाग्नय(?) को यजमानः का पत्नी, क ऋत्विक्

... ...

ईश्वर उवाच ... ...

अस्मिन् प्रणीरे समाग्नयो भवन्ति ।

मुखे चाहवनीयोग्निर्दक्षिणाग्निर्मनःस्थितः ।

हृदये गार्हपत्योऽग्नि र्नाभ्यामौपसदः स्मृतः ॥

Colophon :—

102A, इति शिवभट्टारकेण कुमारस्य कथितं प्राणाग्निहोत्रं तन्त्रं समाप्तम् ।

VI. Rudrākṣa Kalpa which speaks of the origin of Rudrākṣa and the religious merit resulting from wearing rosaries made of it (Fol. 102–104).

Beginning :—

ॐ देव्युवाच ।

मम विस्मयमुत्पन्नं रुद्राच्चस्य तु सम्भवम् ।
दर्शनात् स्पर्शनाद्वापि किं पुण्यं धारणादपि ॥

Colophon :

इति रुद्राच्चकल्पः तन्त्रोक्तः समाप्तः ।

शुभमस्तु लेखकपाठकयोः । गुरवे श्रेयोऽस्तु ॥

5991.

4649. पिच्छिलातन्त्रम् । *Picchilātantram.*

Substance, country-made paper. 19 × 4 inches. Folia, 7. Lines, 7 on a page. Extent in ślokas, 190 Character, modern Bengali. Appearance, discoloured. Incomplete.

This MS runs up to the end of the 12th chapter. The colophons represent this to be the first part (Pūrva-kh' aṇḍa) of the work. According to the post-colophon / tement the 13th chapter was deliberately not copied it dealt with what is called *bhūtaśuddhi*. The work is described in L. I, 295 and L. VI, 2188 which contain 21 and 14 chapters respectively. It deals principally with the worship of Kālī and incidentally gives incantations for various magic rites.

Last Colophon :—

इति पिच्छिलातन्त्रे पूर्व्वखण्डे द्वादशः पटलः ।

Post Colophon Statement :

त्रयोदशपटलोऽत्र न लिखितः भूतशुद्धिप्रसङ्गात् । ॐ नमो दुर्गायै । ॐ विश्वेश्वराय नमः ।

5992.

3153. निबन्धमहातन्त्रम् । *Nibandhamahātantram.*

Substance, country-made yellow paper. 16 6 inches Folia. 314 Lines, 8 on a page. Extent in slokas, 7,838 Character, Bengali. Appearance, fresh. Complete.

The present MS has been described in L. X. 1265. The work consists of two parts. The first part in 87 chapters is divided into two kalpas Sārasvatakalpa (chapters 1–82) and Śyāmākalpa (chapters 83 87). The second part in 33 chapters is divided into five kalpas - Māheśa° (chapters 1 9), Gāṇeśa° (chapters 10 18), Vaiṣṇava° (chapters 19–25), Saura° (chapter 26) and Śākta° (chapters 27–33).

5993.

3456. आचारसारतन्त्रम् । *Ācārasāratantram.*

Substance, country-made paper 15 3½ inches Folia. 9 Lines, 8 on a page. Extent in slokas, 278 Character, Bengali Appearance, fresh. Complete in 5 chapters.

The work is called by different names in different places. In the beginning of the present MS it is called Mahācīnatantrakrama (अथ महाचीनतन्त्रक्रमो लिख्यते)। The last colophon (इत्याचारसारे महारहस्ये श्रीपार्वतीशिवसम्वादे चीनाचार महातन्त्रे पञ्चमः पटलः) calls it Cīnācāra and states that it forms part of the Acārasāra. The present MS runs up to the end of the fifth chapter of the work. IO. IV. 2563 contains 7 chapters. The work has been printed in the *Viridhatantrasaṃgraha* in five Paṭalas under the title Mahācīnācāratantra. Several verses given in Chatterji's edition of the work after the end of the fifth chapter are not found in any of the MSS of the work described here.

5994.

1640. *Ācārasāratantram.*

Substance, country-made paper. $9\frac{1}{2} \times 3$ inches. Folia, 28. Lines, 6 on a page. Extent in ślokas, 350. Character, Nāgara. Date, Saṃvat 1856. Appearance, old and worm-eaten. Complete in 7 chapters.

The first seven verses as found in the MS described above as well as in the India Office MS are not found here. The concluding verses of this MS agree with those of the India Office MS. The concluding verses of the three MSS describe below, not found here or in the India Office copy, refer to the greatness of the Kaulas.

Post Colophon :

अनिवेद्य यदा शक्तौ कुलद्रव्यं निवेशयेत् ।
देवताशापं आप्नोति तर्पणं निष्फलं भवेत् ॥
स्वशक्तिं परशक्तिं वा दीक्षितां गुरुमग्रतः ।
पाययित्वा पिबेत् द्रव्यमिति तन्त्रविदो विदुः ॥
सङ्केतं चापि चोन्मत्तं यत्किञ्चित् वीरसाधनम् ।
कुलाचारं विना वत्स नैव सिद्धिप्रवर्त्तकम् ॥

समाप्तश्चायं ग्रन्थः ।

श्रीगुरुः पातु मे नित्यं पातु मे शङ्करः स्वयम् ।
श्रीदुर्गा पातु हृदयं हृदयानन्दरूपिणी ॥

संवत् १८५६ ।

5995.

2893. *Ācārasāratantram.*

Substance, country-made paper. $17\frac{1}{2} \cdot 4\frac{1}{2}$ inches. Folia, 18. Lines, 5 on a page. Extent in ślokas, 324. Character, modern Bengali. Appearance, fresh. Complete in 7 chapters.

The present MS contains Paṭalas I–VII.

5996.

132. *Ācārasāratantram.*

Substance, country-made paper 18 3¼ inches Folia, 5. Lines, 6 on a page. Extent in slokas, 95. Character, Bengali Appearance, old Incomplete.

This MS has been described in L. I. 470. It begins in the middle of the fourth Paṭala and runs up to the end of the seventh. The colophons of Paṭalas IV (fol. 1B) and V (fol. 3B) give the name of the work as Acāratantra.

5997.

4189. मत्स्यसूक्तम् । *Matsyasūktam.*

Substance, country-made paper 19¼ 4 inches Folia, 10 The first leaf is a restoration Lines, 9 on a page Extent in slokas, 650 Character, Bengali Date, Śaka 1695 and B S 1180 Appearance old and discoloured Complete in 10 Patalas

L. II. 608 refers to a work of this name as a compilation and describes a MS which contains chapters 35–60. The old collection of MSS of the Society has a MS (No. I. G. 7) which generally agrees with the MS described in L and contains chapters 35–64 of the Uparibhāga section of the work dealing with *Aśauca*, *Prāyaścitta* and *Vratas* taken from various Purāṇas. The last colophon in the latter MS attributes the work to Halāyudha.

Beginnings and colophons of the different Paṭalas :—

Paṭala I

ॐ नमः कृष्णाय ॥

नन्दवटुक उवाच :

विरूपाक्ष महायोगिन् सर्व्वतत्त्वविहित व त ।
तासायाः परमं कल्पं गुह्यं कथयस्व मे ॥

किं हृत्वा तु चतुर्व्वक्त्रं दृष्ट्वा दत्तं महानिधिं ।
तत्त्वेन कथय त्वं मे त्वत्प्रसादात् पटाम्योऽहम् ॥

परमेश्वर उवाच ।

कुल्लुका नाम सा देवी सुप्रभा वज्ररूपिणी ।
शवासना कर्त्तृहस्ता चतुर्बाहुसमन्विता ॥
नीलोदारवपुः श्यामा सर्व्वालङ्कारभूषिता ।
लिखेच्च यन्त्रं मन्त्रं हरिद्राचन्दनेन वा ॥
२A. बलिं दत्त्वा तु सकलं रम्भाषण्डं घृतप्लुतम् ।
शालमत्स्यञ्च पाठीनं गोधामांसमनुत्तमम् ॥
अन्नञ्च मधुना युक्तं बलिं दद्यात्तु मन्त्रवित् ।
न्यासं कृत्वा तथा ध्यानं यन्त्रमुद्रां च यत्नतः ॥
विना यन्त्रञ्च मन्त्रञ्च कवचं मन्त्रशून्यतः ।
... ...
मन्त्रकाले च मतनं भार्य्यां यत्नेन वर्ज्जयेत् ।
वर्ज्जयित्वा विषाकन्यां वर्ज्जयेत्तुलसीदलम् ॥
वर्ज्जयेन्मालतीपुष्पं वर्ज्जयेद्धिङ्गसन्निधिम् ।
पूजाकाले तु संप्राप्ते वासुदेवं स्मरेत्तु यः ॥
पूजाफलं न चाप्नोति नरकं प्रतिपद्यते ।

२B. इति मत्स्यसूक्ते सिद्धाम्बादे महोग्रतारकल्पे परमाद्यः पटलः ।

Patala II :

परमेश्वर उवाच ।

सामान्यकल्पं विधिवत् कथ्यमानमिदं परम् ।
पूजाकल्पं महोग्राया दुर्ल्लभं भुवनत्रये ॥

३B. इति मत्स्यसूक्ते तारकल्पे द्वितीयः पटलः ।

Patala III :—

पराशर उवाच ।

जन्मसंस्कारजं नाम पुत्रे जाते प्रशस्यते ।

मन्त्राक्षरं पूजयित्वा कुल्लुकादितरं शिवं ॥

4A, इति मत्स्यसूक्ते तृतीयः पटलः ।

Patala IV :—

पराशर उवाच ।

यत्र यत्र हि... ... ... ।

प्रदक्षिण-नमस्कारं प्राणं तत्र दीयते ॥

गौरिल उवाच ।

पुरा यदुक्तं विप्रर्षे सर्व्वव्या[धि]विनाशनम् ।

निश्चितं कथितं सर्व्वं विरूपाक्षेण ब्राह्मण ॥

यः पठतीति यथातथ्यं पठणु त्वञ्च मुभक्तितः ।

स्पष्टं निदर्शयेदेव सर्व्वलोकहिते रत ॥

5A, इति मत्स्यसूक्ते नागकन्ये चतुर्थः पटलः ।

Patala V :—

विरूपाक्ष उवाच ।

अथातः संप्रवक्ष्यामि पूजाविधिमनुत्तमम् ।

7B, इति मत्स्यसूक्ते नागकन्ये पञ्चमः पटलः ।

Patala VI :—

विरूपाक्ष उवाच ।

एवं पूजां यथाशक्त्या कृत्वा वै साधकोत्तमः ।

वक्ष्येऽथ मन्त्रं विधिवत् परितोष्य यथा गुरुम् ॥

8A, इति मत्स्यसूक्ते षष्ठः पटलः ।

Paṭala VII :—

परशुराम उवाच ।

विरूपाक्ष महायोगिन् सर्व्वसत्त्वहिते रत ।
सन्देहं मम तं छिन्धि कृपया कृपणप्रिय ॥
एषा विद्या महाविद्या भुक्तिमुक्तिफलप्रदा ।
कृठात् सिद्धिं न सिध्यन्ति साधकाश्च कथं मुने ॥

विरूपाक्ष उवाच ।

महाचीनक्रमावाप्ता तारिणी शीघ्रसिद्धिदा ।
न चेत् सिद्धिं न विन्दन्ति जनाः कल्पशतैरपि ॥

9A. इति मत्स्यसूक्ते सप्तमः पटलः ।

Paṭala VIII :—

अथान्यत् संप्रवक्ष्यामि तारायाः वीरसाधनम् ।
प्रातः शुचिरथाचान्तः सुखासीनो गुरुं स्मरेत् ॥
... ...
ततः सायं श्मशानस्य मृतमानीय साधकः ।
प्रथमेन च बीजेन सर्व्वाङ्गं लेपयेत्ततः ॥

9B, इति मत्स्यसूक्ते अष्टमः पटलः ।

Paṭala IX :—

विरूपाक्ष उवाच ।

अथ भेदान् प्रवक्ष्यामि तारिण्याः सर्व्वसिद्धिदान् ।
येषां विज्ञानमात्रेण जीवन्मुक्तश्च साधकः ॥

10A, इति मत्स्यसूक्ते नवमः पटलः ।

Paṭala X :—

नन्दवटुकपरशुरामावूचतुः ॥
विरूपाक्ष महायोगिन् सम्यग् योगो धृतस्त्वया ।
सम्यक् च कथितो योगो न तारायाः क्रम उत्तमः ॥
किमुच्यते महाबाहो एकलिङ्गं चतुष्पथः ॥

विरूपाक्ष उवाच ।

चतुष्कोणान्तरे यत्र मल्लिङ्गं दृश्यते परम् ।
एकलिङ्गं विजानीयात् तत्र सिद्धिरनुत्तमा ॥
चतुष्पथं विजानीयात् मुक्तास्ते तादृगौषिलाः (?) ।
तत्र यत्नेन गन्तव्यं गन्तव्यं सिद्धिकाङ्क्षिभिः ॥

इति विरूपाक्षविरचिते मत्स्यसूक्ते सिद्धसंवादे मन्त्रोद्धारकल्पे दशमः पटलः ।

Post Colophon :

श्रीगणेशाय नमः ।

लिखितं श्रीमदाप्पिल देवप्पाभट्टेन स्वात्मार्थमिदं मम ११८० माल शाकाब्दाः १६६५

5998.

3190. परमानन्दतन्त्रम् । *Paramānandatantram.*

Substance, European foolscap paper. 13·3 inches Folia, 156 Lines, 5, 6 on a page Extent in slokas, 3,000 Character, Bengali Appearance, fresh Complete in 25 pallavas.

It belongs to the school of Śrīvidyā. The Tantra speaks of itself as deceptive in object. Bhairava is ordered by Śankara to write Tantras with a view to delude the people of the iron age who are given to sensuousness and debauchery, so that they may, through their vicious propensities, be eager to accept the Tantra for their religion and be hurried down into degeneration. The present work does not agree with the *mantrakhanda* section of the work of the same name described in *Mad.*, XII, 5657, 5670–2.

Beginning : -

अनाद्यनन्तमानन्दमप्रतिष्ठं परं शिवम् ।
यदन्तर्भाति तत्त्वानां चक्रं तं प्रणमाम्यहम् ॥

श्रीदेव्युवाच ।

महेश देव देवेश विश्वकारण वल्लभ ।
त्वन्मुखात्तु मया देव तन्त्राणि बहुशः पुरा ॥
वैष्णवानि च शैवानि सौरगाणपतानि च ।
शाक्तान्यनेकरूपाणि विविधाचारकान्यपि ॥
संश्रुतानि तथाप्यद्य परमानन्दसंभवः ।
नैव जातोऽतिगहनभावात्संमिश्रणादपि ॥
तस्मादद्य महादेव सुन्दर्य्यास्तन्त्रमुत्तमम् ।
सुष्ठुं सुव्यवस्थञ्च परमानन्ददायकम् ॥
कृपया वद मे देव यद्यहं तव वल्लभा ।

श्रीभैरव उवाच ।

शृणु देवि प्रवक्ष्यामि सुन्दरीतन्त्रमुत्तमम् ॥
एतत्तन्त्रपराणाञ्च तव चापि महेश्वरि ।
यस्माच्च जायते देवि परमानन्दसंभवः ॥
तस्मात्तन्त्रमिदं प्रोक्तं परमानन्दसंज्ञितम् ।
पुरा कैलासशिखरे प्रोक्तवान् शङ्करः स्वयम् ॥
कदाचिद्देव्यहं तत्र स्थितस्तत्सेवनोद्यतः ।
पराशक्तिसहायस्य चन्द्रचूडस्य पार्श्वतः ॥
तदा विरिञ्चिविष्ण्वीशसेवितः परमेश्वरः ।
ब्रह्मादीनुक्तवान् देव भवन्तः सर्व्व एव हि ॥
नानाविधानि तन्त्राणि नानाकामप्रदानि च ।
कलौ सर्व्वमनुष्याणां कामोपहतचेतसाम् ॥
मोहकानि विचित्राणि कुर्व्वन्तु द्रुतमेव हि ।
एवं महेशेनाज्ञप्ताः स्वयम्भाद्याः प्रणम्य तम् ॥
गतास्ततोऽहमाज्ञप्तस्तेन देवेन शम्भुना ।
त्वं भैरवगणैर्युक्तः कुरु तन्त्राण्यनेकशः ॥
पृथग् नानाविधानीति ततोऽहं प्रणिपत्य तु ।
बद्धाञ्जलिः प्रोक्तवान् तं देवदेवं जगत्पतिम् ॥

भगवन् देव चित्तं मे आतप्राङ्गाकुलस्थितम् ।
तदाज्ञां देहि किञ्चित्त्वां पृच्छामि परमेश्वरम् ॥
ततः परमिवेमाहमाक्षमो वद तत्त्वतः ।
इत्यहमुवाचेशं यत्तच्छृणु महेश्वरि ॥
भगवन् करुणासिन्धुस्त्वं लोकस्य स्थितेः गतः ।
किमर्थं लोकमोहाय आज्ञापयसि पार्श्वगः ॥
अथ देव उवाचेदं शृणु भैरव तत्त्वतः ।
न मे देष्योऽस्ति न परः प्रियोऽस्ति भगतीतले ॥
उदासीनो ह्यमक्रोधं शान्तमूर्त्तिरनुत्तमः ।
मामजानन्त एते वै लोकाः संचितकर्म्मणाम् ॥
नानाविधानां पाकेन भोगेषु नियतं गताः ।
तान् मोहयितुमेवैषा मम वामाङ्गसंगता ॥
स्वातन्त्र्यशक्तिर्मायाख्या महाद्घटकारिणी ।
ममाज्ञारूपमापन्ना ब्रह्मादिषु निविश्य सा ॥
उद्भावयति तत्त्वानि नानाफलयुतानि वै ।
तेषां कर्म्मोपभोगाय पुनः पुनरनेकधा ॥
कलिधर्म्मप्रवृद्ध्यर्थं लोकाः कामपरायणाः ।
दुष्पूरकामलोभेन हतचित्ता दुराशयाः ॥
विषयाभिमुखास्तत्रास्त्रीधनेहाः मदाऽन्धभाः ।
आलोक्य तानि तत्त्वानि मोहात् पण्डितमानिनः ॥
मन्मायापहृतज्ञाना गुरुहीना गुरुद्रुहः ।
तत्तत्तत्त्वमदांधेषु मोहेनान्धीकृता जडाः ॥
अमदांधेष्वेव जनाः प्रवृत्ताः कामनापराः ।
तदाशयमविज्ञाय मृढास्तत्कर्म्मसंगताः ॥
अन्ते तत्कर्म्मपाकेन विकृता बहुधा नराः ।
अन्धं तमो विशन्त्येते सर्व्व एवात्र मानवाः ॥

End : —

अद्वैतविद्यां श्रीविद्यां परमानन्दरूपिणीम् ।
विहाय पुरुषार्थै[न] मृगतृष्णां पिबत्[य]मौ ॥
तस्मादेतत् प्रयत्नेन गोपनीयं महेश्वरि ।
यदिदं पशवे देवि निन्दकाय समर्पयेत् ॥
एतत्तन्त्रं पठन् देवि लिखंश्चापि प्रपूजयन् ।
देवताप्रीतिमाप्नोति पुरुषार्थान् समश्नुते ॥

Colophons of the different chapters :—

2B, इति श्रीमत्परमानन्दतन्त्रे भैरवदेवीसंवादे तन्त्रावतारो नाम प्रथमोल्लासः, 4A, इति श्रीमत्परमानन्दतन्त्रे तन्त्रभेदनिर्णयो नाम द्वितीयोल्लासः; 5B, ०श्रीविद्यास्वरूपकथनं नाम तृतीयोल्लासः; 8B, ०बालामन्त्रोद्धारादिकथनं नाम चतुर्थोल्लासः; 10A, ०बालामन्त्र्यान्तविधिकथनं नाम पञ्चमोल्लासः; 14B, ०हारपूजादिन्यासान्तकथनं नाम षष्ठोल्लासः; 18B, ०सप्तमोल्लासः; 28A, ०अष्टमोल्लासः; 32B, ०नवमोल्लासः; 37A, ०दशमोल्लासः; 41A, ०एकादशोल्लास; 51A, ०द्वादशोल्लासः; 61B, ०त्रयोदशोल्लासः; 76B, ०चतुर्दशोल्लासः; 94B, ०पञ्चदशोल्लासः; 100B, ०षोडशोल्लासः; 107B, ०सप्तदशोल्लासः; 114A, ०अष्टादशोल्लासः; 118A, ०एकोनविंशतितमोल्लासः; 122B, ०विंशतितमोल्लासः; 133A, ०एकविंशतितमोल्लासः; 135B, ०द्वाविंशोल्लासः; 145A, ०काम्यविधिस्त्रयोविंशतितमोल्लासः; 155A, ०चतुर्विंशोल्लासः; 156A (the last colophon) इति श्रीपरमानन्दतन्त्रे भैरवदेवीसंवादे सर्व्वतन्त्रसारे पञ्चविंशोल्लासः समाप्तः ।

5999.

3601. सिद्धलहरीतन्त्रम् । *Siddhalaharītantram.*

Substance, country-made paper. $16\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, marked 1 to 28 on the right hand side, and 190 to 217 on the left hand side. Lines, 5 on a page. Extent in ślokas, 560. Character, modern Bengali. Appearance, fresh. Complete in nine chapters.

The work deals with the details of the worship of Kālī and the mystic significance of the fifty letters of the Sanskrit alphabet. It is generally in the form of an interlocution between Jātūkarna and Nārada though interlocutions between Pārvatī and Śiva as also between Subhagā and Nārada are also occasionally met with. *Gautamī Tantra* is referred to in fol. 11 \ (यन्नोक्तं गौतमीतन्त्रे नान्यतन्त्रेषु तद्वद).

Beginning, giving contents of the work :

जातूकर्ण उवाच

विफलो बीजहीनश्च मान्द्यो ऽस्मित्तस्तथा
मनवस्ते न सिध्यन्ति स्यादृक् प्राब्दघातकी ॥
ब्रह्मणश्च मुखाभाग मदग्रे नाम मे वद

नारद उवाच

प्रफुल्लकलिकाबीजं बीजदयमितोऽधिकम्
रजः-सत्त्व तमोपेतं चन्द्रबिन्दुसमन्वितम् ॥
प्रफुल्लं ब्राह्मणश्रेष्ठ कथितं भक्तितस्तव
कालिका कमलोद्भवा श्रयमिद्धित्वयो गुणाः ।
विशेषश्चात्र वक्ष्यामि यक्ष्यते(?) शिववक्त्रतः
यामलेष्वस्तथा विद्याः शिवो दुर्गा च कालिका ॥
चिपुरा भैरवी लक्ष्मीः] ताराः च बगलामुखी
चतुर्थ्यन्तं नमोऽन्तेन मन्त्रविद्याः पृथक् पृथक् ॥
एतेषां मन्त्रविद्यानां आद्यन्तं मुनिनन्दन
प्रफुल्लं यदि नो विप्र तदपं विफलं विदुः ॥

End :

नवरत्नमहाविद्याः कालिकायाः सुदुर्लभाः
सर्व्वासां चैव विद्यानां भाण्डागं द्वादशाक्षरो ॥
कामराजात् समुद्भूता द्वादशाक्षरको परा
द्वादशाक्षरको चैव नवरत्नादिनिर्गता ॥

द्वाविंशद्भुता विद्या कवचेषु निरूपिता ।
प्रधानां नवलक्षाणां द्वाविंशान्मुनिनन्दन ॥
किं बहूक्त्या महाभाग गच्छामि व्यासमन्निधिम् ।
इत्युक्त्वा प्रययौ शीघ्रं नारदो व्यासमन्निधिम् ॥

After the ninth chapter there occurs an extract (Fol. 27B) in the form of an interlocution between Śiva and Pārvatī. It is not known if this is also a part of the present work.

This section begins as follows:

देव्युवाच ।
देव देव महादेव सर्व्वागमविशारद ।
अधुना देवदेवेश पञ्चाशद्वर्णनिर्णयम् ॥
तत्त्वं रूपञ्च ध्यानञ्च कथयस्व दयानिधे ।

6000.

10608. **नारसिंहकल्पम् ।** *Nārasiṁhakalpam.*

Substance, country-made paper. 10½ 4½ inches. Folia 22. Lines, 9 on a page. Extent in slokas, 591. Character, modern Nāgara. Appearance, fresh. Complete in eight chapters.

It deals with the worship of Nṛsiṁha, a form of Viṣṇu.

Beginning:

ॐ विशुद्धविज्ञानघनस्वरूपं
विज्ञानविश्राणमदत्तदीक्षम् ।
दयानिधिं देहभृतां प्रणेयं
देवं हयग्रीवमहं प्रपद्ये ॥
या वैष्णवी मुखमदद्वयबोधरूपा
भूम्यादिपञ्चकतया बहुधा विभिन्ना ।
तां षोडशा-दितयतत्त्वनृसिंहमूर्त्तिं
तां मूलप्रकृतिममलां प्रणतोऽस्म्युदारां ॥

योऽसौ नित्यविशुद्धनिर्गुण-सदानन्दाद्वयज्ञानभूः
साक्षात्मत्त्वमयीमवाप म हरिः श्रीनारसिंहीं तनुम् ।
मूलाज्ञानतिमिरविनाशनौं कवलय[न्] संसारभीरोऽखिल
क्लेशज्वालनशीतलामृतमयित्यूं सुखायास्तु नः ॥
प्रणिपत्य जगन्नाथं सच्चिदानन्दगुरुं हरिं ।
वक्ष्ये प्रयोगं मन्त्रस्य नृसिंहानुष्टुभः शुभम् ॥
आत्मयोनिं परा देवं नारदः परमेष्ठिनम् ।
पादौ प्रणम्य पप्रच्छ यथावत् परिचर्य्यया ॥

नारद उवाच ।

संसारसागरे घोरे विषयग्राहसङ्कुले ।
जन्ममृत्युजराग्राह-दुःखपूर्णतरङ्गिणि ॥
... ...
अस्मिन् भवार्णवे युष्मद्ध्यानावं दिशाम(ल)ः ।
मनस्वक-मक्षाधन्वे भ्रमन्तं भयविह्वलम् ॥
अनाथमार्त्तं विवस्तं पाहि मां प्रणतागतम् ।
यथाहमस्मात् संसारदनादेरतिदुस्तरात् ॥
आत्मानमुद्धरिष्यामि तथा मे साधु चिन्त्यताम् ।
नो चेत्तं तवैवास्ति त्रिषु लोकेषु किञ्चन ॥
... ...

ब्रह्मोवाच ।

शृणु वत्स महाभाग जन्तूनां दुःखकारणम् ।
समासेन प्रवक्ष्यामि गुह्यं ह्येतदुत्तमम् ॥
यैरनभ्यर्चितो विष्णुः सर्व्वभूतेश्वरेश्वरः ।
कर्म्मणा मनसा वाचा तैरेवं दुःखमाप्यते ॥

Colophons of the different chapters :—

3B, इति श्रीनारसिंहकल्पे वैरिञ्चे प्रथमः पटलः; 6A, इति द्वितीयः पटलः; 8A, इति तृतीयः पटलः; 11B, इति चतुर्थः पटलः; 13B, इति नारसिंहे वैरिञ्चे पञ्चमः पटलः; 16B, इति वैरिञ्चे षष्ठः पटलः; 17B, ०सप्तमः पटलः, 22A इति श्रीनारसिंहे वैरिञ्चे कल्पेऽष्टमः पटलः। समाप्तश्चायं कल्पः।

6001.

1903. देवीरहस्यतन्त्रम्। *Devīrahasyatantram.*

Substance, country-made paper. 10 4 inches. Folia, 25. Lines, 4 on a page. Extent in ślokas, 621. Character, Nāgara. Appearance, old. Incomplete

The present MS as also another one of the same work have been described respectively in L. X. 4160 and HPR. II. 251. In the latter the work is represented as a part of the Rudrayāmala. The work deals with the worship of the Sun-God. For a different work called *Devīrahasya* which is also stated to belong to the Rudrayāmala, cf. No. 5880 above.

The present MS contains five chapters (31st to 35th) of the Devīrahasyatantra.

Colophons of the different chapters :—

5A, इति श्रीदेवीरहस्यतन्त्रे सूर्य्यपटलाख्यं नाम एकत्रिंशत्पटलः।

14A, ०सूर्य्यपूजापद्धतिवर्णनं नाम द्वात्रिंशः पटलः।

16A, ०वज्रपञ्जरकवचव्याख्या नाम त्रियःत्रिंशः पटलः।

23B, ०सूर्य्यनामसहस्राख्यं नाम चतुस्त्रिंशः पटलः।

25A, ०परमार्थस्तोत्राख्यानं नाम पञ्चत्रिंशः पटलः।

6002.

2817. राधातन्त्रम् । *Rādhātantram.*

Substance, country made paper 18½ 3½ inches Folia, 39 Lines 7 to 10 on a page Extent in slokas, 1,500 Character, Bengali Appearance, worm eaten and discoloured Complete in 35 chapters

The *Tantrasangraha* and *Subhāgatantraprakāśa* editions of this Tantra as also the edition of it as published by Kamakhya Nath Mukherji (Calcutta, 1283 B.S.) are complete in 32 Patalas while the present MS as well as the following one are complete in 35 chapters each.

It relates to the Kaula cult as practised by Rādhā and Kṛṣṇa, the company of Rādhā a Śakti, ensuring the success of Kṛṣṇa in his rites. Padmini, the *Dūti* of Tripura-sundarī, is born by command of the goddess as the daughter of Vṛṣabhānu and Śrī Kṛṣṇa accepts her as his Sakti.

6003.

3474. *Rādhātantram.*

Substance, country made paper 11½ 4 inches Folia, 88. Lines, 7 on a page Extent in slokas 1,500 Character, Bengali Date, B.S. 1214 Appearance, discoloured Complete in 35 Patalas

Post Colophon :

तत्र श्रीव्रजमोहन सेनस्य मौः पाचपाडा। सन १२१४ साल १२ कार्त्तिक।

6004.

675. गौतमीयतन्त्रम् । *Gautamīyatantram.*

Substance, country made paper. 13 5 inches Folia, 108. Lines, 6, 8 on a page Extent in slokas, 2,160. Character, Bengali. Appearance, tolerable Complete in 31 chapters.

This is a well-known Vaiṣṇava Tantra which in 34 chapters has been published with a Bengali translation by the Basumati Press of Calcutta (1334 B.S.). The work in 32 chapters has been published in the *Tantrasaṃgraha* and *Sulabhatantraprakāśa*. The present MS contains chapters I–XXXI. The Vaṅgīya Sāhitya Pariṣat MS of the work contains chapters I–XXXII.

6005.

234. गुह्यातिगुह्यतन्त्रे विद्योत्पत्तिः । *Vidyotpatti from the Guhyātiguhyatantram.*

Substance, country-made yellow paper. Folia, 6. Lines, 6 on a page. Extent in ślokas, 138. Character, Bengali. Date, Śaka 1729. Appearance, old. Complete.

The present MS has been described in L. I. 448. The work has also been described in L. I. 334. It deals with the importance and worship of the different forms of Śakti.

Beginning :—

सत्ये काली च श्रीविद्या कमला भुवनेश्वरी ।
सिद्धविद्या महेशानी त्रिशक्तिः कमला शिवे ॥
महाविद्या सत्ययुगे मातङ्गी भैरवी शिवे ।
धूमावती च विद्या स्यात्त्रेतायां शृणु पार्व्वति ॥
काली तारा सुन्दरी च सिद्धविद्या प्रकीर्त्तिता ।
मातङ्गी कमला लक्ष्मीर्महालक्ष्मीः प्रकीर्त्तिता ॥
धूमावती भैरवी च विद्यात्वेन महेश्वरि ।
द्वापरे कालिका तारा रोचनी भैरवी तथा ॥
सिद्धविद्या महेशानि सुन्दरी भैरवी तथा ।
धूमावती महाविद्या मातङ्गी कमला तथा ॥

विद्यात्वेन महेशानि कलौ काली तु केवला ।
काली तारा छिन्नमस्ता महाविद्या कलौ मता ॥
सुन्दरी भैरवी लक्ष्मीर्मातङ्गी भुवनेश्वरी ।
महाविद्या महेशानि धूमा च बगला शिवे ॥
विद्यात्वेन महेशानि कलौ संपरिकीर्त्तिता ।
एवं प्रकृतिभेदेन भेदास्तु प्रकृतिर्दश ॥
प्रकृतिर्विष्णुरूपा स्यात् पुरुषस्य महेश्वरः ।
कृष्णमूर्त्तिः कालिका स्यात् राममूर्त्तिस्तु तारिणी ॥
छिन्नमस्ता नृसिंहः स्यात् वामनो भुवनेश्वरी ।
जामदग्न्यः सुन्दरी स्यात् मीनो धूमावती भवेत् ॥
बाला कूर्ममूर्त्ति स्याद्बलभद्रश्च भैरवी ।
महालक्ष्मीर्भवेद्बुद्धो दुर्गा स्यात् कल्किरूपिणी ॥
स्वयं भगवती काली कृष्णस्तु भगवान् स्वयम् ।

Post-Colophon statement :

शाकाब्दाः १७२६ ।
ग्रहपक्षस्य सप्तम्यां माघे मासे रवेर्दिने ।
विद्योत्पत्तिः सम्पूर्णा शाके सिद्धिप्रदायिनी ॥

6006.

204. **सरस्वतीतन्त्रम्** । *Sarasvatitantram.*

Substance, country-made yellow paper. Folia, 5 Lines, 7 on a page. Extent in ślokas, 153. Character, Bengali. Appearance, old Complete in six chapters.

The work deals with the essential rites connected with *japa* or the muttering of mantras. The present MS, containing chapters I VI, has been described in L. I. 447. L. I. 261 describes another MS of the work. The

work has been edited in six chapters by Girishchandra Vedāntatīrtha and Satischandra Siddhāntabhūṣaṇa (Rajshahi, 1323 B.S.). It refers (Fol. 2A) to *Gaṅgāgama* and *Rudrayāmala*.

6007.

10221. *Sarasvatītantram.*

Substance, country-made yellow paper. 13 × 5¼ inches. Folia, 5. Lines, 14 on a page. Extent in ślokas, 140. Character, modern Nāgara. Appearance, fresh. Complete.

The present MS contains chapters I–VII inclusive. After the seventh Paṭala there are two ślokas regarding Kullukā mantra. The seventh Paṭala deals with *Yonimudrā*; the beginning and end of it run as follows:—

Beginning:—

ईश्वर उवाच।

योनिमुद्राविधानं हि वक्ष्ये तन्त्रानुसारतः।
कृतेन दिनैकेन सर्वपापप्रणाशनम्॥

End:—

सेयं मयोक्ता खलु योनिमुद्रा
बन्धस्तु दैवैरपि दुर्लभोस्याः।
अनेन बन्धेन न साध्यते यत्
नास्तेव तत् साधका दूरत वस्य॥

इति योनिमुद्रा।

6008.

5035. *Sarasvatītantram.*

Substance, country-made yellow paper. 16 × 3½ inches. Folia, 6. Lines, 6 on a page. Extent in ślokas, 140. Character, Bengali. Appearance, fresh. Complete in six Paṭalas.

The work is called *Sārasvatatantra* in the colophons of this MS.

6009.

4618. **कैवल्यतन्त्रम्** । *Kaivalyatantram.*

Substance, country-made yellow paper. 19½ 4½ inches. Folia, 7. Lines, 8 on a page. Extent in ślokas, 168. Character, Bengali. Appearance, fresh. Complete in five Patalas.

The work has been described in L. I. 265. It deals with the use of the *pañcatattvas*, e.g., fish, meat, wine, etc. in the Tantras.

6010.

174. *Kaivalyatantram.*

Substance, country-made paper. 14 3½ inches. Folia, 9. Lines, 6, 7 on a page. Extent in ślokas 162. Character, Bengali. Appearance, old. Complete in five Patalas.

Same as above.

6011.

4188. **कुमारीतन्त्रम्** । *Kumāritantram.*

Substance, country-made paper. 18 4½ inches. Folia, 6. Lines, 8 on a page. Extent in ślokas, 300. Character, Bengali. Appearance, old. Complete in nine chapters.

The present MS has been described in HPR. III. 66. According to the last colophon of the present MS it comprises the first part (Pūrvabhāga) of the work and deals with the worship of Kālī (*Kālīkalpa*).

6012.

5621C. *Kumārītantram.*

Substance, palm leaf. 14 × 1½ inches. Folia, 55 to 68. Lines, 4 on a page. Extent in ślokas, 225. Character, Uḍiyā. Appearance, good. Complete in nine chapters.

Same as above.

6013.

4670. *Kumārītantram.*

Substance, country-made paper. 16 × 6 inches. Folia, 7. Lines, 10 on a page. Extent in ślokas, 300. Character, Bengali. Appearance, discoloured. Complete in nine chapters.

Same as above.

6014.

3453. *Kumārītantram.*

10323. **प्रपञ्चसारसंग्रहः ।** *Prapañcasārasaṃgraha.*

Substance, country-made paper. 7 × 5 inches. Folia, 8. Lines, 10 to 13 on a page. Character, Nāgara. Appearance, old and discoloured. Fragmentary.

The MS contains only the 17th chapter of the work which is an epitome of Śaṅkarācārya's *Prapañcasāra*. Other MSS of the work are described in Ulwar (2231. Extr. 647), CS. V. 50, IO. 2, 6144 and Mad. XV. 7940ff.

Beginning:—

अथ श्रीप्रपञ्चसारसंग्रहे गौर्व्वाणेन्द्रविरचिते सप्तदशः पटलः १७ लिख्यते।

अथ मन्मथविधानमुच्यते।

सम्मोहनऋषिः गायत्रीछन्दः मनोभवदेवता हूं बीजं।

6177.

Lakṣmaṇārya.

2787. शारदातिलकम्। *Śāradātilaka.*

Substance, country-made paper. 9 × 4 inches. Folia, 134. Lines, 10 to 16 on a page. Extent in ślokas, 4,300. Character, Nāgara. Appearance, discoloured. Complete in 25 chapters.

Two very old MSS of the work (one dated Śaka 1427 or 1505 A.D. and the other older still) are reported to be in the Library of the Dacca University (*Indian Antiquary*, 1926, p. 121).

This is one of the most popular Tantrik compilations. The following editions of the work may be mentioned: (1) Rasik Mohan Chatterji's edition published in his *Vividhatantrasaṃgraha*. (2) Litho edition with the commentary of Rāghavabhaṭṭa (Benares, 1886). (3) Arthur Avalon's edition with the commentary of Rāghavabhaṭṭa in two volumes (Calcutta, 1933). (4) Benares Sanskrit Series edition (Benares, 1934).

6178.

2880. *Śāradātilaka.*

Substance, country-made paper. $9\frac{1}{2} \times 4\frac{1}{2}$ inches Folia, 92. Lines, 14, 15 on a page. Extent in ślokas, 4,300. Character, Nāgara. Date, Saṃvat 1810. Appearance, fresh. Complete in 25 chapters.

Post-colophon Statement:—

संवत् १८१०। वैशाखे मासि शुक्लपक्षे दादश्यामिन्दुवासरे तारोपनाम्ना गुणाकरेण लिखितोऽयं ग्रन्थः स्वार्थं परार्थं। तेन श्रीपवननन्दनः प्रीयताम्।

6179.

3809. *Śāradātilaka.*

Substance, palm-leaf. $14\frac{1}{2} \times 2$ inches. Folia, 176 (by counting). Lines, 5 on a page. Character, Bengali. Appearance, old and dilapidated. Incomplete.

6180.

4849. *Śāradātilaka.*

Substance, palm-leaf. $13\frac{1}{2} \times 2$ inches. Folia, 3–240, of which Nos. 4, 5, 66, 70, 71, 75, 78–82, 84, 88, 99, 100, 103, 109, 123, 127, 132, 135, 139, 142, 143, 153 to 157, 162, 163, 165, 167, 168, 173, 176, 177, 191, 216, 226, 232, 233, 238 are missing. Character, Bengali. Date, L.S. 652. Appearance, old and worm-eaten. Incomplete.

Post-colophon Statement:—

लसं ६५२ आश्विन शुदि महानवम्यां तिथौ श्रीभक्तपत्तने सदुपाध्याय श्रीहरिदेवशर्म्मणामाज्ञया श्रीजगन्नाथशर्म्मणः लिखितमिदं पुस्तकमिति।

6181.

9063. *Śāradātilaka.*

Substance, country-made paper. 10 × 4¼ inches. Folia, 2-20. Lines, 10 on a page. Extent in ślokas, 350. Character, Nāgara. Appearance, discoloured. Incomplete.

The MS contains the first two paṭalas, and a part of the third.

6182.

11304. *Śāradātilaka.*

Substance, modern ruled paper bound in book form. 13 × 9 inches. Pages, 1–20 (without any leaf mark) + 1–282 (with writing generally on one side of the paper). Lines, 36–45 on a page. Character, Bengali. Appearance, fresh. Incomplete.

The present MS contains chapters 1–15 and 78 verses of chapter 16. The text is accompanied by the commentary of Śirapāṇi called *Mantrayantraprakāśikā*. A considerable portion of the text including the whole of chapter 5, however, has no commentary.

Beginning of the commentary:—

हयाननं हरिं नत्वा मन्त्रयन्त्रप्रकाशिका ।
शारदातिलके यत्नात् क्रियते शौरपाणिना ॥
इह ग्रन्थारम्भे विघ्नविघातकं देवतास्तवकीर्त्तनरूपं मङ्गलं शतम्
निबध्नाति नित्यानन्देति ।

6183.

5868. *Commentary on the Śāradātilaka by Pūrṇānandāśrama.*

Substance, country-made paper. 10 × 4¼ inches. Folia, 58. Lines, 10 on a page. Extent in ślokas, 1,125. Character, Nāgara. Appearance, discoloured. Complete.

Beginning:—

नत्वा शङ्करमात्मानं पूर्णानन्दाश्रमाभिधः ।
शारदातिलकव्याख्यां लिखति स्वेष्टसिद्धये ॥

The date (1675 V.S.) of composition of the work is recorded at the end, as follows:—

पूर्णानन्दाश्रमेणेदं लिखिता शिवप्रीतये ।
भूतनगकलागण्ये विक्रमार्कात् प्रमाणतः ॥
मार्गशीर्षे पञ्चदिने वासरे बुधसंज्ञिते ।

6184.

5907. *Commentary on the Śāradātilaka.*

Substance, country-made paper. 11¾ × 6 inches. Folia, 113. Lines, 10 on a page. Extent in ślokas, 2,200. Character, Nāgara. Date, Saṃvat 1746. Appearance, fresh. Complete.

It explains selected passages of the Śāradātilaka. The author's name is not given.

Beginning:—

नित्यानन्देति । आगमपक्षे संकेतेन कथयति । अनिग्धं अकारो वासुदेवः । संकर्षणस्तस्याक्षरो हकारः । औकारो निग्धा तत् शशाङ्कयुक्तं अर्द्धचन्द्रयुक्तं तैः । ह्रौं इति प्रासादमन्त्र उक्तः ।

Post-colophon Statement:—

शुभमस्तु । संवत् १७४६ समय फाल्गुन सुदी नवम्यां भृगु-वासरे गङ्गासन्निधौ पुष्यपुरे लिखितमिदं पुस्तकम् प्रसाद-लेखकेन ब्रह्मचारि-बालकृष्णस्य पठनार्थे । शुभमस्तु । सिद्धि-रस्तु ॥

6185.

Ānandatīrtha.

5499. तन्त्वसारसंग्रहः । *Tantrasārasaṃgraha.*

Substance, country-made paper. $9\frac{1}{2} \times 4\frac{1}{4}$ inches. Folia, 16. Lines, 15 on a page. Extent in ślokas, 525. Character, Nāgara. Appearance, discoloured. Complete in four chapters.

A good number of MSS of the work and of commentaries on it are known (Cat. Cat. I. 222, II. 47; HPR. III. 125; IO. 2. 6130). After the fourth chapter a section on what is called *sudarśanahoma* is appended.

The work deals with the details of the worship of Viṣṇu.

Beginning: -

श्रीवेदव्यासाय नमः ।

श्रीमदानन्दतीर्थ-भगवत्पादाचार्य्येभ्यो नमः ।

जयत्यजभवेशेन्द्रवन्दितः कमलापतिः ।

अनन्तविभवानन्दघनज्ञानादिसद्गुणः ॥

विधिं विधाय सर्गादौ तेन दृष्टोऽब्जलोचनः ।

आह देवो रमोत्सङ्गविलसत्पादपङ्कजः ॥

अष्टमेकोऽखिलगुणो वाचकः प्रणवो मम ।

अकारादिति[illegible]न्तान्तः सोऽयमष्टाङ्गो मतः ॥

स विश्वतैजसप्राज्ञे तुरीयात्मान्तरात्मना ।

परमात्मज्ञानात्मयुजां मद्रूपाणाञ्च वाचकः ॥

तद्रूपभेदाः पञ्चाशन्मूर्त्तयो मम चापराः ।

पञ्चाशद्वर्णवाच्यास्ता वर्णोक्तारार्णभेदिताः ॥

द्विरष्टपञ्चकचतुःपञ्चेत्येवाष्टवर्गगाः ।

अज आनन्द इन्द्रेशावुग्र ऊर्ज्जे ऋतम्भराः ॥

Colophons :—

3B, इति श्रीमदानन्दतीर्थ-भगवत्पादविरचिते श्रीमत्तन्त्रसारसंग्रहे प्रथमोऽध्यायः ; 4B, इति द्वितीयोऽध्यायः ; 9B, इति तृतीयोऽध्यायः ; 15A, इति तन्त्रसारे चतुर्थोऽध्यायः ; 16A, इति सुदर्शनहोमः ।

6186.

5500. *Tantrasārasaṃgraha.*

Substance, country-made paper. $7\frac{1}{2} \times 5$ inches. Folia, 2 87. In Tripāṭha form. Character, Nāgara. Appearance, old and worn out. Incomplete.

The text in the present MS is accompanied by the commentary of Vedavyāsa, son of Janārdana. Save for the first leaf, the MS is complete.

The commentary ends :—

वेदव्यासकृता तन्त्रसारभावप्रबोधिनी ।
चतुर्थाध्यायगा भूयात् प्रीत्यै मध्वनृसिंहयोः ॥
निर्व्विशेषवराहादिरूपिणं मध्ववल्लभम् ।
निर्दोषसच्चिदानन्दविग्रहं नृहरिं भजे ॥

Colophon :—

इति श्रीमदानन्दतीर्थ-भगवत्पादाचार्य्यविरचितस्य श्रीमत्तन्त्रसारसंग्रहस्य जनार्द्दनसुत-वेदव्यासविरचितायां पदभावप्रबोधिन्यां टीकायां चतुर्थोऽध्यायः ।

Post-colophon Statement :—

संवत् + + + + + आश्विज

6187.

Kṛṣṇānanda.

4755. तन्त्रसारः । *Tantrasāra.*

Substance, country-made paper. $14 \times 3\frac{3}{4}$ inches. Folia (which are in a hopelessly disordered condition in the later portions of the MS), 316 (by counting). Lines, 8, 9 on a page. Extent in ślokas, 5,000. Character, Newari. Appearance, old and discoloured. Incomplete (?).

This is the most popular Tantrik digest in Bengal. MSS of it are found in and outside Bengal (Mad. XV. 7845ff.). Several editions of it are known. Of these, mention may be made of the editions of Rasik Mohan Chatterji, Panchanan Tarkaratna (Vangabasi Press, Calcutta, 1334 B.S.) and Upendranath Mukherji (Basumati Press, Calcutta, 1929).

This and the following MS have not the second of the two concluding verses but have the following line instead :—

श्रीकृष्णानन्दभट्टाचार्य्योयसंग्रहं दृष्ट्वाशधीत्य शास्त्राणि धीरमध्यापय साम्प्रतम् ।

6188.

11288. *Tantrasāra.*

Substance, country-made paper. 17 × 4 inches. Folia, 1–287. Lines, 8–10 on a page. Extent in ślokas, 5,000. Character, Newari. Date, 831 N.S. Appearance, fresh. Complete.

Post-colophon Statement :—

संवत् ८३१ भाद्रपद शुक्ल षष्ठ्यां तिथौ अनुराधानक्षत्रे प्रीति-योगे शुक्रवासरे कन्याराशिगते सवितरि, विछराशिगते चन्द्रमसि ।

6189.

5015. [*Tantrasāra.*]

Substance, country-made yellow paper. 12½ × 4 inches. Folia, 21. Lines, 6 on a page. Extent in ślokas, 380. Character, Bengali. Date, B.S. 1249 and Śaka 1763. Appearance, good. Incomplete.

This contains extracts from the *Tantrasāra* in the following order: —

योगिनीसाधन (Fol. 1–3B), कामेश्वरीसाधन (3B–5B), वगलामुखी (5B–9A), कर्णपिशाचीमन्त्र (9A–10A), मञ्जुघोषमन्त्र (10A–15A),

मातङ्गीमन्त्र (15A–16A), उच्छिष्टचाण्डालीमन्त्र (16A–17B), धूमावतीमन्त्र (17B–19A), भद्रकालीमन्त्र (19A–19B), उच्छिष्टगणेशमन्त्र (19B–21B).

Post-colophon Statement:—

सन १२४९ साल शकाब्दा १७६३, ३१ आषाढ़ मङ्गलवार वेला १ प्रहरेर समाप्त। जेला वीरभूमे कालेकृरीर दाक्षोयान श्रीरामरतन मुखोपाध्यायेर वासाय वसिया लिखिलाम। स्वाक्षर श्रीश्रीराम भट्टाचार्य्य, साकिम नारायणपुर, पं हाविलि सहर।

6190.

11176. *Tantrasāra.*

Substance, country-made paper. $12 \times 4\frac{3}{4}$ inches. Folia, 1–120+1–31. Lines, 9–11 on a page. Extent in ślokas, 3,725. Character, Nāgara. Appearance, good. Incomplete.

The MS begins from the *sāmānyapūjā* section of the work and ends with the section dealing with the worship of Dhanadā. It covers pages 131–460 of R. Chatterji's edition.

6191.

10355. [*Tantrasāra.*]

Substance, machine-made modern paper. $8\frac{1}{2} \times 5\frac{1}{2}$ inches. Folia, 35, of which Fol. 13 and 14 are missing. Lines, 12 on a page. Extent in ślokas, 640. Character, Nāgara. Appearance, good. Incomplete.

This MS contains the section on Śrīvidyā beginning with *śrīvidyā-viśeṣapaddhati* covering pages 338–371 of R. Chatterji's edition of the work.

6192.

Yadunātha Cakravartī.

6028. मन्त्ररत्नाकरः। *Mantraratnākara.*

Substance, country-made paper. $10\frac{1}{2} \times 5$ inches. Folia, 314. Lines, 13 on a page. Extent in ślokas, 1,000. Character, Nāgara. Date, Saṃvat 1809 (?) and Śaka 1774. Appearance, good. Complete in ten taraṅgas.

Beginning :---

यं ध्यायन्ति निरन्तरं मुनिगणाः पश्यन्ति यं योगिनो
यं गायन्ति परस्परं श्रुतिगणा वेदान्तवेद्यं परम् ।
ब्रह्माद्यैः परिसेवितं सुरगुरुं त्यक्तं गुणैः शाश्वतं
वन्दे तं पुरुषोत्तमं त्रिजगतामानन्दकन्दं महः ॥

नत्वा देवेन्द्रवन्द्यं त्रिभुवनजनकं विश्वनाथं महेशं
गौरीं विश्वेशवन्द्यां त्रिभुवनजननीं भारतीञ्च प्रणम्य ।
नत्वा गौरीसुतं तं करिपतिवदनं विघ्नराजं गणेशं
नत्वा देवानशेषानखिलभयहरान् ग्रन्थवर्य्यं करोमि ॥

विलोक्यागमतन्त्राणि यदुनाथेन धीमता
मन्त्ररत्नाकरो ग्रन्थः क्रियते सारसंग्रहः ॥
अर्पयित्वाञ्जलिं मूर्द्ध्नि पण्डितान् प्रार्थयाम्यहं ।
न्यूनातिरिक्तं यद्यत्र शोधनीयं विपश्चिद्भिः ॥
विना प्रमाणं सर्व्वत्र सन्देहो जायते नृणां ।
अथः प्रथमतस्तावत् प्रमाणमभिधीयते ॥

तत्र सर्व्वागमेषु दीक्षाया नित्यत्वे प्रमाणमाह ।
तदुक्तं रुद्रयामलतन्त्रे ।

अमन्त्रिकं नरं दृष्ट्वा किञ्चित् कार्य्यं न साधयेत् ।
दीक्षाग्रहणकाले तु पापराशिः पलायते ॥

End :---

अत्र विन्दुनिलये च दुग्तो
दर्शनस्पर्शनयोः प्रसन्नता ।
इह सन्निहितखचित्तवृत्ति-
प्रतिमाया[:] प्रतिजल्पनं करोति ॥
गमनञ्च नरः पुरः परेषां
पुनरत्थाय तमप्यहो मृतस्य ।

स्थानस्यास्य ज्ञानमात्रेण पुंसां
संसारेऽस्मिन् सम्भवो नैव भूयः ॥
भूतग्रा[मं] सन्ततोऽभ्यासतोऽस्मिन्
कर्त्तुं हर्त्तुं स्याच्च शक्तिः समग्रा ॥

Sectional and chapter colophons and sectional headings:—

6A, इति मन्त्ररत्नाकरे प्रथमः पटलः; 12B, ०द्वितीयः पटलः; 18A, चक्रविवेचनं नाम तृतीयः पटलः; 27B, ०चतुर्थः पटलः; 32A, इति गौडदेशीय-महामहोपाध्याय-विद्याभूषण-भट्टाचार्य्यात्मज-श्रीयदुनाथविरचिते मन्त्ररत्नाकरे प्रथमस्तरङ्गः।

43A, इति मन्त्ररत्नाकरे षष्ठः पटलः; 52B, ०सप्तमः पटलः; 66B, इति मालाग्रथनप्रकरणम्; अथासनविधिं वक्ष्ये नानातन्त्रानुसारतः; 67A, मन्त्रशुद्धिप्रकरणमाह; 68A, ०प्रमाणविवेचनं नाम नवमः पटलः; 68B, इति वास्तुयागप्रकरणम्; अथ मण्डपनिर्म्माणम्; 70A, इति सर्व्वतोभद्रमण्डलम्; 72B, इति मन्त्रदोषकथनम्; 74B, ०द्वितीयस्तरङ्गः।

83B, इति मन्त्ररत्नाकरे एकादशः पटलः; 85B, इति वर्णमयीदीक्षा-विधिः; अथ कलावती दीक्षा; 88B, ०द्वादशः पटलः; 95B, ०त्रयोदशः पटलः; 100A, ०चतुर्दशः पटलः; 107A, इति मुद्राप्रकरणम्। ०तृतीयस्तरङ्गः।

116B, इति श्रीमन्त्ररत्नाकरे गोपालमन्त्रनिरूपणं नाम षोड़शः पटलः; 120B, ०सप्तदशः पटलः; 126A, इति दशविद्या मातृकाप्रपञ्चः; इति श्रीमन्त्ररत्नाकरे अष्टादशः पटलः; 134A, ०भुवनेश्वरीपूजाप्रकरणं नाम एकोनविंशतिः पटलः; 139B, ०चतुर्थस्तरङ्गः।

145B, ०एकविंशतिपटलः। अथ हरिद्रागणपतिमन्त्रः; 148B, ०द्वा-विंशतितमः पटलः। अथ चन्द्रमसुं वक्ष्ये नृणां सर्व्वसमृद्धिदम्; 155B, ०त्रयो-विंशतिः पटलः; 161A, ०चतुर्विंशतिपटलः; 167B, ०पञ्चमस्तरङ्गः।

172B, इति मन्त्ररत्नाकरे षड्विंशतिः पटलः। अथ धूमावतीमन्त्राः; 177A, अथ कौलेशभैरवी, अथ चैतन्यभैरवी; 178A, कामेश्वरीभैरवी; अथ

षट्कूटाभैरवीमाह ; 178B, अथ नित्याभैरवी, अथ रुद्रभैरवी ; 179A, अथ भुवनेश्वरी भैरवी ; 181A, अथान्नपूर्णेश्वरी भैरवी ; 182B, इति भैरवीप्रकरणम् । अथ त्रिपूरासुन्दरीमन्त्राः ; 186A, इति ज्ञानार्णवोक्तश्रीविद्योद्धारप्रकरणम् ; 191B, इति दक्षिणामूर्त्तिसंहितोक्तमन्त्रप्रकरणम् ; 193B, इति मन्त्ररत्नाकरे नवविंशत् पटलः । अथ षोड़शीमन्त्राः ; 194A, इति षोड़शीप्रकरणम् ; 198A, ०षष्ठस्तरङ्गः ।

199A, अथ त्रिपुरासारसमुच्चयोक्तभैरवीमन्त्राः ; 200B, अथ शिवमन्त्राः, महामृत्युञ्जयमन्त्रः ; 201B, अथ ललितामन्त्रः, अथ वगलामुखीमन्त्रः ; अथ श्यामामन्त्रः ; 202A, अथ नक्षत्रविद्या लिख्यते ; 202B, अथ गोपालमन्त्राः ; 203A, अथ रघुनाथमन्त्राः ; 203B, इति रामार्चनचन्द्रिकायां रघुनाथमन्त्रप्रकरणम् ; ०एकत्रिंशत् पटलः 209B, इति श्रीमन्त्ररत्नाकरे द्वात्रिंशत् पटलः । अथ षोढ़ान्यासः ; 215A, ०त्रयस्त्रिंशत् पटलः ; 219B, ०चतुस्त्रिंशत् पटलः ; 226A, इति श्रीविद्यापूजापद्धतिः समाप्ता । ०सप्तमस्तरङ्गः ।

229B, इति श्रीमन्त्ररत्नाकरे षट्त्रिंशत् पटलः ; 233B, अथ कल्याणीस्तोत्रम् ; 239A, ०सप्तत्रिंशत् पटलः ; 240A, इति श्रीकुमारप्रबोधकतन्त्रे निगदितं श्रीसौभाग्यकवचं समाप्तम् ; 241B, इति श्रीरुद्रयामले देवीश्वरसंवादे त्रैलोक्यमोहनं नाम कवचं समाप्तम् ; 242A, इति मन्त्ररत्नाकरे अष्टत्रिंशत् पटलः ; 243A, इति कालिकाष्टकम् ; इति महाकालीमन्त्रपटलः ; 245A, ०एकोनचत्वारिंशत् पटलः ; 247A, इति परिमलमन्त्रपरिच्छेदः ; अथ ज्वालामुखीमन्त्रः ; 249B, इति भैरवीतन्त्रे मन्त्रघोषपटलः ; ०अष्टमस्तरङ्गः ।

253A, इति श्रीमन्त्ररत्नाकरे एकचत्वारिंशत् पटलः ; 259A, ०द्विचत्वारिंशत् पटलः । अथ श्मशानवीरसाधनम् ; 261A, अथ ग्रहणापुरश्चरणाप्रयोगः ; 267A, इति वशिष्ठसंहितायां श्रीरामषड़क्षरकल्पः ; अथ यन्त्रोद्धारः ; 267B, इति श्रीरघुनाथषड़क्षरकल्पप्रबन्धः ; इति श्रीमन्त्ररत्नाकरे चतुश्चत्वारिंशत् पटलः ; अथ प्रकीर्णकं वक्ष्ये सर्व्वतन्त्रानुसारतः ; 273A, इति शिवप्रकरणम् ; 273B, अथ नीलसरस्वत्युपाख्यानम् ; 275A, इति सिद्धसरस्वती-नीलसरस्वत्युपाख्यानम् ; 276B, इति पद्मपुराणे रक्षाक्षमाहात्म्यम् ; 278A, इति श्रीमन्त्ररत्नाकरे

पञ्चचत्वारिंशत् पटलः; 281B, इति वीरभावप्रकरणम्; इति पशुभावप्रकरणम्; 282B, इति भावनिर्णयप्रकरणम्; अथ कुमारीपूजा; 284A, इति श्रीमन्त्ररत्नाकरे षट्चत्वारिंशत् पटलः। अथ कुलस्नानम्; 284B, इति कुलपूजागोपनप्रकरणम्; 286B, इति कुलाचारप्रकरणम्; अथ पञ्चतत्त्वशोधनप्रकरणम्; 293A, इति शक्तिशोधनप्रकरणम्; इति श्रीमन्त्ररत्नाकरे सप्तचत्वारिंशत् पटलः। अथ मैथुनानुकल्पमाह; 297B, इति बलिदानप्रकरणम्; अथ शिवाबलिः; 298A, इति शिवाबलिः, ०नवमस्तरङ्गः।

302A, अथ शान्तिकादीनां प्रयोगः; 302B, अथ दुर्गामन्त्रः; 304A, अथ शारदोक्तसुदर्शनास्त्रमन्त्रप्रयोगः; 304B, इति शान्तिप्रकरणम्; अथ वश्यप्रकरणम्; 305A, अथ गणपतिमन्त्रप्रयोगः; 305B, अथ श्रीविद्याप्रयोगः; 306A, अथ छिन्नमस्ताप्रयोगः; अथ नीलसरस्वतीमन्त्रप्रयोगः; इति वशीकरणप्रकरणम्; अथ स्तम्भनप्रकरणमाह; 306B, अथ शूलिनीमन्त्रप्रकरणम्; अथ शारदोक्तनवदुर्गाप्रयोगः; 307A, अथ विद्वेषप्रकरणम्; 307B, अथोचाटनम्; 308A, अथ मारणप्रकरणम्; 308B, इति श्रीमन्त्ररत्नाकरे एकोनपञ्चाशत् पटलः; 309A, इति योगासनप्रकरणम्; अथान्तर्यागः; 311A, अथ होमः; 313B, इति श्रीगौड़देशीय-श्रीयदुनाथ(?)महामहोपाध्याय-विद्याभूषणभट्टाचार्यात्मज-श्रीयदुनाथचक्रवर्त्तिविरचिते मन्त्ररत्नाकरे दशममन्तरङ्गः समाप्तः।

Post-colophon Statement:

संवत् १८०९ शके १७७४ आश्विने मासि शुक्लपक्षे प्रतिपत्तिथौ गुरुवासरे श्रीमयूरेश्वरदैवज्ञेन वांदाख्यनगरे ग्रन्थलेखनपूर्त्तिः कृतेयम्। स्वार्थं परार्थञ्च।

Works and authors referred to:

1B, बृहन्मत्स्यसूत्र; 2A, अगस्त्यसंहिता; वशिष्ठसंहिता; 2B, तन्त्रराज, आगमकल्पद्रुम; 3A, राघवभट्ट; 3B, मन्त्रमुक्तावली; 4A, सनत्कुमारसंहिता; शारदातिलक; 4B, ब्रह्मपुराण, नारदपञ्चरात्र, यज्ञपार्श्व,

यामल ; 5A, गौतमीतन्त्र ; 5B, ऊर्द्धाम्नाय, बृहन्नारदीय ; 6A, बृहन्मत्स्य-सूक्त ; पाषण्डाङ्कुश ; सुन्दरीरहस्यवृत्ति ; 7B, भावचूड़ामणि ; गौतमीतन्त्र, ब्रह्मवैवर्त्त, स्कन्दपुराण ; 8A, रुद्रयामल ; सनत्कुमारसंहिता, अग्निपुराण, गणेशविमर्शिनी ; नारायणीतन्त्र, देवीपुराण ; 8B, योगिनीतन्त्र, विशुद्धेश्वर-महातन्त्र ; 9A, ज्ञानार्णव ; पूर्णपद्धति ; 9B, गार्गसंहिता ; वाराहसंहिता ; 10A, ऊर्द्धसारसंहिता ; बृहद्विक्रम ; भुवने[श्वरी]तन्त्र ; 10B, मन्त्रमुक्तावली ; सारसंग्रह ; सनत्कुमारसंहिता ; सोमशम्भुमत ; 11A, त्रिपुरार्णव ; 11B, राजमार्त्तण्ड ; स्मृतिसंहिता ; 12A, वाराहीतन्त्र ; वराहसंहिता ; 12B, दीपिका ; 13A, पिङ्गलामत ; 13B, तन्त्रराज, शारदा, आगमकल्पद्रुम ; 14B, भूतभैरव ; 24A, यज्ञपार्श्व ; वशिष्ठपञ्चरात्र ; गौतमीय, विश्वकर्म्मसिद्धान्त ; 25B, छान्दोग्यपरिशिष्ट ; 25B, स्वायम्भुव ; विश्वकर्म्मा ; 26A, वशिष्ठसंहिता ; क्रियासार ; महाकपिलपञ्चरात्र ; 26B, भविष्य ; गोभिलस्मृतग्रह्यार्थसंग्रह ; 27A, यज्ञपार्श्व ; 31B, गवाक्षतन्त्र ; हंसपारायण ; स्मृता[न्त]संहिता ; 33A, दक्षिणामूर्त्तितन्त्र ; नारदीय ; 34B, विष्णुधर्म्मोत्तर ; 37A, कल्पद्रुम ; 38A, क्रमदीपिका ; महाकालसंहिता ; 38B, आगमकल्पद्रुम ; 39B, प्रपञ्चसार ; 41A, सारसमुच्चय ; 42B, वैशम्पायनसंहिता ; 45B, कालिका-पुराण ; 46A, योगिनीतन्त्र ; 47B, बृहच्छ्रीक्रम ; 48A, सनत्कुमार-संहिता ; गणेशविमर्शिनी ; राघवभट्ट ; 48B, ज्ञानमाला ; समयाङ्गमाहका ; 49B, पूर्णायाग ; 50B, श्रीक्रम ; 52A, पूजाप्रदीप ; 57A, कुलचूड़ामणि ; 57B, विष्णुकल्पलता ; शिवसर्व्वस्व ; 58B, कालीतन्त्र ; योगिनीहृदय ; 59A, नारदपञ्चरात्र ; पद्मपुराण ; 59B, अगस्त्यसंहिता ; वायुपुराण ; 60A, वीरतन्त्र ; 61B, विमलातन्त्र ; तारावट्पदी ; 62A, ज्ञानार्णव ; कपिलसंहिता ; 63B, रहस्यवृत्ति ; 64B, भैरवीतन्त्र ; 65A, कुब्जिकातन्त्र ; 66B, मुण्डमालातन्त्र ; 69A, भोजराजकृतपद्धति ; 73B, त्रिपुरासार ; 79A, फेत्कारीय ; 89B, नवरत्नेश्वरतन्त्र ; 90B, तत्त्वसारसंहिता ; 94A, वैश्वानरसंहिता ; 123B, कूर्म्मपुराण ; 151B, शारदामत ; 161B, भैरवीकल्प ; 162B, कौमारीतन्त्र ; 164A, कामाख्यपञ्चशिखा ; 166A, एकवीराकल्प ; 166B, गौलतन्त्र ; 168A, चन्द्रचूड़ामणि ; 177B, निबन्ध ; 194A, दक्षिणामूर्त्तितन्त्र ; 194B,

तत्त्वावबोध ; 195A, तन्त्रचूड़ामणि ; 197B, मन्त्रचूड़ामणि ; 224A, सोम-भुजङ्गवल्ली ; 252A, प्रौढ़बोध ; 270A, ब्रह्माण्डपुराण ; 273A, स्वतन्त्र ; 275B, पद्मपुराण ; 278A, विजयाकल्प ; 278B, उत्तरतन्त्र ; 284B, भद्रकालीतन्त्र ; 285A, शैवागम ; 285B, कुलचूड़ामणि ; 288B, समयाचार ; 289B, भावचूड़ामणि ; 290A, कुमारीतन्त्र ; 291A, ललितातन्त्र ; 310B, विज्ञानललिता ; 313A, कपिलसंहिता ।

6193.

Śivānanda Gosvāmī Bhaṭṭa.

5931. सिंहसिद्धान्तसिन्धुः । *Simhasiddhāntasindhu.*

Substance, country-made paper. 12 × 5 inches. Folia,—four batches of leaves which run continuously — (1) 1 to 153 + (2) 1 to 89 + (3) 1 to 16 + (4) 1 to 7. Lines, 9 on a page. Extent in ślokas, 6,000. Character, Nāgara. Appearance, good. Incomplete at the end.

A MS of the work containing chapters 5–41 has been described in L. IV. 1621 where it is referred to as a Vaiṣṇava work. MSS of it are also described or noticed in Bik. No. 1330, Ulwar. Extr. 673, Peters IV. 43 and Ben., p. 320.

Beginning (which gives the genealogy of the author and a detailed list of contents):—

यस्याङ्घ्रिद्वयपूजनेन निखिलाः सिद्धीर्लभन्ते नरा
वृद्धीः प्राप्य च सन्ति वेश्म पुपरास्तेषां समाः सम्पदः ।
भक्तस्वान्तमितान्तमोहदलने दक्षं विपक्षं वरं
विघ्नानीं (रिं ?) प्रणमाम्यनारतमहं तं श्रीगणाधीश्वरम् ॥ १ ॥
सर्व्वं सन्तमसावृतं जगदिदं भाभिः समुद्भासयन्
अम्भोजानि विकासयन् विरहिणः कोकान् समाश्वासयन् ।
प्रीतांशुं परिहासयन् गतरुषिं सन्त्रासयन् वैरिणो
भक्तक्लेशमुदासयन् स भवतु क्षेमाय भासां पतिः ॥ २ ॥

अंसासक्तोत्तमस्वर्ण वनभुवि सततं यो विहंसानुरक्तो
गुंजोज्जंसाभिरामः प्रतिभयसमरे यो रणंसाधिकर्त्ता ।
भक्ताप्रणंसाभिपूर्त्तौ सकरुणहृदयो यो बलं सावलेपं
बिभ्रद्धंसाभकीर्त्तिर्विवरतु विविधं शर्म्म कंसारिह (?) तत ॥ ३ ॥
भाले प्रालेयरश्मिं दधदतिरुचिरं शोभने कण्ठदेशे
तारं हारं फणीन्द्रैः फ[f]णमणिसुभगैर्निर्म्मितं दीप्तिमन्तम् ।
वामां वामाङ्गदेशे नलिननिभमुखीमुन्मुखीमिष्टदाने
भक्तानां विश्ववन्द्यो भसितसिततनुः संविधत्तां महेशः ॥ ४ ॥
उदारचरिताद्भुता मुरगणैः समस्तैः स्तुता
युता निखिलसद्गुणैर्हतधुताघसङ्घा नृणाम् ।
कृपाकलितसेवनोद्यततमात्मभक्तायुता
शुभं तव निरन्तरं कलयतु क्षमाभृत्सुता ॥ ५ ॥
कर्पूरस्फटिकेश्वरगिरिप्रालेयगोत्राधर-
स्यन्दिस्फटिकपूर्णशारदविधुस्वच्छप्रभाभासुरां
सद्वृत्तामलमौक्तिकावलिकृतैर्भूषागणैर्भूषितां
गुम्फाद्भुतशक्तिदाननिपुणां वागीश्वरीमाश्रये ॥ ६ ॥
दृप्यद्वैरिसमुच्चयक्षयकरः कीर्त्तिद्युतिद्योतिता-
शेषाकाशदिगन्तरः पटुतरः प्राज्ञौघविज्ञार्पणे
राजद्राजसभासभाजितगुणग्रामोऽभिरामो भृशं
भक्तः श्रीनृहरेर्विभाति भुवने बुन्देलभूपान्वयः ॥ ७ ॥
यत्पाणौ नृहरेः सदैव चरणावानर्च्चतुः सादरं
दाने चाङ्घ्रियुगं महीदिविषदां प्रक्षालयाञ्चक्रतुः ।
युद्धे क्षिप्तिपतुश्च मार्गणगणं हन्तुं परानीकिनीं
त्रैलोक्यप्रथिताश्रयो मधुकरो राजा स यत्राभवत् ॥ ८ ॥
संफुल्लानि तनोति सर्व्वसुजनः स्वान्ताम्बुजन्मानि या
सख्यं व्यातनुते श्रुता श्रवणयोः स्तुत्या कवीन्द्रव्रजैः ।
स्वर्लोकि वलिमद्मनि क्षितितले यस्याः प्रकाशोऽनिशं
ख्याता क्षितिचरित्रयुग्विजयते यत्कीर्त्तिसत्कौमुदी ॥ ९ ॥

महीपनाराचहता रणाग्रे नाराचतामापुरहो द्विषतः ।
तीक्ष्णाः सपत्नास्तपनस्य बिम्बं भित्त्वा द्रुतं यद्दिविस्पुर्दिवं ते ॥१०॥
सम्मानदाननिपुणास्तु तदात्मजन्मा
सन्मानसस्यहरिभक्तिरुदारभक्तिः ।
कौन्तेयकत्नतविपत्नजनो जगत्यां
श्रीरामसाह्विरिति नाम नृपो बभूव ॥ ११ ॥
रामास्त्रयो भक्तिभरेण तुष्टास्तस्मै ददुः स्वीयगुणान् समस्तान् ।
लोकास्ततस्तं प्रथितप्रभावं श्रीरामदत्येव (?) समाख्ययोचुः ॥१२॥
युद्धे युद्धविदार्जुनं नयविधौ धीरा गिरामीश्वरं
सौन्दर्य्ये सुदृशः (?) स्मरं महसि यं तेजस्विनो भास्करम् ।
धर्म्मे धर्म्मविदोपि धर्म्मतनयं दानेऽर्थिसार्थावलिं
मन्यन्ते स्म महीतले समभवत् श्रीरामसाह्विर्नृपः ॥ १३ ॥
आसीत्तदीयतनयो विनयोपपन्नः
स्वच्छाशयो बहुदयो विबुधव्रजेषु ।
युद्धे निकाममभयो विजयोर्ज्जितश्रीः
संग्रामसाह्विरिति भूमिपतिः प्रसिद्धः ॥ १४ ॥
यत्सैन्ये चलिते प्रचेलुरचलाः जाता[:]स्थिरा धूलिभि-
र्निश्चितेम्बरे समभवद् भास्व[ा]न्[न]भास्वानलम् ।
अत्युच्चध्वजसंकुले सुरपथेभूदासुगो नासुगो-
मेदिन्यां स बभूव भूरिविभवः संग्रामसाह्विर्नृपः ॥ १५ ॥
तस्यात्मजो वलरजोभर सद्द भानुः
दृप्तद्विषद्दलनतीव्रमहःप्रभानुः ।
अत्यद्भुतो गुणगणैः प्रणिनतो धरण्यां
श्रीभारतो बङ्गलदानरतो बभूव ॥ १६ ॥

... ...

तत्सूनुः परिपन्थिमन्थिविलसद्वीरोतिधीरो रणे
बलावुंगतुरङ्गनिष्ठुरखुरक्षुण्णक्षमामण्डलः ।

दानाम्भःप्लुमितार्थिनै स्वदृशः ख्याताभिधानः क्षितौ
देवीसिंहनरेश्वरो निरुपमो राजोत्तमो राजते ॥ २२ ॥

... ...

आसीत्तस्य गुरुर्गुरुर्गुणगणैर्मन्त्राब्धिपारंगमः
श्रीगोस्वामिजगन्निवास इति सन्नाम्ना जगद्विश्रुतः ।
यस्याज्ञावप्रवर्त्तिनः क्षितिभुजस्ते ते भवन् भूरिशो
येषां कीर्त्तिरतीव भाति भुवने दाने कृपायोऽपि च ॥ २३ ॥
तत्तातस्तु तथाभवद्भुवसमः श्रीश्रीनिवासः क्षतौ
ज्ञानोदारकुठारदारितजगज्जाघोरुभूमीरुहः ।
नानातन्त्रविबोधमाप्य मनुजा यस्यानुकम्यानिधेः
शिष्या दैवतसेवनैरभिमतामृद्धाय सिद्धिं गताः ॥ २४ ॥
यस्याङ्घ्रिपद्मकृपया प्रथितः पृथिव्या-
मेतादृगत्र जयति स्म जगन्निवासः ।
यः सर्व्वसिद्धिसहितो जगति द्विजानां
तोषं व्यधादविरतं विविधोपकारैः ॥ २५ ॥
ज्येष्ठ[स्त]स्य सुतो जनोदितशिवानन्दाभिधानः क्षितौ
श्रीविद्याचरणारविन्दयुगलध्यानैकतानोनिघ्नम् ।
देवीसिंहनृपेण धर्म्मकलितस्वान्तेन संप्रार्थित-
स्तत्प्रीत्यै वितनोति धार्म्मिकजनश्रव्यं निबन्धोत्तमम् ॥ २६ ॥
गुरुचरणसरोजानुग्रहप्राप्तबोधः
श्रवणजनितभक्तस्वान्तभूरिप्रमोदः ।
निखिलमनुरहस्योद्बोधकोऽयं निबन्धो
जयतु जगति नाम्ना सिंहसिद्धान्तसिन्धुः ॥ २७ ॥
अत्र प्रातःकृत्यमादौ प्रोक्तं स्नानविधिस्ततः ।
पश्चाद्वासोधारणं च ततस्तिलकधारणम् ॥
सन्ध्याविधिस्तर्पणाश्च मध्यादेः स्वगृह्यागमः ।
ततः सूर्य्यार्घदानश्च श्रीशिवस्यार्च्चनं ततः ॥ २८ ॥

अर्चनं द्वारदेवानां तेषां ध्यानमपीरितम् ।
आसनानि ततः प्रोक्तं (?) पूजाद्रव्यविशोधनम् ॥
करशुद्धिश्च दिग्बन्धः प्राकारश्चयमानलम् ।
प्राणायामविधिः पश्चाद्भूतशुद्धिः समीरिता ॥
ततः प्राणप्रतिष्ठा च मातृकान्यसनं ततः ।
तद्भेदा निखिलाः प्रोक्तास्तन्त्रासोत्थं फलं ततः ॥
स्वोपास्यमन्त्रऋष्यादिषडङ्गन्यसनं ततः ।
ततः समीरितो न्यासो योगपीठस्य सिद्धिदः ॥
मूलमन्त्राङ्गभूतानां न्यासानां न्यसनं ततः ।
ततो मुद्रादर्शनञ्च मुद्राणां लक्षणानि च ॥
ध्यानञ्च स्वेष्टदेवस्याप्यन्तर्यागविधिस्ततः ।
पूजाचक्रस्य निर्म्माणं प्रतिमायाश्च विस्तरात् ॥
ग्रालग्रामशिलानान्तु लक्षणान्यर्चनाफलम् ।
शिवलिङ्गस्य निर्म्माणं पश्चाद्देवस्थितिक्रमः ॥
ततस्त्वर्घ्यादिपात्राणि तत्स्थापनविधिस्ततः ।
आत्मपूजाविधिर्योगपीठपूजाविधिस्ततः ॥
स्वेष्टदेवावाहनञ्च स्थापनाद्यखिलं ततः ।
आवाहनादि मुद्राणां लक्षणं तत्प्रदर्शनम् ॥
... ...
अथ गाणपता मन्त्रा उक्ताः सकलसिद्धिदाः ।
तेषु प्रोक्तः प्रथमतो माहागाणपतो मनुः ॥
अथैकाक्षरमन्त्रस्य भेदा उक्ताः सु(चि)सिद्धिदाः ।
हरिद्रागणपस्याथ विधिविघ्नेश्वरस्य च ॥
ततः प्रासिगणेशस्य प्रोक्तं मन्त्रचतुष्टयम्
ततो लक्ष्मीगणेशस्य ततः दौप्र (?) प्रसादनः ॥
हेरम्बस्य ततो मन्त्रो मालामन्त्रश्च भाषितः ।
ततः सुब्रह्मण्यमनुर्वक्रतुण्डमनुत्रयम् ॥

उच्छिष्टगणपस्याथ प्रोक्तं मन्त्रचतुष्टयम् ।
सौरा मन्त्रास्ततः प्रोक्तास्तेष्वाद्योष्टाक्षरो मनुः ।
भेदास्तस्योदिता अन्ये अक्षरश्च ततो मनुः ॥
ततः षडर्णः सप्तार्णो मनुर्मार्त्तण्डभैरवः ।
चतुर्वर्णो मनुः प्रोक्तो भुवनेश्यधिदैवतः ॥
अथाजयाख्यः संप्रोक्तो विष्णेश्वरस्तस्य चेरितः ।
ततश्चान्द्रो मनुः प्रोक्तो भौमस्य च बुधस्य च ॥
गुरोः शुक्रस्य सौरेश्च राहोः केतोरपीरितः ॥
ऊताप्यनस्य संप्रोक्तास्ततो मन्त्राः सुसिद्धिदाः ।
ततस्तु वैष्णवा मन्त्राः प्रोक्ताः सर्व्वे सुसिद्धिदाः ॥
तेषु नारायणस्योक्तः प्रणवस्त्वक्षरो मनुः ।
ततो हरिहरस्योक्तः श्रीकरस्याथ भाषितः ॥
तत्त्ववर्णस्ततः प्रोक्तो मन्त्रो नारायणस्य तु ।
वासुदेवस्याथ मनुः लक्ष्मीपूर्व्वस्य तस्य च ॥
पुरुषोत्तममन्त्रौ च ततः प्रोक्तौ सुसिद्धिदौ ।
ततो हृषीकेशमन्त्रः श्रीधरस्येरितस्ततः ॥
अच्युतेत्यादिमन्त्रस्तु ततस्तस्य मनुत्रयम् ।
हयग्रीवस्य मन्त्राश्च ततः प्रोक्ताः सुसिद्धिदाः ॥
अथोधरादूतात् संज्ञौ च वाराहा मनवस्ततः ।
ततो नृसिंहमन्त्रस्तु वामना मनवस्ततः ॥
सुदर्शनस्य मन्त्रौ द्वौ राममन्त्रास्ततोखिलाः ।
ततो हनुमन्मन्त्रस्तु मुकुन्दस्य मनुस्ततः ॥
अथ श्रीकृष्णमन्त्रास्तु सर्व्वे प्रोक्ताः सुसिद्धिदाः ।
उक्तः कामस्य मन्त्रोऽथ कार्त्तवीर्य्यमनुस्ततः ॥
अथ प्रोक्ता महेशस्य मन्त्राः सकलसिद्धिदाः ।
तेषु पूर्व्वं पञ्चवर्णाः प्रोक्ताः स च षडाक्षरः ॥
उमामहेश्वरस्योक्तौ ततो मन्त्रौ सुसिद्धिदौ ।
ततः प्रासाद(नं)मन्त्रस्तु प्रोक्तो वसुवर्णकस्ततः ॥

मृत्युञ्जयस्य मन्त्रोथ प्रोक्त आरोग्यदो नृणाम् ।
ततः श्रीदक्षिणामूर्त्तेस्त्रयो मन्त्राः समीरिताः ॥
मनुत्रयं नैलकण्ठं ततः पाशुपतो मनुः ।
अथाघोरास्त्रमन्त्रश्च चिन्तामणिमनुस्त्वथ ॥
ततस्तुम्बुरुबीजश्च मन्त्रोथ खड्गरावणः ।
ततो वटुकमन्त्रश्च क्षेत्रपालमनुस्ततः ॥
श्रीप्रासादपरामन्त्रः पराप्रासादसंज्ञकः ।
मन्त्रः प्रोक्तस्ततो मृत्युहन्ता त्रैयम्बको मनुः ॥
अथ नानाविधाः प्रोक्ताः शक्तिमन्त्राः सुसिद्धिदाः ।
तेष्वादौ भुवनेश्यास्तु प्रोक्ता मन्त्राः सुसिद्धिदाः ॥
ततः सारस्वता मन्त्रा मातृकामन्त्रपूर्व्वकाः ।
लक्ष्मीमन्त्रास्ततः प्रोक्ताः सर्व्वसम्पत्समृद्धिदाः ॥
मातङ्गीमनवः प्रोक्तास्ततो वश्यादिसिद्धिदाः ।
ततस्तु सुमुखीमन्त्रोऽनीमन्त्रास्ततोखिलाः ॥
ततस्तु भैरवीमन्त्राः प्रोक्ताः सर्व्वेप्सितप्रदाः ।
ततोन्नपूर्णामन्त्रास्तु प्रोक्ता अन्नसमृद्धिदाः ॥
अन्नप्रदाख्यमन्त्रोऽथ ततः कामेश्वरीमनुः ।
पञ्चबाणेश्वरीमन्त्रः पञ्चकामेश्वरीमनुः ॥
कामेश्यास्त्रयक्षरो मन्त्रः वगलाया मनुस्ततः ।
ततस्तु त्रिपुटामन्त्र उक्तः शक्तिमनुस्ततः ॥
अश्वारूढामनुरथो उक्तो गौरीमनुस्ततः ।
स्त्रीवश्यदो मनुरथो ततः पद्मावतीमनुः ॥
ततो ज्येष्ठामनुरथो चिकटाख्या मनुद्वयम् ।
त्र्यक्षोथ वैष्णवीमन्त्रा महाकृत्यामनुस्ततः ॥
छिन्नमस्तामनुरथो धूमावत्या मनुस्ततः ।
ततः श्रीकालिकामन्त्रास्तारामन्त्रास्ततोखिलाः ॥
ततः सञ्जीवनीविद्ये त्वराह्यास्य मनुस्ततः ।
कुरुकुल्यामनुरथो यक्षिणीमनवस्तथा ॥

गायत्रीप्रमुखाः प्रोक्ता वैदिका मनवस्ततः ।
श्रीविद्यागास्ततो मन्त्राः सविधाना निरूपिताः ॥
प्रोक्ताः पञ्चदशानान्तु नित्यानां मनवस्ततः ।
त्रिविधाः पुरुषाः सन्ति रजःसत्त्वतमोगुणैः ॥
तथैव प्रकृतिस्तेषां श्रद्धास्चैव तथाविधाः ।
कल्पिता आगमग्रन्थास्तद्धितार्थं सविस्तराः ॥
तथा नानाविधा मार्गा गिरिजापतिना स्वयम् ।
यथा वेदेपि दृश्य[न्ते] प्रयोगाः कामनाप्रदाः ॥
तथैवागममध्येपि संसारस्य प्रवृत्तये ।
सर्व्वेगैव तु सर्व्वेषामिति शास्त्रस्य निर्णयः ॥
अधिकारिणां तु फलदा न तथानधिकारिणाम् ।

Colophons: –

First batch of leaves:

34B, इति श्रीगोस्वामिश्रीनिवासभट्टपौत्रश्रीगोस्वामिजगन्निवासपुत्रगोस्वामि-श्रीशिवानन्दविरचिते सिंहसिद्धान्तसिन्धौ प्रथमस्तरङ्गः ।

76B, ०द्वितीयस्तरङ्गः ; 109B, ०तृतीयस्तरङ्गः ; 135B, चतुर्थस्तरङ्गः ।

Second of batch of leaves:

28A, पञ्चमस्तरङ्गः ; 47B, ०षष्ठस्तरङ्गः ; 66A, ०सप्तमस्तरङ्गः ; 89A, ०अष्टमस्तरङ्गः ।

Third batch of leaves:

2A, ०द्वादशस्तरङ्गः ॥ १२ ॥

16B, ०त्रयोदशस्तरङ्गः ॥ १३ ॥

The fourth batch of leaves which has no colophon contains a portion of chapter 14.

6194.

Brahmānanda.

4521. **शाक्तानन्दतरङ्गिणी।** *Śāktānandataraṅgiṇī.*

Substance, country-made paper. $16\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 68. Lines, 8 on a page. Extent in ślokas, 2,100. Character, Bengali. Date, Śaka 1727. Appearance, discoloured. Complete in 18 chapters.

The work has been published in the *Vividha-Tantrasaṃgraha.*

Post-colophon Statement:—

हरये नमः। श्रीदुर्गायै नमः। शाकाब्दा १७२७।

6195.

5054. *Śāktānandataraṅgiṇī.*

Substance, country-made paper. 14 × 3 inches. Folia, 74. Lines, 6 on a page. Extent in ślokas, 1,700. Character, Bengali. Appearance, good. Incomplete.

The present MS runs up to the end of chapter 13.

6196.

3662. *Śāktānandataraṅgiṇī.*

Substance, country-made paper. 14 × 3 inches. Folia, 28, of which Fol. 23 is missing and Fol. 28 is not numbered. Lines, 5 on a page. Extent in ślokas, 400. Character, Bengali. Appearance, discoloured and old. Incomplete at the end.

This MS contains, up to Fol. 27, extracts from the *Śāktānandataraṅgiṇī* (chapters I–X). The last fol. contains an extract from chapter XVIII. A colophon appearing on Fol. 17a refers to the 16th chapter of the work, though it appears at a place where extracts from chapters VII-VIII are quoted.

6197.

Pūrṇānanda.

5845. **श्राक्तक्रमः** । *Śāktakrama.*

Substance, machine-made modern paper. $8\frac{1}{2} \times 5$ inches. Folia, 29. Lines, 11-12 on a page. Extent in ślokas, 700. Character, Nāgara. Appearance, fresh. Complete in seven chapters.

Beginning:—

सरस्वत्यै नमस्तस्यै यस्यां स्वादुवचोऽमृतम् ।
बुधैरनेकशः पीतं पीयमानं च वर्द्धते ॥ १ ॥
नत्वा श्रीपरदेवताङ्घ्रियुगलं श्राक्तक्रमं कामदम्
पूर्णानन्दगिरिस्तनोति शिवयोस्तन्त्रानुसारक्रमात् ।
श्रीदीक्षागुरुपादपद्मयुगलध्यानात्मनोनिर्म्मल-
द्वैतज्ञानविनाशनाय विदुषामामोदसंवृद्धये ॥ २ ॥
सहस्रारे पद्मे प्रातः शिरसि निर्म्मले ।
पूर्णेन्दुमण्डलयुते शुद्धस्फटिकसन्निभम् ॥
गन्धानुलेपनं शान्तं वरदाभयपाणिनम् ।
मन्दस्मितं निजगुरुं कारुण्येनानुलोकतम् ॥
वामोरुशक्तिसहितं शुक्लालङ्कारभूषितम् ।
परमानन्दसंयुक्तं स्मरेत् तन्नामपूर्व्वकम् ॥
मनसा गन्धपुष्पाभ्यां संपूज्य वाग्भवं जपेत् ।
ततो जपं समर्प्पाथ स्तवेन तोषयेद्गुरुम् ॥

Colophons:—

5B, इति श्रीपूर्णानन्दपरमहंसविरचिते श्राक्तक्रमे प्रथमोंशः; 10B, ०द्वितीयोऽंशः; 19A, ०तृतीयोऽंशः; 20B, ०चतुर्थांशः; 25A, ०पञ्चमोंशः; 26A, ०षष्ठमोऽंशः (?); 29A, इति श्रीपूर्णानन्दपरमहंसविरचिते आचारादर्शे सप्तमोऽंशः समाप्तः ।

Post-colophon Statement :—

वैशाखशुक्लपौर्णमास्यां गुरुवासरे औशाके ॥ १८ ॥

This MS contains an abridged version which omits, among other things, all references to the names of authorities cited. The initial verse of the MS is absent in other known MSS of the work.

6198.

1618. *Śāktakrama.*

Substance, country-made paper. $13\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 105. Lines, 5 on a page. Extent in ślokas, 1,700. Character, Bengali. Appearance, fair. Complete in seven chapters.

The present MS has been described in L. VI. 2067.

6199.

3489. *Śāktakrama.*

Substance, country-made paper. $10 \times 5\frac{1}{2}$ inches. Folia, 40. Lines, 11 on a page. Extent in ślokas, 1,300. Character, Nāgara. Appearance, fresh. Complete in seven chapters.

The first half of the concluding verse, giving the date of composition, reads in this MS, as in Bik. 1318, इषे कालाङ्कवेदेन्दशाके मङ्गलवासरे instead of इषे कालाङ्कवेदेन्द, etc., which is the usual reading.

6200.

5621E. तत्त्वानन्दतरङ्गिणी । *Tattvānandataraṅgiṇī.*

Substance, palm-leaf. $14 \times 1\frac{1}{2}$ inches. Folia, 88 to 109. Lines, 4, 5 on a page. Extent in ślokas, 840. Character, Udiya. Appearance, good. Incomplete.

A MS of the work has been described in L. I. 368. The present MS contains the first seven chapters of the work. A MS containing eleven chapters of the work has been noticed in R. G. Bhandarkar's *Report on the Search of Sans. MSS in the Bombay Presidency during the year 1882-3* (*No.* 387).

Colophons:—

93A, इति तत्त्वानन्दतरङ्गिण्यां प्रथमोल्लासः; 94A, ०द्वितीय उल्लासः: 98A, ०तृतीयोल्लासः; 99B, ०चतुर्थोल्लासः; 105A, ०पञ्चमोल्लासः; 106B, ०षष्ठोल्लासः; 109A, इति श्रीपरमहंसपरिव्राजकब्रह्मानन्दपदद्वन्द्वसूर्वाव्रत श्रीपूर्णानन्दगिरिप्रकटिततत्त्वानन्दतरङ्गिण्यां सप्तम उल्लासः।

6201.

Śrīnātha.

3180. आत्मरहस्यम्। *Ātmarahasya.*

Substance, country-made paper. 12½ × 4 inches. Folia, 1–77 (of which 67B and 73B are blank). Lines, 9 on a page. Extent in ślokas, 2,000. Character, Bengali. Appearance, old and worn out. Complete in 19 ullāsas.

The work is more of the nature of a philosophical treatise than a ritualistic hand-book. From the end of chapter III onwards it is in the form of a dialogue between a disciple and a preceptor. The name of the work is definitely given as *Ātmarahasya* in the colophons of the commentary described below. The name of the compiler though not explicitly given elsewhere appears, from the concluding verse, to be Śrīnātha. The MS is full of explanatory marginal notes.

Beginning:—

नमामि परमात्मानं श्रीगुरुं ब्रह्मचिन्मयम्।
भवबन्धादिमुक्तिः स्याद् यत्कृपालेशसंप्रेषतः॥

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्त्तिं
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्व्वदा ..क्षिभूतम्
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥

... ...

अथैवं श्रीगुरुं नत्वा जगतां मङ्गलाय च ।
रहस्यमात्मनः किञ्चित् स्वभावं कथ्यतेऽधुना ॥
श्रुत्वा श्रीगुरुवक्त्रपङ्कजसुधावाक्यं तथा शास्त्रतो
ज्ञात्वा सारतरं तथैव विमलां स्वात्मानुभूतिं पराम् ।
संक्षेपेण मया समस्तजगतां मोक्षार्थकं यद्भवेत्
तत् सर्व्वं ग्रथितव्यमत्र विधिना श्रीमद्रहस्ये परे ॥

End:—

सर्व्वात्मत्वमिति स्फुटीकृतमिदं यस्मिन्नमुष्मिन् स्तवे
तेनास्य श्रवणात्तथार्थमननाद्ध्यानाच्च संकीर्त्तनात् ।
सर्व्वैश्वर्य्यमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः
सिद्धिन्तत् पुनरष्टधा परिगतं चैश्वर्य्यमव्याहतम् ॥
सर्व्वात्मकत्वेन च संस्थितेन श्रीनाथरूपेण नियन्त्रितेन ।
सुचेष्टितैर्बुद्धिमनोवचोभिः स्वेनैव सम्भूतमिदं रहस्यम् ॥

Colophons and headings of topics:—

3B, अथ युगभेदे शास्त्राचरणम्; 4A, अथ आचारभेदः, अथ पश्वाचार., अथ वैष्णवाचारः; 4B, इति शैवाचारः। इति ब्रह्मज्ञानशास्त्रे आत्मरहस्ये अधिकारिनिरूपणे आचारभेदे शैवाचारकथनम् नाम प्रथमोल्लासः।

4B, अथ शाक्ताचारः; 5A, अथ पञ्चतत्त्वप्रमाणम्; अथ शक्तिप्रमाणम्।

5B, इति शाक्ताचारः; अथ दक्षिणाचारः; 6A, अथ पञ्चतत्त्वकथनम्; अथ चक्रमध्ये जात्यभेदः; 7A, अथ वामाचारः; 8B, अथ सिद्धान्ताचारः; 9B, अथ कौलाचारः; 11B, + + + न कथनं नाम द्वितीयोल्लासः।

13A, इति श्रीगुरुशिष्यसंवादे ब्रह्मज्ञानशास्त्रे स्वात्मरहस्य अधिकारि-निरूपणं नाम तृतीयोल्लासः।

16B, ०ब्रह्मचैतन्यकथनं नाम चतुर्थोल्लासः ।

18B, ०स्वात्मचैतन्यकथनं नाम पञ्चमोल्लासः ।

21B, ०जीवपरमयोरैक्यज्ञानकथनं नाम षष्ठोल्लासः ।

24B, ०ब्रह्मणः सर्व्वस्वरूपवाक्यं नाम सप्तमोल्लासः ।

28A, ०मायाप्रक्रियाकथनं नाम अष्टमोल्लासः ।

31B, ०सृष्टिप्रकरणे कारणशरीरकथनं नाम नवमोल्लासः ।

36B, ०सूक्ष्मशरीरकथने चतुर्विंशतितत्त्वोत्पत्तिकथनं नाम दशमोल्लासः ।

40A, इति मूलाधारकथनम् ; 41A, इति स्वाधिष्ठानचक्रम् ; 41B, इति मणिपूरचक्रम् ; 42A, इत्यनाहतचक्रकथनम् ; 42B, इति विशुद्धाख्यचक्रम् ; 43B, इत्याज्ञाचक्रम् ; 44A, इति सहस्रारान्तर्द्वादशदलम् ; 44B, इति श्रीगुरु-शिष्यसंवादे ब्रह्मज्ञानशास्त्रे स्वात्मरहस्ये षट्चक्रकथनं नाम एकादशोल्लासः ।

46A, अथ अन्नमयकोषो लिख्यते ; 49B, ०स्थूलोत्पत्तिकथनं नाम द्वादशोल्लासः ।

54B, इति श्रीमहाकालसंहितायां श्रीमन्महाकाल्या सुधामरस्तोत्रं समाप्तम् ; ०सृष्टिकथनं नाम त्रयोदशोल्लासः ।

58A, ०शिष्यं प्रति उपदेशकथनं नाम चतुर्दशोल्लासः ।

61B, ०सृष्टिप्रलयकल्पने ज्ञानफलकथनं नाम पञ्चदशोल्लासः ।

63B, इति श्रीशिवगीतायां श्रीरामप्रणीतं श्रीविश्वेश्वरस्तोत्रं समाप्तम् ; 66A, ०अपरोक्षब्रह्मोपदेशकल्पनं नाम षोड़शोल्लासः ।

66A, इति प्रातःस्मरणम्, इति शौचविधिः ; 66B, इति स्नानम् : 70A, ०ब्रह्मज्ञानोपदेशो नाम सप्तदशोल्लासः ।

73A, ०काशीमाहात्म्यकथनं नामाष्टादशोल्लासः ।

77A, ०शिष्यानुभवकथनं नाम ऊनविंशोल्लासः ।

6202.

3181. *Commentary on the Ātmarahasya.*

Substance, country-made paper. 13 × 4¼ inches. Folia, 3 to 47. Lines, 7 on a page. Extent in ślokas, 770. Character, Bengali. Appearance, discoloured. Incomplete.

The MS begins with the commentary on the 4th introductory verse of the text and runs up to the end of the 10th ullāsa.

6203.

Kṛṣṇa Vidyāvāgīśa.

10949. तन्त्ररत्नम् । *Tantraratna.*

Substance, country-made paper. 11 × 5½ inches. Folia, 142. Lines, 15 on a page. Character, Nāgara. Date, N.S. 875 and Śaka 1677 Appearance, good. Complete (?).

MSS of the work have been described in L. I. 240 and IO. IV. 2573. The present MS, like the one described in IO, contains details of the worship of two deities, e.g., Kālī and Tārā. The work is based on various original Tantra texts. A list of these, identical with the one found in the beginning of the *Nityāṣoḍaśikārṇava* section of the *Vāmakeśvaratantra*, is given in the introductory portions of the work. The work also refers to a number of later compilations and authors like Rāghavabhaṭṭa (Fol. 25, 26).

Post-colophon Statement:—

शुभं भूयात् । नेपाल संवत् ८७५ श्रीप्राके १६७७ माघ कृष्णचतुर्थ्यां तिथौ उत्तरफल्गुनीनक्षत्रे अतिगण्डयोगे शुक्रवासरे इदं पुस्तकं धनञ्जयेन लिखितं । सम्पूर्णम् ।

श्रीसीतारामभट्टस्य पुस्तकमिदं ॥ श्रीश्रीश्रीरूपाय नाम

6204.

Sarvvānandanātha.

3447. सर्वोल्लासः । *Sarvvollāsa.*

Substance, country-made yellow paper. 12¾ × 4 inches. Folia, 1-14+1-99. Lines, 7-8 on a page. Extent in ślokas, 2,250. Character, Bengali. Appearance, new. Incomplete in the middle.

A complete MS of this work is described in L. III. 1071. The first portion of the present MS contains chapters 1 to 5 and a small portion of chapter 6. The second portion contains a very insignificant portion of chapter 10 and chapters 11 to 63.

Beginning:—

नमामि प्रकृतिं नित्यां जगदात्मस्वरूपिणीम् ।
सर्व्वोल्लासं महोल्लासं महोल्लासे वदाम्यहम् ॥
निगमादागमाच्छास्त्राद्भावाचारं समुद्धृतम् ।
श्रीसर्व्वानन्दनाथोक्तं श्रीदेव्याश्चरणाम्बुजे ॥

A list of Tantras, as given in the *Toḍalatantra*, is quoted thus (Fol. 4A):—

चतुःषष्टीनि तन्त्राणि मयैवोक्तानि कामिनि ।
कालीतन्त्रमुण्डमालातारानिर्व्वाणकानि च ॥
शिवसारं वीरतन्त्रलिङ्गार्च्चनलतार्च्चन [म्] ।
तोडलं नीलतन्त्रञ्च राधातन्त्रं महेश्वरि ॥
विश्वसारं भैरवाख्यं भैरवीतन्त्रमेव च ।
सिद्धेश्वरमाष्टभेदसमयातन्त्रकं शिवे ॥
गुप्तसाधनतन्त्रञ्च माष्टकातन्त्रमेव च ।
मायातन्त्रं महामाया अक्षयातन्त्रकं शिवे ॥
कुमार्य्याख्या महत्तन्त्रं कुलार्णवमतः परम् ।
कालिकाकुलसर्व्वस्वं कालिकाकल्पतन्त्रकम् ॥
वाराही योगिनीतन्त्रं योगिनीहृदयं शिवे ।
सनत्कुमारतन्त्रञ्च त्रिपुरासारतन्त्रकम् ॥
योगिनीविजयं भद्रे मालिनीतन्त्रमेव च ।
कुक्कुटाख्यं महत्तन्त्रं श्रीगणेशाख्यतन्त्रकम् ॥

भूततन्त्रं तथोड्डीशं कामधेनुं तथोत्तमम् ।
वीरभद्रं महत्तन्त्रं वामकेश्वरतन्त्रकम् ॥
कुलचूड़ामणितन्त्रं भावचूड़ामणिं प्रिये ।
ज्ञानार्णवञ्च वरदातन्त्रचिन्तामणिं ततः ॥
कालीविलासकं तन्त्रं हंसतन्त्रं महेश्वरि ।
चिदाम्बरतटतन्त्रं विज्ञापनमतः परम् ॥
फेत्कारिणीं च नित्याख्यं तन्त्रमुत्तरसंज्ञकम् ।
नारायणीमहत्तन्त्रमूर्द्धाम्नायकतन्त्रकम् ॥
ज्ञानदीपगौतमीयतन्त्रं निरुत्तरं शिवे ।
गान्धर्व्वकुब्जिकातन्त्रं मुक्तावलिं ततः परम् ॥
बृहद्विक्रमतन्त्रञ्च स्वतन्त्रतन्त्रकं शिवे ।
योनितन्त्रञ्च कामाख्यां तन्त्रं प्रोक्तं वरानने ॥
चतुःषष्टीनि तन्त्राणि मयैवोक्तानि सम्प्रति ॥
प्रतितन्त्रे पटलानि चतुःषष्टीनि पार्व्वति ।
असंख्यानि च तन्त्राणि भावानि विविधानि च ॥
सर्व्वयामलसंगीतं चतुःषष्टिप्रकाशकम् ।
प्रधानमेतद्विज्ञेयं चतुर्युगमतं ध्रुवम् ॥

End:—

सि[ड्डे](द्धि)र्हि कारणं ब्रह्म सर्व्वथैव कुलेश्वर ।
यो विजानाति तत्त्वेन देहान्ते ब्रह्मभाग्भवेत् ॥

Colophon:—

इति श्रीसर्व्वानन्देनाथविरचिते सर्व्वोल्लासे ब्रह्मज्ञानं नाम त्रिषष्ट्युल्लासः ॥ ६३ ॥

Post-colophon Statement:—

श्रीकृष्णानन्दनाथस्य पुस्तकमिदम् ।

6205.

Candraśekhara.

8934. पूजापुष्करिणी । *Pūjāpuṣkariṇī.*

Substance, country-made paper. $10\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 58. Lines, 8 on a page. Extent in ślokas, 1,160. Character, Nāgara. Appearance, fresh. Complete in seven chapters.

It deals with the daily rites of a Tantric worshipper.

Beginning:—

जयति निखिलहेतुः पार्व्वतीभ्रो रमेभ्रो
विधिहरिहरवन्द्या भ्रक्तिरूपा महेभ्री ।
विबुधबुधवरेण्यो यो गणेभ्रो दिनेभ्रः
परमपुरुष एकः पञ्चधेभ्रस्त्विदात्मा ॥
तन्त्राण्यनेकान्यालोच्य पूजापुष्करिणी परा ।
देवानुग्रहमासाद्य रच्यते विदुषां मुदे ॥
कर्ममार्गप्रवृत्तानां सिद्धिदा यावगाहनात् ।
विश्वेभ्रानुग्रहीतश्रीचन्द्रभ्रेखरभ्रर्म्मणा ॥

उषसि शिरसि सहस्रदलकमले गुरुं चिच्छक्त्युपेतं वराभयकरं ध्यात्वावश्यकं कृत्वा तीर्थं गत्वा स्नानं कुर्य्यात् । अथ स्नानविधिः ।

End:—

इति श्रीविश्वेभ्रानुग्रहीतश्रीचन्द्रभ्रेखरनिर्म्मिता भागीरथ्याः स्तुतिरेवं भूयात् तत्प्रीतये सदा भ्रं । इति पूजापुष्करिण्यां सप्तमी वीचिः पुष्करिणी च समाप्तिमगमत् । शुभमस्तु ।

पूजापुष्करिणी विधानकमलैराढ्या विचित्रैः परा
वीचिभिश्च समन्विता बहुविधाभिः सप्तभिर्निर्म्मला ॥
मन्त्राम्भोभिरविराजितेष्टलतिका संवर्द्धिका सेवतां
विद्वन्मानसहंसतोषणपरा भूयाद्विभोः प्रीतये ॥

6206.

Pragalbhācāryaśiṣya—Disciple of Pragalbhācārya.

5476. विद्यार्णवः । *Vidyārṇava.*

Substance, country-made paper. 15×7 inches. Folia, 135. Lines, 15 on a page. Extent in ślokas, 2,000. Character, Nāgara. Appearance, worm-eaten. Incomplete at the end.

The present MS contains 11 chapters (*Āśvāsas*) and a portion of the 12th. The work deals with the details of the worship of various Śākta deities.

Beginning:—

उद्यत्सूर्यसहस्रभासुरतनुः सूक्ष्मातिसूक्ष्मा परा
उद्यत्पञ्चनिभेन्दुकोटिसदृशी धामत्रयाध्यासिनी ।
तत्तेजस्त्रितयात्मिकैकमनुभि-र्वाक्कामशक्त्याख्यकैः
कूटैस्त्र्यम्बिशरार्त्तभिः परिगता नित्यात्मिका पातु वः ॥ १ ॥
या श्री मधुमती शक्तिर्जगच्चैतन्यरूपिणी ।
सास्तां मे पुरतो नित्यं मालिनी विश्वविग्रहा ॥ २ ॥
मतद्वयं समालोच्य तत्सङ्कीर्णभिया पृथक् ।
प्रकाश्यते परातत्त्वं मया विद्यार्णवाभिधम् ॥ ३ ॥
मधुमत्या महादेव्यास्तादात्म्यकादिसंज्ञकम् ।
कालीमतन्तु मालिन्यास्तादात्म्यं तान्त्रिका विदुः ॥ ४ ॥
षट्त्रिंशद्यज्ञनैर्मूलभूतैः शिवमयैः पृथक् ।
षोडशस्वरसंभिन्नैः पूर्णमण्डलसंज्ञकैः ॥ ५ ॥
षट्त्रिंशद्गुणितैः सिद्धकालनित्यास्वरूपकैः ।
नवात्मकैरग्निभेदात् द्विगुणीकृतविग्रहैः ॥ ६ ॥
तद्द्विगुण्यमयैस्तत्त्वैर्यन्त्रैस्तद्द्विगुणीकृतैः ।
तत्तद्भेदैर्भिन्नमूर्त्तिः प्रोक्ता वेदप्रकारिका ॥ ७ ॥
षट्त्रिंशत्तत्त्वसम्पूर्णा सर्व्वमन्त्रफलप्रदा ।
देवीमधुमतीयागतादात्म्यकादिसंज्ञकम् ॥ ८ ॥

Of the works quoted here, mention may be made of the following:—

कुलार्णव, भैरवीतन्त्र, लक्ष्मीसागर, पिङ्गलामत, रुद्रयामल, त्रिपुरार्णव, तन्त्रराज, योगिनीहृदय, सिद्धसारस्वततन्त्र, शारदा, ज्ञानार्णव, वामकेश्वर, त्रिपुरासार, फेत्कारिणीतन्त्र, कालिकापुराण, योगशास्त्र, श्रीविद्या, अगस्त्यसंहिता, वैशम्पायनसंहिता, स्वच्छन्दसंग्रह, श्रीक्रम, भूतभैरव, दक्षिणामूर्त्तिसंहिता, सारसंग्रह, भविष्योत्तरपुराण, योगिनीतन्त्र, वास्तुशास्त्र, प्रपञ्चसार, लक्ष्मणसंग्रह, कुलमूलावतार, वशिष्ठसंहिता, सोमशम्भु।

Stein (p. 237) notices a MS of the *Vidyārṇava* attributed to Pragalbhācārya, disciple of Viṣṇuśarman. In the present MS, however, the work is attributed to a disciple of Pragalbhācārya whose line of teachers is indicated as follows:—

2B, शङ्कराचार्य्यशिष्याश्च चतुर्दश दृढव्रताः।
देवात्मानो दृढात्मानो निग्रहानुग्रहक्षमाः ॥ ९० ॥
शङ्करः पद्मपादाख्यो बोधो गीर्वाण एव च।
आनन्दतीर्थनामा च पञ्चैते भिक्षवः स्मृताः ॥ ९१ ॥
सुन्दरो विष्णुशर्मा च लक्ष्मणो मल्लिकार्जुनः।
त्रिविक्रमः श्रीधरश्च कपर्दी केशवस्ततः ॥ ९२ ॥
दामोदर इति ख्याताः गृहिणो नवसंख्यकाः।
... ...
... ...
श्रीविष्णुशर्म्मणः शिष्यः प्रगल्भाचार्य्यपण्डितः।
तच्छिष्येण मया प्रोक्ते ग्रन्थेऽस्मिन् पूर्णतां गते ॥ ९९ ॥

The author who conceals his name gives a long story of a quarrel between Lakṣmaṇa Deśika and King Praudhadeva. Our author is stated to have, at the wish of the subjects, succeeded Praudhadeva to the throne which was

made over to his son presumably on his attaining majority. He also built the town of Vidyānagara resembling the Śrīcakra of the Tāntrikas. It was at the desire of the prince that the present book was written:—

3A, श्रीविद्यानगरं नाम्ना श्रीचक्राकारमुज्ज्वलम् ॥ ९१ ॥
निर्माय प्रौढदेवस्य पुत्रो राज्यार्हतां गते ।
तमेव देवभूपालमुपवेश्य नृपासने ॥ ९२ ॥
तदाज्ञया तत्सदृशैर्विद्वद्भिर्विमलार्थिभिः ।
सम्प्रार्थितोऽहमम्बाया आज्ञामादाय यत्नतः ॥ ९३ ॥
नानातन्त्राणि संशोध्य यामलानि च सर्वशः ।
मतद्वयं समालोड्य ग्रन्थं विद्यार्णवाभिधं ॥ ९४ ॥
मुदा रचितवानस्मि लोकानामुपकारकम् ।

6207.

Govinda Sārvabhauma.

5641. तन्त्रप्रकाशः । *Tantraprakāśa.*

Substance, country-made paper. 18 × $3\frac{3}{4}$ inches. Folia, 1–168, of which Folia 39–43 are missing, while two folia each are marked 79 and 160. Lines, 8 on a page. Extent in ślokas, 8,000. Character, Bengali. Appearance, very old and discoloured. Incomplete.

The work deals with various Tantric rites (like *dīkṣā*, *puraścaraṇa*, etc.) in a general way and describes the details of the worship of deities like Tārā, Tripurā, etc.

Beginning:—

नित्यानन्दमयं नत्वा गोविन्देन च धीमता ।
धर्मार्थकाममोक्षार्थमागमोऽत्र प्रकाश्यते ॥

Colophons :—

50B, इति श्रीगोविन्दसार्व्वभौमविरचिते तन्त्रप्रकाशे दीक्षाप्रकाशः प्रथमः परिच्छेदः।

76B, इति श्रीगोविन्दसार्वभौमभट्टाचार्यविरचिते तन्त्रप्रकाशे द्वितीयः परिच्छेदः।

No other colophon could be traced. A new chapter, dealing with the details of the worship of Tārā, begins on Fol. 117B.

6208.

Rāmaratna.

3911. **तिमिरचन्द्रिका।** *Timiracandrikā.*

Substance, country-made paper. $16\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 36. Lines, 6 on a page. Extent in ślokas, 650. Character, Bengali. Appearance, discoloured. Incomplete at the end.

The work deals with the details of Tantric worship as well as the daily duties of a Tantric worshipper.

Beginning: —

ॐ श्रीगुरवे नमः।

चित्रा वासरपूर्व्वगीसमकरा चैतन्यचन्द्रोदया
नानाचारविचारविज्ञविमलज्ञानैकगम्या कृतिः।
कापि ध्वान्तकृतान्तदर्पदलिता पापप्रतापापहा
पूर्णानन्दविधायिनी हृदि मया संस्थाप्यते पूर्णिमा॥
कलौ स्वल्पायुषः सर्व्वे साधकाः स्वल्पबुद्धयः।
विधास्ये साधनन्तेषां येन पूर्णं भवेद्ध्रुवम्॥
नानागमसमुद्रेभ्यो नानानिगमसागरात्।
विविच्य पद्यरत्नानि निबध्यन्ते समासतः॥

श्रीरामरत्नरचितां कृत्याकृत्यतमोहृताम् ।

पुस्तीं गृह्णन्तु गुरवः प्राचीनपद्यनिर्म्मिताम् ॥

विविधविबुधकृतबऊविधमतानुसारेण जडबुद्धीनां नानाविध-संशयतिमिरौघो जातः ।

तद्दूरीकरणाय तिमिरचन्द्रिका नाम संग्रहो दीप्यतु श्रीगुरोरनुग्रहात् ।

Colophons:—

6B, इति तिमिरचन्द्रिकायां दीक्षादिनिर्णयः प्रथम उल्लासः ; 7B, ०प्रातःकृत्यनिर्णयो द्वितीय उल्लासः ; 11B, ०दन्तधावनादिनिर्णयः तृतीय उल्लासः ; 16A, ०अन्तर्यागादिविधिनिर्णयः पञ्चम उल्लासः ; 21B, ०स्थान-शोधनादिपूर्व्वकपूजानिर्णयः षष्ठः उल्लासः ; 26A, ०उपचारादिनिर्णयः सप्तम उल्लासः ; 29A, ०निशापूजनादिविधाननिर्णयः सप्तमः (? अष्टमः) उल्लासः ; 33B, ०शिवलिङ्गार्च्चननिर्णयः अष्टम उल्लासः ।

Works and authors quoted and referred to :—

2A, कुलार्णव ; 6B, श्यामारहस्य ; 12A, तन्त्रगान्धर्व्व ; 16B, गन्धर्व्वतन्त्र ; 20A, यामल ; 24A, मुण्डमाला ; 25A, यामल ; 25B, अन्नदाकल्प ; 29A, लिङ्गार्च्चनतन्त्र ; 30A, माटकाभेद ; 34A, सम्मोहनतन्त्र ; 36B, माटकाभेदतन्त्र ।

The following occurs on the left hand margin of the manuscript :—

श्रीनीलमणिशर्म्मणः ॥ मालोड़ाग्रामवासः ॥

6209.

Kṛṣṇamohana.

3375. आगमचन्द्रिका । *Āgamacandrikā.*

Substance, country-made paper. $21\frac{1}{2} \times 3\frac{3}{4}$ inches. Folia, 1–56, of which Fol. 20 is missing. Lines, 6 on a page. Extent in ślokas, 1,950. Character, Bengali. Appearance, faded. Incomplete at the end.

This work is referred to as one of his own in the concluding verse of the 5th canto of the *Kamalodaya* by Kṛṣṇamohana (VSP, p. xxvi).

Beginning:—

सहस्रदलनीरजे जितसितांशुकोटिद्युतिं
वराभयलसत्करं करुणयान्वितं कान्तया ।
अलोलचपलारुचा रुचिरवामभागं भजे
गुरुं शुचिपरिच्छदं निखिलकामकल्पागमम् ॥
कारुण्यार्णवभूमिदेवचरणं चिन्तामणिं चिन्तयन्
आहृत्य प्रथितप्रचारकतिचित्तन्त्रादिसारोत्तमम् ।
प्रीतः श्रीयुतकृष्णमोहन इमां विख्यातसंख्यावताम्
मुख्यैरागमचन्द्रिकां कलयति ज्ञानार्णवोल्लासिनीम् ॥

Colophon:

13B, वाणीपादाम्बुजगलत्-मकरन्दकृण-
श्रीकृष्णमोहनकृतागमचन्द्रिकाया ।
उल्लास एष जनमानसतामसघ्नो
दीक्षाप्रकारनियमः प्रथमः समाप्तः ॥

इति श्रीकृष्णमोहनकृतागमचन्द्रिकाया दीक्षाप्रकारनियमनामा
प्रथम उल्लासः ।

No other chapter colophon is found. There are, however, a number of sectional colophons referring to the topics dealt with (e.g., इति कालीप्रकरणम्, इति ताराप्रकरणम्, etc.). The work describes rules of initiation and deals with the details of the worship of Kālī, Tārā, Śrīvidyā, Bhuvaneśvarī, Bhairavī, Chinnamastā and Lakṣmī.

6210.

Śivarāma.

3337. तन्त्ररत्नम् । *Tantraratna.*

Substance, country-made paper. $13\frac{1}{2}$ $4\frac{1}{2}$ inches. Folia, 14. Lines, 9 on a page. Extent in ślokas, 420. Character, Bengali. Appearance, discoloured. Incomplete at the end.

This deals with *dīkṣā* and Tantric worship in general.

Beginning:—

प्रणम्य परमात्मानं शिवरामेण धीमता ।
तन्त्रात् सारं समाकृष्य तन्त्ररत्नं प्रकाश्यते ॥
उच्यते प्रथमं तत्र लक्षणं गुरुशिष्ययोः ।
शान्तो दान्तः कुलीनश्च विनीतः शुद्धवेशवान् ॥
शुद्धाचारः सुप्रतिष्ठः शुचिर्दक्षः सुबुद्धिमान् ॥
आश्रमी ध्याननिष्ठश्च मन्त्रतन्त्रविशारदः ।
निग्रहानुग्रहे शक्तो गुरुरित्यभिधीयते ॥

Topics dealt with in the work:

1A, इति गुरुलक्षणम् ; इति शिष्यलक्षणम् ; 3B, अथ नक्षत्रचक्रम् ; 4A, अथ अकथहचक्रम् ; 4B, अथाकडमचक्रम् ; अथ ऋणिधनिचक्रम् ; 5A, अथ विद्यारम्भः ; अथ वारनियमः ; 5B, अथ तिथिनियमः ; अथ नक्षत्रनिर्णयः ; अथ लग्ननिर्णयः ; 6A, अथ पक्षनिर्णयः ; अथ मासनिर्णयः ; 6B, अथ मन्त्रसंस्कारः ; 7A, अथ दीक्षाप्रयोगः ; 8A, अथोपदेशः ; अथ पञ्चायतनी दीक्षा ; 8B, अथ पुरश्चरणम् ; 9A, अथ कूर्मचक्रम् ; 11B, अथ पुरश्चरणप्रयोगः ; 12A, अथ ग्रहणपुरश्चरणसंकल्पः ; अथ सामान्यपूजापद्धतिः ; 13B, विष्णुगायत्री, गोपालगायत्री ।

Works quoted:

1A, योगिनीतन्त्र, गणेशविमर्शिनी ; 2B, वाराही ; 7B, गौतमीय, वाशिष्ठ ; 8A, यामल ; 9A, अगस्त्यसंहिता ; 11A, क्रियासार ; 11B, कुलार्णव ; 12A, नीलतन्त्र, भैरवतन्त्र ; 12B, यामल, गौतमीयतन्त्र ।

6211.

Rāmānanda.

3603. **अभिज्ञानरत्नावली ।** *Abhijñānaratnāvalī.*

Substance, country-made paper. $18\frac{1}{2} \times 3\frac{3}{4}$ inches. Folia, 425. Lines, 6, 7 on a page. Extent in ślokas, 10,200. Character, Bengali. Appearance, discoloured. Incomplete.

The MS contains three large chapters and a great portion of the fourth chapter. The first chapter speaks of the superiority of śakti, the second deals with *mantra*, *kuṇḍa*, *maṇḍala* and *vāstuyāga*, the third treats of initiation, *pūjā*, *nyāsa*, etc., and the fourth which is incomplete in the present MS deals with *puraścaraṇa*, animal sacrifice and daily rites. This is a comprehensive Tantric digest pertaining to śakti worship.

Beginning:—

या सृष्टिस्थितिसंहृतीः प्रकुरुते ब्रह्माच्युतोमापति-
व्याजात्तामभिवन्द्य भर्गगृहिणीं श्रीनाथमप्यादरात् ।
विघ्नेशानन्दपिटप्रसादविभवैर्निमथ्य प्राक्साम्बुधिं
रामानन्दधरामरोऽभितनुतेऽभिज्ञानरत्नावलीम् ॥
जीमूतालीसुनीला स्रवदतिरुधिरोत्तुङ्गमुण्डावलीना
तारा तारोपवक्त्रा पुरहरहृदयाबद्धपादारविन्दा ।
खड्गं कर्त्तीं कपालं प्रहसितकुमुदं दोश्चतुष्कैर्दधाना
पायान्मां नीलवाणी भवभयशमना शाम्भवी शक्तिराद्या ॥
मातः पार्थिवपांसुपुञ्जगणनामेकैकशोऽप्येषतः
कर्त्तुं सागरवारिविन्दुगणनां प्रत्येकमन्त्यान्तिमाम् ।
शक्तोऽप्याद्यवसानशून्यगणिताधाराभिधाने यतः
शक्तो नैव भवेदतो न च मया वर्ण्यो गुणस्तेऽनघे ॥

क्वाहं निन्दायबुद्धिः क्व च तव चरितं पुण्यपुञ्जैर्निगद्यं
मातर्जानामि सत्यं तदपि तव पदाब्जस्य पूजाकथायाम् ।
श्रद्धा मां वाचयन्ति न भवति भविता तत्र हेतुः प्रणामो
ये यद्भावा नमन्ति त्वदमलचरणे तद्भवत्ये[व ते](तरे)षाम् ॥

Colophons of the different chapters:—

51B, इति श्रीरामानन्दतर्कालङ्कारविरचिताभिज्ञानरत्नावल्यां प्रथमं रत्नम् ।

143A, ०द्वितीयरत्नम्; 339B, ०तृतीयरत्नम् ।

6212.

Prāṇapati.

3599. अर्चनसंग्रहः । *Arcanasaṃgraha.*

Substance, country-made paper. 18×4 inches. Folia, 16 to 121. Lines, 8 on a page. Extent in ślokas, 1,200. Character, Bengali. Appearance, worn out. Incomplete at both ends.

This gives the *pramāṇa* and *paddhati* of the different elements of the Tantric form of worship. The MS contains the first four chapters of the work. The first chapter, of which there is only one leaf, appears to deal with the significance of various terms like *guru*, etc. The second chapter speaks of *dīkṣā* (initiation) with its many forms. The third chapter treats of *puraścaraṇa* and rites connected with it. The fourth chapter deals with *pūjā* proper with all its parts including bathing, *sandhyā*, etc.

Colophons of the different chapters:—

16B, इति श्रीप्राणपत्युपाध्यायविरचितेऽर्चनसंग्रहे गुरूपदार्थादिप्रकाशो नाम प्रथमो विवेकः ।

80A. •दीक्षाप्रकाशो नाम द्वितीयो विशेषः ।

80B. •पुरश्चरणप्रकाशो नाम तृतीयो विशेषः ।

Of the works (which include a large number of later compilations) and authors referred to, mention should be made of: —

कुलधर्म्मोत्तर (16A), कौमुदी, विश्वसार (16B), विश्वविवेक (17A, 29A), विष्णुकल्प (17B), मत्स्यसूक्त, विष्णुचूडा (20B), सम्मोहनतन्त्र (21A), विश्वप्रपञ्च (25B), नवरत्नेश्वर (25A), राघवभट्ट (27B), तारामक्तितरङ्गिणी (28A), प्रपञ्चतत्त्व (28A), सोमशम्भु (28B), विशुद्धेश्वर (29A), भवपञ्चक (29A), स्वतन्त्र (32B), विष्णुयामल (33A), रामार्चनचन्द्रिका, गणेशविमर्शिनी (33B), तत्त्वसार (34A), तन्त्ररत्न (36B), मालिनीविजय (38B), श्रीक्रम (39B), चामुण्डा (40A), कुमारीकल्प, बीजावलि (42A), उदयकरपद्धति, बृहत्मत्स्यसूक्त (44B), योगावली (45B), पुरश्चरणचन्द्रिका (46B), कुल-प्रदीप, श्यामारहस्य (49A), विवेकप्रकाश (50B), पिङ्गला (51B), कुलप्रकाश (54A), हंसपरमेश्वर (55A), योगकल्प (55B), बृहत्प्रचेताः (56B), सनत्कुमारकल्प, क्रियासार (57A), सारावली (57B), सिद्धसारस्वत (59A), सिद्धान्तशेखर (60B), त्रिशक्तिरत्न (67B), गुणविष्णु (69A), गार्ग्यसंहिता, यज्ञार्णव (69B), महायज्ञार्णव (72B), शक्तिरत्न, कुलरत्न (73B), शक्त्यर्णव (74A), कुलप्रपञ्च (74B), रत्नकल्प, पूजार्णव (75B), विद्यानन्दधृतागम (76A), कुलप्रदीप (76B), पुरश्चरणप्रदीप (77A), विद्याधराचार्य (79A), साधनार्णव (79B), गुरुरत्नकल्प (81B), रत्नसार, कुलामृतसार (84A), कल्प-द्रुम (84B), विश्वप्रकाश (85A), लक्ष्मीज्ञानार्णव (85B), रत्नप्रदीप (88A), आगमकल्पद्रुम (90B), तत्त्वसागर, कुलदर्पण (91A), रत्नसारावली, विश्वविभूति (91B), सारसंग्रह, रहस्यसार (92B), बृहद्गौतम (93B), चन्द्रिका (97B), गणेशतत्त्व (98B), कालीहृदय (100B), कुमारसंहिता (107A), लक्षणसंग्रह (108B), भावचूडामणि (109A), विद्यानन्दनिबन्ध (111A), मन्त्रकौमुदी (111A), शाक्तानन्दतरङ्गिणी (112B), तन्त्रप्रदीप (113A), सङ्केताभिधान (115B).

6213.

Rāmakṛṣṇa.

720. **आगमकौमुदी** । *Āgamakaumudī.*

Substance, palm-leaf. 14 × 1½ inches. Folia, 112. Lines, 4 on a page. Extent in ślokas, 1,848. Character, Bengali. Date, 1621 Ś.E. Appearance, old, worm-eaten and dilapidated. Complete.

The present MS has been described in L. IV. 1549. The work deals with Tantra rites in general as also with the worship of various deities.

Post-colophon Statement :—

चिंशेऽंशे मधुमासस्य भृद्विषड्भृ-मिते शुक्ले ।
श्रीमान् प्रसादः सुकृती लिलेखागमकौमुदीम् ॥

6214.

Raghunātha Tarkavāgīśa.

1611. **आगमतत्त्वविलासः** । *Āgamatattvavilāsa.*

Substance, country-made paper. 19½ × 4½ inches. Folia, 481, of which Fol. 11–18, 418-19 and 422-23 are missing. Lines, 8 on a page. Extent in ślokas, 14,400. Character, Bengali. Appearance, fresh. Complete in five chapters.

This is an extensive Tantric digest dealing with general matters like initiation, yoga, etc., as also with the worship and rituals of various deities. A MS of the work, containing what is stated to be the first *khaṇḍa* is described in L. IX. 3186. Another MS, complete in five chapters, has been described in HPR. I. 22. An abridgment, made by the author's son, Rāmakṛṣṇa, in 1725 Ś.E., is noticed in L. I. 269 and VSP (p. xvii). The present MS gives the genealogy of the author and the date of composition of the

work in the verses given below. A portion of the work is reported to have been published in Benares (BM, 1908–1919, p. 831). Another work of the same author is the *Sāṅkhyatattvavilāsa*, a commentary on the *Sāṅkhyakārikā* (CS. III. 12, Hall, p. 6).

यः सर्व्वानन्दमिश्रात् समजनि बलभद्राभिधानस्ततोऽभूत्
काश्मीनाथस्तदीयतनुजनुरवनिभूषणं चन्द्रवन्द्यः ।
तस्मादासीत् कुलीनः सुकविरधिगताशेषशास्त्राब्धिपारः
सारः सद्योगभाजां शिव इव शिवरामाभिधस्चक्रवर्त्ती ॥
यं प्रासूत सुतं कुमारमिव सद्गोत्रोद्भवा पार्व्वती
धीरं श्रीरघुनाथमाततमहाभक्तिं दयालोः शिवात् ।
ग्रन्थस्तत्कृतिनिर्म्मितो ग्रहवियत्षट्चन्द्रशाके मधौ
श्रीमांस्तत्र विलास एष कृतिनां हर्षाय पूर्णोऽभवत् ॥

6215.

Keśava Viśvarūpa.

907. आगमतत्त्वसंग्रहः । *Āgamatattvasaṃgraha.*

Substance, country-made paper. $12\frac{1}{2} \times 4\frac{3}{4}$ inches. Folia, 16. Lines, 12 on a page. Extent in ślokas, 900. Character, Nāgara. Appearance, old. Incomplete.

The present MS, which contains only the second chapter of the work, has been described in L. V. 1760. The chapter gives an indication of the principal topics of the Tantras (*meyaprakāśaka*).

Works and authors quoted and referred to:—

1B, परमानन्द ; स्वच्छन्द ; मालिनीविजय ; शिवसूत्रादिशैवतन्त्रतन्मूलक-तन्त्रालोकस्वच्छन्दोद्योतश्रीप्रत्यभिज्ञादिनिबन्ध ; ज्ञानार्णव-दक्षिणामूर्त्तिसंहिता-परमानन्दवामकेश्वरादि-कतिपयप्राक्तन्त्रतदनुषङ्गकतिपयनिबन्ध ; योगिनीतन्त्र ;

2A, त्रिपुरारहस्य ; 3A, सौभाग्यरत्नाकर ; त्रिपुरार्णव ; सेतुबन्ध ; वामकेश्वर-तन्त्र ; 3B, स्वतन्त्र, कुलार्णव, परशुरामसूत्र ; दत्तात्रेय ; 4A, परशुरामसूत्र-वृत्ति ; ताराभक्तिसुधार्णव ; 4B, नित्यातन्त्र ; निशाटनाख्यागमव्याख्यानतन्त्रालोक, जयरथाचार्य्य ; 5A, वरिवस्यारहस्य ; नारदपञ्चरात्र ; 6A, अनुत्तरागम ; श्रीविद्यागम ; 6B, सर्व्वदर्शनसंग्रह ; सूतसंहिता ; 7A, श्रीविद्यारण्य ; वायु-संहिता ; श्रीभगवत्पादाचार्य्य ; आनन्दलहरी ; 7B, विरूपाक्षपञ्चाशिका ; अजड़प्रमाटसिद्धि ; तन्त्रसौभाग्यसार ; 11A, प्रपञ्चसार ; पद्मपादाचार्य्य ; तन्त्रराज ; 11B, अभिनवगुप्त ; शैवागम ; श्रीपादसूत्र ; श्रीस्पन्द ; राम-कण्ठाचार्य्य ; ज्ञानार्णव ; तन्त्रराजव्याख्या ; प्रपञ्चसारविवरण ; 12B, मृगेन्द्र ; 13A, शिवसूत्र ; 15B, चण्डीस्तव ; 16A, सौभाग्यकल्पलता ; 16B, सौभाग्यकल्पतरु ।

Date and account of the author :—

16B, जयति महागुरुवर्य्यो महागमज्ञानदुग्धवाराशिः ।
सौभाग्यकल्पभूरुहनिर्म्माता माधवाख्यया प्रथितः ॥ ६ ॥
तच्छक्त्यम्बाचरणाराधनसम्प्राप्तवैभवो जयति ।
क्षेमानन्दाख्यगुरुर्य्यस्य निबन्धो हि कल्पलतिकाख्यः ॥ ७ ॥
तच्चरणसेवको यश्चोपाख्या यस्य विश्वरूप इति ।
म[हा]राष्ट्रान्वयसूतिः केशवशर्म्मा मुदे सुविबुधानां ॥ ८ ॥
रामाग्निनन्दवारिधिगतकल्यब्दे सितोर्जपञ्चम्यां ।
इममागमतत्त्वानां संग्रहमकरोन्महार्थदं विशदम् ॥ ९ ॥

Colophon :—

इति श्रीतुङ्गभद्रोपकूलवसति-विश्वरूपोपाख्य-केशवकृतावागमतत्त्व-संग्रहे द्वितीयः परिच्छेदः ॥

6216.

Rājakiśora.

3478. शक्तिरत्नाकरः । *Śaktiratnākara.*

Substance, machine-made modern paper. $14\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 1–26+$\frac{21}{25}$+114. Lines, 9 on a page. Character, Bengali. Appearance, soiled. Incomplete.

The name of the compiler is clearly given in the last introductory verse of the present MS:—

2A, तस्याः किञ्चिदहं समस्तजगतां सारैकमुक्तेः क्रिय-
ज्ञानातन्त्र-पुराण-पुस्तकवरादाकृष्य चामोदतः ।
कुर्व्वे पुस्तकमेव रम्यवचनं श्रीमुक्तिरत्नाकरं
श्रीमान् राजकिशोर एष गिरिजापादाब्जभक्त्युत्सुकः ॥
[मुक्त्याधारणपादपद्मविभवं श्रीराजकैशोरकम्—Oxf.]

Two MSS of the work, complete in five ullāsas, are described in L. I. 242 and Oxf. 101[a]. The present MS contains the first three chapters of the work and the concluding portions of the fourth and the fifteenth chapters. The first three chapters speak of the greatness of Śakti. The portions of the other two chapters deal respectively with the list of mahāvidyās and with rites to be performed when one fails to properly kill an animal offered to the deity.

6217.

Navamīsiṃha.

5457. तन्त्रचिन्तामणिः । *Tantracintāmaṇi.*

Substance, country-made paper. 12¼ × 6½ inches. Folia, 412. Lines, 11–15 on a page. Extent in ślokas, 15,000. Character, Nāgara. Appearance, old and discoloured. Complete in 40 chapters.

Beginning, containing a description of the contents and an indication of the works consulted:—

यस्याः दृष्टमिदं कुलाकुलगतं तत्त्वेन सम्पादितम्
भूतं पञ्चरसोज्ज्वलञ्च निगमाश्चत्वार एव क्रमात् ।
भूताद्यं किल सागरेण सहितं नित्यं जगन्मङ्गले
तस्मै साधकसिद्धिदानविमलप्रख्यातकीर्त्यै नमः ॥

वन्दे ज्ञानवरप्रदाननिरतं पादारविन्दं गुरो-
र्दिव्यौघप्रभृतेस्च विघ्ननिचयध्वंसेप्यलम्बोदरम् ।
तन्त्राणां रचनाकरं पशुपतिं गुह्येस्वरीं कालिकां
ब्रह्मोपेन्द्रमहेन्द्रवन्दिततरां वच्चादिकां योगिनीम् ॥
नेपालाधिपतेः समस्तधरणीजानीन्द्रचूड़ामणे-
र्नानादानतपोव्रतादिकविताशीलस्य विद्यानिधे[:] ।
भूपालेन्द्रधराधिपस्य नवमीसिंहस्त्वमात्यः क्रमं
निर्णीयाशु बुधैः समं वितनुते श्रीतन्त्रचिन्तामणिम् ॥
चेद्ग्रन्थलाघवधियाच्च निगूढ़गुप्तिः
कार्य्या तदा बुधजने मम मुग्धता स्यात् ।
तस्माद्रहस्यकथनं ध्रुवमस्ति लोके
प्राक्तद्दोषशमनं कुरु देवि मातः ॥
हे धीराः परमार्थदत्तमनसः सिद्धिं परामीप्सवः
तत्तद्देवतसद्रहस्यमखिलं ज्ञातुञ्च चेदुत्सुकाः ।
तत् पश्यन्तु भवन्त एवममलं ग्रन्थं मदीयं मुञ्च-
र्नानातन्त्रविलोकनोत्सुकतया नायासयध्वं मनः ॥
तन्त्राणां वचनं येषां ग्रन्थेऽस्मिन् प्रकटीकृतं ।
तेषां नामानि तन्त्रस्य उत्प[f]त्तिकथनं पुनः ॥
कृतादियुगभेदेन मार्ग एव पृथक् पृथक् ।
आधिक्यमागमानाञ्च रुद्रच्युत्पत्तिक्रमस्ततः ॥
कालिकाकृष्णयोस्तारारामयोश्चैकरूपता ।
निर्णयो दशविद्यायाः शिवशक्त्योरुपासना ॥
श्यामायाः सर्व्वमूलत्वमुक्तमाद्ये प्रकाशके ।
मन्त्रोद्धारक्रमेणैव वामदक्षिणलक्षणम् ॥
विद्याम्नायके मार्गनिर्णयश्च पृथक् पृथक् ।
आवश्यको मकारेषु चाम्नायाधीनतस्तु यः ॥
गुरुं विना तन्त्रमन्त्रे नाधिकारिनिरूपणम् ।
दीक्षाप्रशंसा गदिता द्वितीये तु प्रकाशके ॥

श्रीगुरोः शिवतुल्यत्वं गुरुलक्षणनिर्णयौ ।
गुरुं विनोपदेशौ च स्त्रीणां वामे स्वनायकात् ॥
लक्षणालक्षणे शिष्ये तयोराम्नायनिर्णयः ।
त्याज्यात्याज्यविवेकः स्यादुपदेशान्तरं तयोः ॥
वैदिकादिषु मन्त्रेषु स्त्रीशूद्रौ नाधिकारिणौ ।
जातेर्मनोश्च विप्रादौ देयादेयविवेचना ॥
एतेषां संस्थितिर्ज्ञेया प्रकाशे(के) तु तृतीयके ।
तूर्य्यप्रकाशे संस्काराः षोडशैव तु मन्त्रिणः ॥
तत्र नामप्रदानाख्ये चक्राणां लिखनं कृतम् ।
मन्त्राणामपि संस्काराः षोडशैव प्रचोदिताः ॥
मध्ये शापप्रदानन्तु पञ्चमे च प्रकाशके ।
मासादिनिर्णयः षष्ठप्रकाशे तु प्रकीर्त्तितः ॥
दीक्षाविधिर्धना(ज्ञा)द्यादौ परीक्षाग्रहणे भुवः ।
वास्तुयागविधेरादौ तस्योत्पत्तिः प्रकीर्त्तिता(ः) ॥
तन्मण्डलञ्च प्रास्त्रोक्तं तत्र देवविनिर्णयः ।
बलिमन्त्राश्च तन्त्रोक्तवास्तुमण्डलदैवते ॥
प्रकाशे सप्तमे प्रोक्ते चाष्टमेथ निगद्यते ।
दिक्साधनं मण्डपस्य कुण्डादेर्लक्षणानि च ॥
अङ्कुरारोपणं प्रोक्तं नवमे तु प्रकाशके ।
गुरोर्निमन्त्रणविधिर्दन्ते काष्ठशुभाशुभम् ॥
स्वप्नं सम्प्रार्थनविधिर्वह्नेः[ः] स्थितिविवेचनम् ।
कुण्डसंस्कारपूर्व्वं हि वह्निसंस्थापनं पुनः ॥
दीक्षाया दिनकृत्यं हि तदङ्कहवनं ततः ।
मन्त्रप्रदाने भेदोऽस्ति वामदक्षिणमार्गयोः ॥
उपदेशः कुलस्त्रीणां दीक्षाभेदोपदेशकौ ।
उपासनाविधिः स्वप्नलब्धमन्त्रस्य निर्णयः ॥
मनोर्गुरोश्च देवस्य त्यागो दशप्रकाशके ।
क्रमदीक्षाविधिर्विद्याविशेषे परिकीर्त्तिता ॥

पूर्णाभिषेककथनं एकादशप्रकाशके ।
गुरुभक्तिस्तथाचारौ प्रोक्तौ दक्षिणकौलयोः ॥
धर्म्माधिकारिणौ कौले वामे चार्कप्रकाशके ।
आचारा दशधा(ः) प्रोक्ता मद्यानीलादयः क्रमात् ॥
श्यामादिविद्याविषये चयोदशप्रकाशके ।
दिव्यवीरपशूनाञ्च भावा बालाप्रपूजने ॥
योग्यायोग्यविवेकोक्ति चतुर्दशप्रकाशके ।
सात्त्विकादिप्रभेदेन पूजा भिन्ना प्रकीर्त्तिता ॥
एथक् मोक्षप्रदं कर्म्म प्रातःकृत्यविधिस्ततः ।
अजपाया विधानञ्च स्नानं नानाविधं स्मृतम् ॥
विभूतिधारणं सन्ध्यावन्दनञ्च क्रमात् पुनः ।
गायत्रीणां समुद्धारः प्रकाशे तिथिसङ्ख्यके ॥
पूजाप्रशंसा दारार्च्चासनं भूतापसारणम् ।
भूतशुद्धिर्मातृकादिः कलासङ्ख्याप्रकाशके ।
अन्तर्यजनकर्म्मांगि चार्घ्यादिस्थापने विधिः ॥
द्रव्यांगि यन्त्रलिखने पीठनिर्णयमेव च ।
शालग्रामशिलायाश्च उत्पत्तिर्लक्षणानि च ॥
हरीशाद्रिसुतासूर्य्यगणेशदिक्पतिग्रहाः ।
एतेषां भेदतो भेदः सम्यगुक्तः एथक् एथक् ॥
मुद्रा सर्व्वोपचारेषु प्रत्येकं लक्षणादिकम् ।
नित्यहोमविधिर्भूतबलिरात्रिकं ततः ॥
देवताभेदतो भिन्ना करमाला प्रचोदिता ।
ब्रह्मार्पणादिकं सर्व्वं सप्तदशप्रकाशके ॥
कुलमार्गसमुत्पत्तिः पञ्चशुद्धिविधिस्ततः ।
शक्तिशुद्धिस्तु कौलादेर्विशेषन्यासनिर्णयः ॥
द्रव्यदानविवेकस्तूत्पत्ति[:] पापकर्म्मगाः ।
मांसादेर्निर्णयः सम्यक् मकारस्यानुकल्पकम् ॥

आन्तरीयविशेषस्तु संस्कारकथनं क्रमात् ।
पात्रसंख्याप्रकथनं मानश्रेष्ठादिनिर्णयः ॥
म(ा)हापात्रस्य च पुनः साधनं लक्षणं शुचिः ।
श्रीपात्रस्थापनादिश्च तर्पणं तत्त्वशोधनम् ॥
वटुकादिबलिश्चाष्टादशमेतिप्रकाशके ।
पूजोपचारमन्त्राश्च कुलद्रव्यनिषेचनम् ॥
ऊनविंशतिसंख्येऽस्मिन् प्रकाशे प्रकटीकृतम् ।
भोजनादिविधिः साय(ा)न्तनीयकृत्यलेखनम् ॥
शिवाबलिर्निशाकृत्यं नित्यभेदविनिर्णयः ।
लिखितो विंशतितमे प्रकाशे सर्व्वसम्मते ॥
श्यामापूजाक्रमश्चैकविंशत्याख्यप्रकाशके ।
स्तोत्रादिलिखनं सम्यक् द्वाविंशतिप्रकाशके ॥
म(ा)हाकालादिनित्यानां मन्त्रोद्धारादिकं पुनः ।
त्रयोविंशतिसंख्येस्मिन् प्रकाशे प्रकटायते ॥
तारार्च्चनक्रमो वेदविंशत्याद्ये प्रकाशके ।
प्रचण्डचण्डिकापूजा पञ्चविंशतिसंख्यके ॥
श्रीविद्यायाः क्रमः सम्यक् षड्विंशतिप्रकाशके ।
भैरवी च म्हालक्ष्मीर्मातङ्गी भुवनेश्वरी ॥
धूमावती च वगला चासां पूजा पृथक् पृथक् ।
सप्तविंशतिसंख्येस्मिन् प्रकाशे प्रतिपादिता ॥
चक्रपूजा पूर्व्वकृत्यं सामयीलक्षणं ततः ।
द्विविधं यजनं तत्र दूतीनां लक्षणं पृथक् ॥
दशविद्याक्रमेणैव दूतीयागविधिस्ततः ।
चक्राचारः कृतोप्यष्टाविंशत्याद्यप्रकाशके ॥
प्रस्तारादिश्च यन्त्राणां क्रमाद्दक्षिणावामयोः ।
प्रतिष्ठा द्विविधा प्रोक्ता ऊनविंश(ति)प्रकाशके ॥
चलाचला द्विधा माला देवताम्नायभेदतः ।
पृथक् पृथक् दला प्रोक्ता यन्त्रात्तसम्भवादिकम् ॥

महाप्रश्चादिभिर्भिन्ना मालाफलविनिर्णयः ।
ग्रन्थनादिविवेकस्तु संस्कारा मुण्डसाधनम् ॥
महामालाविनिर्म्माणं संस्कारौ मुख्यभेदयोः ।
जाग्रतीकरणं तस्यां प्रोक्तं चिंशत्प्रकाशके ॥
कालश्चार्थस्ततोऽङ्गानि पुरश्चरणकर्म्मणः ।
विप्रराजविधिर्विद्याविशेषाम्नायनिर्णयः ॥
क्रमेण दशविद्यायाः जपसंख्यादिनिर्णयः ।
सर्व्वसिद्धिप्रदं स्थानं देवतानां पृथक् पृथक् ॥
पीठानाञ्च समुत्पत्तिः क्षेत्रस्य ग्रहणे विधिः ।
कूर्म्मचक्रपरिज्ञानमभिषेकविधिस्ततः ॥
कार्य्याकार्य्यविचारश्च सङ्कल्पकरणं ततः ।
जपस्य कालकथनं रहस्यमनुसूतके ॥
मन्त्रविद्याविभेदेन प्रबोधकालनिर्णयः ।
तयोर्भेदो मन्त्रशिखामन्त्रचैतन्यकं ततः ॥
क्रमेण दशविद्याया कुल्लुकाविधिरीरितः ।
सेतुविप्रादिभेदेन निर्व्वाणकथनं ततः ॥
शापोत्कीलनयोर्भेदः शापोद्धारोसिना मनोः ।
मन्त्रस्य हृदयं चार्थनिर्णयोच्च विशेषतः ॥
जपस्यारम्भभेदा हि पुनर्वीरपुरस्क्रिया ।
अथवान्यप्रकारेण विविधा तु पुरस्क्रिया ॥
शापवरस्य च स्तोत्रादेश्चैकचिंशत्प्रकाशके ।
मन्त्रसिद्धेरुपायाश्च चितासाधनकर्म्म च ॥
वीरसाधनभेदाश्च युग्मचिंशत्प्रकाशके ।
जपसंख्याप्रमाणञ्च युग्मचिंशत्प्रकाशके ॥
विद्याभेदे जपात् सिद्धिप्रदा संख्या मनोरपि ॥
रहस्यक्रमयोगाश्च त्रयस्त्रिंशत्प्रकाशके ।
नैमित्तिकस्य कालादि कुलाकुलविनिर्णयः ॥

ग्रहणं द्विविधं प्रोक्तं बाह्याभ्यन्तरभेदतः ।
दमनारोपणोत्पत्तिर्दमनारोपणे विधिः ॥
पविचारोपणोत्पत्तिः पविचारोपणे विधिः ।
ग्रन्थिभेदो देवतायास्त्रयस्त्रिंशत्प्रकाशके ॥
शारदीयविधानञ्च चतुस्त्रिंशत्प्रकाशके ।
पशुदानविवेकस्तु पशुभेदादिनिर्णयः ॥
देवताग्निकालञ्च पशोर्लक्षणवीक्षणम् ।
निषेधोऽप्यनुकल्पञ्च पूजामहिषप्रोक्षणम् ॥
नराणां प्रोक्षणं खड्गलक्षणं पाशनिर्णयः ।
शुभाशुभञ्च नैवेद्यं पञ्चत्रिंशत्प्रकाशके ॥
कुमारीपूजनविधौ तासां लक्षणनिर्णयः ।
शुभाशुभादिसंकेतः ऋतुत्रिंशत्प्रकाशके ॥
सामान्यतः काम्यविधिः षट्कर्म्मक्रमनिर्णयः ।
तेषां प्रकीर्णकथनं आसनादिनिरूपणम् ॥
मन्त्रग्रथनभेदादिर्मालाकुण्डादिनिर्णयः ।
होमद्रव्यप्रमाणञ्च सप्तत्रिंशत्प्रकाशके ॥
क्रमेण दशविद्यायाः प्रयोगश्च पृथक् पृथक् ।
प्रायश्चित्तविधिः पश्चादष्टत्रिंशत्प्रकाशके ॥
साम्राज्यमुद्रिका पश्चाद्यन्त्राणां लक्षणं क्रमात् ।
मन्त्राणां धारणायोनचत्वारिंशत्प्रकाशके ॥
प्रत्येकं मातृकावर्णध्यानादीनां निरूपणम् ।
क्रमेण दशविद्याया मन्त्रभेदाः प्रकीर्त्तिताः ॥
नानाप्रयोगमन्त्राश्च चत्वारिंशत्प्रकाशके ।
कुमारी योगिनी काली वाराही कुब्जिका परा ॥
नारायणी मुण्डमाला श्यामुण्डा भुवनेश्वरी ।
गौतमी समया मौक्षामगिर्विजयमालिनी ॥
लीलावती गुह्यसिद्धिर्मालिनी परमेश्वरी ।
प्रचण्डचण्डिकाग्म्भृ नित्या कात्यायनीति च ॥

फेत्कारी भैरवी भूतसिद्धिः सिद्धेश्वरी तथा ।
मेरुनीलमतङ्गाख्य यक्षिसङ्गमभैरवौ ॥
साङ्ख्यायनं किरणाख्यं गन्धर्व्वभूतभैरवौ ।
वीराहंनं वीरभद्रं रुद्रकालानलोत्तरे ॥
सिद्धिसारस्वतं हाहारावो मत्स्यानभैरवः ।
सिद्धेश्वरो विश्वसारस्तथा बौधायनं पुनः ॥
माहेश्वरमहाहारौ कालाग्निश्च मदा[डा ?]ख्यपि ।
एतेषामन्ततो ज्ञेयस्तन्त्रशब्दः पृथक् पृथक् ॥
सिद्धिनाथो महाकालो दक्षिणामूर्त्तिरेव च ।
सुरेन्द्रब्रह्मगोरक्षा वैशम्पायनमेव च ॥
नन्दिकेश्वरवाय्यौ वाराही शाम्भवीति च ।
सनत्कुमारः श्रीकण्ठोप्यगस्त्यस्तत्त्वगौरकौ ॥
वशिष्ठः पुनरेतेषां अन्ते स्यात् संहिताभिधा ।
ब्रह्मविष्णुरुद्रसिद्धदेव्युमाचन्द्रशक्तयः ।
एतेषामन्ततो ज्ञेयं यामलं चाष्टसंख्यकम् ॥
कुलवीरमन्त्रभावश्चूड़ामणिभिरीरितः ।
हयग्रीवनारदाभ्यां महाकपिलतो भवेत् ॥
पञ्चरात्रं ततो देवी शैवलिङ्गागमानि च ।
कुमारीविजयाकालीतारोक्तल्पाश्च विश्रुताः ॥
मातृकामन्त्रज्ञानानि कुलगुप्ता कुलानि च ।
माद्यश्चैतेभ्यः शब्देभ्योऽप्यर्णवं परिकीर्त्तितम् ॥
रहस्यक्रमतः कक्षोलिनीश्रीमतकालयोः ।
उत्तरञ्च पदं ज्ञेयं चण्डीपीठं प्रकीर्त्तितम् ॥
नित्याह्निको मातिलके चोडीशं कुलपूर्व्वकम् ।
स्वायम्भुवः सोमशम्भुरुक्तश्चैव पिङ्गलामतम् ॥
षड़न्वयो महारत्ननवरत्नेश्वरावपि ।
कामधेनुमतं कुम्भकुलसम्भवसंज्ञकौ ॥

कालीक्रमो मत्स्यसूक्तमुदयाकरपद्धतिः ।
योगिनीहृदयञ्चैव कालीहृदयमेव च ।
त्रिप्रक्तिरत्नकं सोमभुजङ्गावलिरेव च ॥
कुलावतारकं पद्यवाराहीहरपूर्व्वतः ।
गौरीसंवादकं ज्ञेयं समयाङ्कमाटका ॥
तूर्णायागश्च ललितस्वच्छन्दं परिकीर्त्तितम् ।
कुलप्रकाशकश्चेति कुलामृतप्रदायिका ॥
नवदुर्गाकल्पसंज्ञं कुलमूलावतारकम् ।
तन्त्रराजश्च कामाख्या शब्दान्तं चासिका स्मृता ॥
कुलरत्नद्योतिकं स्यादेतेभ्यः ग्रन्थमध्यतः ।
वचनानि समानीय लिख्यते क्रियते न तु ॥

End :—

तन्त्राणि [यानि]न सकलानि न तानि [म]र्त्ये
मर्त्ये च यानि न पुनः प्रकटानि तानि ।
देशान्तरे कति कतीह न सर्व्वमस्ति
ग्र[न्थे त्व]पूर्णवचने किमु दूषणं मे ॥
एकस्याः पदपद्मपूजनविधेर्निःशेषतो निर्णये
शम्भुः पञ्चमुखोप्यनेकक[वपु]र्मत्यङ्गयो न क्षमः ।
दिग्विद्याक्रम(ण)निर्णयोचिततया ग्रन्थे प्रवृत्तोऽस्मि य-
त्त[त्राप्त]ल्यतरं कृतं बुधजनैः क्षन्तव्यमेतद्ध्रुवम् ॥

Last Colophon :—

इति श्रीतन्त्रचिन्तामणौ मातृकावर्णध्यानदशविद्यादिनानामन्त्र-
भेदमुक्त्युपायान्त्येष्टिनिर्णयनामा चत्वारिंशत्तमः प्रकाशः सम्पूर्णः ।

Post-colophon Statement :—

समाम्नायं दामोदरसूरिणा कृतो ग्रन्थः ।

This is a comprehensive Tantric compilation dealing with the details of Tantric worship. The name of the author is found in one of the introductory verses while the post-colophon statement of the present MS attributes the work to Dāmodara Sūri.

6218.

11311. *Tantracintāmaṇi.*

Substance, country-made paper. 13 × 6½ inches. Folia, 1–411. Lines, 11 on a page. Extent in ślokas, 15,000. Character, Nāgara. Appearance, fresh. Complete in 40 chapters.

A complete table of contents is given in the beginning of the MS in Folia marked 1–15.

6219.

Yadunātha Śarmā.

3982A. आगमकल्पवल्ली । *Āgamakalpavallī.*

Substance, country-made paper. 9¼ × 6½ inches. Folia, 10. Lines, 22 on a page. Extent in ślokas, 350. Character, Kashmiri. Appearance, old, worn out and discoloured. Incomplete.

MSS of the work are noticed in Oudh. XI. 20 and Stein. 227. A MS of the work, complete in 25 chapters, is in the Society's old collection. It is a comprehensive compilation dealing with the details of the worship of various deities, specially the Mahāvidyās. The present MS contains the first two chapters and a portion of the third chapter up to the beginning of the Nāḍīcakra.

Beginning:—

ॐ स्वस्ति । श्रीगणेशाय नमः । ॐ नमः शिवाय ।

यत्पादपङ्कजयुगं हृदि सन्निवेश्य
विश्वं सृजत्यविकलं खलु पद्मजन्मा ।
विष्णुश्च पालयति संहरते महेश-
स्तं देवमादिपुरुषं सततं नतोऽस्मि ॥

नत्वा गिरीशं गिरिजां गणेशं वाणीं मुनीन्द्रैः स्तुतपादपद्माम् ।
विलोक्य शास्त्रं यदुनाथशर्मणा वितन्यते ह्यागमकल्पवल्लौ ॥
प्रपञ्चसारसिद्धान्तं शारदातिलकं तथा
सपरिष्कारमालोक्य तथा सारसमुच्चयम् ।
यत्नेन दीपिकां दृष्ट्वा तथा च लघुदीपिकाम्
तथा पूजाप्रदीपञ्च पुरश्चरणचन्द्रिकाम् ॥
मन्त्रदर्पणसिद्धान्तं मन्त्रदेवप्रकाशकम् ।
मन्त्रनेत्रञ्च मन्त्रान्तं श्रीरामार्च्चनचन्द्रिकाम् ॥
मन्त्रमुक्तावली रत्नावली ज्ञानार्णवादिकान् ।
तन्त्रं सनत्कुमारस्य नारदीयचतुष्पातीम् ॥
पूजायागं सोमशम्भुमतं चागस्त्यसंहिताम् ।
संहितां वैष्णवीं तद्वत् तत्त्वसागरसंहिताम् ॥
संहितां कपिलप्रोक्तां श्रीमन्त्रवरसंहिताम् ।
तन्त्रं श्रीभुवनेश्वर्य्या नयसिद्धान्तमादरात् ॥
कल्पं श्रीवनदुर्गायास्तन्त्रं सम्मोहनादिकम् ।
हयग्रीवमतं तद्वत् तथा विज्ञानभारतम् ॥
शुद्धं च तन्त्रराजं च तथा वै पिङ्गलामतम् ।
वामकेश्वरतन्त्रञ्च समस्तं रामदीक्षितम् ॥
विज्ञानेश्वरसिद्धान्तसारं श्रीसंहिताक्रमात् ।
विज्ञानललितं पञ्चरात्रं नारायणीमपि ॥
वशिष्ठसंहितागस्त्यसंहितां भैरवं तथा ।
दिव्यसारस्वतं चिच्चन्द्रिकां कामिकमादरात् ॥
होमाकरोत्तरं ग्रन्थं प्रतिष्ठासारसंग्रहम् ।
संहितां वायवीं तद्वत् संहितां [ब्र]ह्मणास्तथा ॥
ह्नश्यानोः संहितां ब्रह्मविष्णुरुद्रादियामलम् ।
तथैव यामलोद्धारं मत्स्यसूक्तमपि क्रमात् ॥
पार्व्वतीश्वरसंवादं वाराहीतन्त्रमादरात् ।
तथैव कुब्जिकातन्त्रं [त्व]रिताज्ञानमादरात् ॥

तथैव योगिनीतन्त्रं क्रमप्रस्त्रिपुराह्वयम् ।
ईशानसंहितां तद्वत् सिद्धान्तं विश्वकर्मणः ॥
तन्त्रं श्रीदक्षिणामूर्त्तेः वैष्णव्यायनसंहिताम् ।
कुलचूड़ामणिं तद्वत् भावचूड़ामणिं तथा ॥
कुलार्णवं कुलश्रीष्टं हंसपारायणं तथा ।
पुराणं विविधं तद्वत् स्मृतिशास्त्राणि भारतम् ॥
ज्योतिःशास्त्राणि चालोक्य सकलां पद्धतिं क्रमात् ।
अन्ये ये सद्ग्रन्थाः सन्ति तान् दृष्ट्वा च पुनः पुनः ॥
विधानं मन्त्रयन्त्राणां दीक्षादीनां प्रपञ्चितम् ।
ज्ञानानुसारतो ज्ञेयं विभाव्य च मुञ्जर्मुञ्जः ॥

Colophons:—

2B, इत्यागमकल्पलतायां प्रथमः पटलः;. 5B, इत्यागमकल्पलतायां द्वितीयः पटलः ।

6220.

Yogendra.

2897. आगमसारसंग्रहः । *Āgamasārasaṃgraha.*

Substance, country-made yellow paper. 17 × 4 inches. Folia, 5. Lines, 10 on a page. Extent in ślokas, 167. Character, Bengali. Appearance, fresh. Incomplete.

The present MS, which has been described in L. X. 4050, contains the first two chapters of the work which speak of the omnipresence and supremacy of Śakti as well as the greatness of the Kaula form of worship.

Of the works quoted and referred to, mention may be made of the following:—

कामधेनुतन्त्र, ज्ञानार्णव, कौलावलि, कुमारीकल्प, कणादसंहिता, लिङ्गार्चन, वासुदेवरहस्य, विश्वसार, वराहसंहिता, भूतशुद्धितन्त्र, गुरुपादुका, चिन्तामणि-तन्त्र, उत्तरातन्त्र, कौमुदीतन्त्र, कुलार्णव, चीनाचार ।

6221.

Kāśīnātha.

6542. अवतारभेदप्रकाशिका । *Avatārabhedaprakāśikā.*

Substance, country-made paper. $10\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 17. Lines, 7 on a page. Extent in ślokas, 300. Character, Nāgara. Appearance, fresh. Complete.

The title as well as the name of the author are found in a later hand on the reverse of Fol. 1 as also at the end of the work where the title is given as **नित्याद्यवतारभेद-प्रकाशिका**. The work gives an account of some of the religious sects of the Hindus, describes the origin of various deities including some of the Mahāvidyās and some of the incarnations of Viṣṇu, and points out the characteristics of their worship.

Beginning:—

श्रीदक्षिणामूर्त्तिगुरुभ्यो नमः ।

श्रीशक्तिसंगमतन्त्रे [I. 8. 38–50]

देव्युवाच ।

देवेश श्रोतुमिच्छामि विष्णुभेदान् शिवस्य च ।
वैखानसो भवेदादौ श्रीराधावल्लभौ तथा ॥
गोकुलेशो महेशानि तथा वृन्दावनी भवेत् ।
पाञ्चरात्रं पञ्चमं स्यात् षष्ठः श्रीवैष्णवः ॥
रामानन्दी हरिव्यासी निम्बार्कश्च महेश्वरि ।
ततो भागवतो देवि दश भेदाः प्रकीर्त्तिताः ॥
शिखी मुण्डी जटी चैव द्विचिदण्डी क्रमेण च ।
एकदण्डी महेशानि वीरशैवस्तथैव च ॥
सप्त पाशुपताः प्रोक्ताः दशधा वैष्णवा मताः ।
एतेषां वासनां देवि शृणु यत्नेन शाम्भवि ॥

वेवेष्टि सर्व्वं संव्याप्य यस्तिष्ठति स वैष्णवः ।
वैखानसादिदीक्षाद्यैः भूषितः स्मार्त्तवैष्णवः ॥
श्रीराधावल्लभं देवि भृगु यत्नेन शाम्भवि ।
वैष्णवाचारनिरतो विष्णु·न्त्रैकपारगः ॥
अनन्यचेताः शान्तात्मा विष्णुचिह्नपरायणः ।
श्रीराधावल्लभो देवि गोकुलेशं भृगु प्रिये ॥
नानाभूषणसम्पन्नो नानासौगन्धभूषितः ।
गवां कुलं प्रीणयिता कालीकृष्णस्वरूपधृक् ॥
शरीरमर्थप्राणाश्च तस्मिन्निवेदकारकं ।
अन्तःशक्तिपरो देवि वहिर्वैष्णवरूपधृक् ॥
गन्धर्व्वाचारनिरतो लतावेष्टनतत्परः ।
सम्प्रदायो गोकुलेशः सर्व्वसिद्धिकरो भुवि ॥
वृन्दावनाख्यं देवेशि भृगु यत्नेन साम्प्रतम् ।
विगताघः प्रसन्नात्मा विष्णुभक्तिपरायणः ॥
कामिनीसङ्गचपलो वनक्रीड़ाविनोदधृक् ।
सौगन्धभूषिततनुः स्त्रीध्यानैकपरायणः ॥
विष्णुस्वारूप्यतत्त्वज्ञः प्रोक्तो वृन्दावनी शिवे ॥

6222.

6012. **तन्त्रसिद्धान्तकौमुदी ।** *Tantrasiddhāntakaumudī.*

Substance, country-made paper. 12 × 5 inches. Folia, 6. Lines, 10 on a page. Extent in ślokas, 170. Character, Nāgara. Appearance, fresh. Complete in three chapters.

This work deals in short with the philosophy of the Tantras. Of the works and authors referred to, mention may be made of मृत्युजित्भट्टारक, विज्ञानभैरव (1B), प्रत्यभिज्ञा, स्वच्छन्द (2A), भर्गशिखा वीरावलि, मालिनीविजय (2B), कुलयुक्ति, मृत्युञ्जयभट्टारक, लक्ष्मीकौलार्णव (3A), ज्ञानार्णव, सर्वज्ञानोत्तर, तन्त्रसद्भाव, श्रीकण्ठीयसंहिता (4A) and देवीयामल (4B).

Beginning:—

श्रीगणेशाय नमः। श्रीदक्षिणामूर्त्तिगुरुभ्यो नमः।

अनाद्यायाखिलाद्याय मायिने गतमायिने।

अरूपाय सरूपाय दक्षिणामूर्त्तये नमः॥

नत्वा श्रीशङ्कराचार्य्यचरणाम्भोरुहद्वयम्।

काशीनाथः प्रकुरुते तन्त्रसिद्धान्तकौमुदीम्॥

तत्र प्रथमं नरेश्वरभेदवादिप्रातिपक्ष्येण चैतन्यपरमार्थः शिव एव विश्वस्य आत्मा इत्यादिश्रुतिः। चैतन्यमात्मा। इच्छाचेति-तस्य कस्यापि सत्त्वाभावात् चितिक्रिया सर्व्वसामान्यरूपेति। चेतयतीति चेतनः सर्व्वज्ञानक्रियास्वतन्त्रस्तस्य भावः चैतन्यं सर्व्वज्ञान-क्रियासम्बन्धमयं परिपूर्णस्वातन्त्र्यमुच्यते। तच्च परमशिवस्यैव भगवतोऽस्ति।

End:—

देहप्राणसुखादिभिः प्रतिकलं संरुध्यमानो जनः

पूर्णानन्दघनामिमां न चिनुते स्वादेश्वरीं स्वां चितिम्।

तां वै बोधसुधाब्धिविश्वमभितस्तत्फेनपिण्डोपमं

यः पश्यत्युपदेशतस्तु कथितः साक्षात् स एकः शिवः॥

Colophons of the different chapters:—

3B. इति श्रीमद्भडोपनामकजयरामभट्टसुत-वाराणसीगर्भसम्भव-काशीनाथ-विरचितायां तन्त्रसिद्धान्तकौमुद्यां शाम्भवोपायप्रदर्शनं नाम प्रथम-प्रकाशः; 5A, ०शाक्तोपायप्रदर्शनं नाम द्वितीयप्रकाशः; 6A, ०आणवोपायप्रदर्शनं तृतीय-प्रकाशः।

6223.

6531. *Tantrasiddhāntakaumudī.*

Substance, country-made paper. $10\frac{1}{2} \times 6\frac{1}{2}$ inches. Folia, 8. Lines, 10 on a page. Extent in ślokas, 150. Character, Nāgara. Date, Saṃvat 1961. Appearance, fresh. Complete in three chapters.

Post-colophon Statement:—

श्रीदक्षिणामूर्त्तिगुरुभ्यो नमः। सं १९६[१?] मौः आवण
वदी १०। मालवीयबालमुकुन्दस्येदं पुस्तकम्।

6224.

6522. मन्त्रसिद्धान्तमञ्जरी। *Mantrasiddhāntamañjarī.*

Substance, country-made paper. $9\frac{3}{4} \times 5$ inches. Folia, 6. Lines, 8 on a page. Extent in ślokas, 70. Character, Nāgara. Date, Saṃvat 1961. Appearance, fresh. Complete.

The work which is divided into three sections gives in a general way the inner sense of *mantras*, as referring to the Supreme Being, speaks of different types of initiation meant for different rites and followers of different sects, and enumerates thirty-two kinds of shortcomings of human beings.

Beginning:—

श्रीगणेशाय नमः। श्रीदक्षिणामूर्त्तिगुरुभ्यो नमः।
दक्षिणामूर्त्तिपादाब्जभ्रमरीभूतमानसः।
काश्मीनाथः प्रतनुते मन्त्रसिद्धान्तमञ्जरी[म्] ॥
अथातः सर्व्वमन्त्राणां देवता ब्रह्म मायया।
शवलितं ब्रह्म तत्तु ब्रह्मेन्द्राग्न्यादिनामकम् ॥
पृथक् पृथगुपाधेस्तु वस्तुतो ब्रह्म केवलम्।
निरास्पदं स्वसंवेद्यं सच्चिदानन्दलक्षणम् ॥

... ...

मन्त्रेषु नाममात्रे तु सत्तैव हि विभक्तयः ॥
तासामर्थः[र्थं?] प्रथम[त]स्तुक्त्वा मन्त्रार्थ उच्यते।
यन्नाम्नः प्रातिपदिकं तेनात्मा ब्रह्म लक्ष्यते ॥

2A, सर्वत्र चतुर्थ्यन्तपदे यत्प्रातिपदिकं तद्ब्रह्मा।
नमः स्वाहादियोगेन ब्रह्मात्मैक्यं स्फुटं मनौ ॥

Colophon:—

इति श्रीभङोपनामककाशीनाथविरचिता मन्त्रसिद्धान्तमञ्जरी समाप्ता ।

6225.

5911. **वैदिकतान्त्रिकाधिकारनिर्णयः** । *Vaidikatāntrikādhikāranirṇaya.*

Substance, country-made paper. 12 × 5 inches. Folia, 4. Lines, 10 on a page. Extent in ślokas, 100. Character, Nāgara. Appearance, fresh. Complete.

This work shows how particular classes of Tantras are meant for particular classes of worshippers. Of the works and authors referred to, mention may be made of **विद्यारण्य** (1B), **पुरुषार्थप्रबोध** (2A, B) and **अनन्तभट्ट** (3B), maternal grandfather of the author.

Beginning:—

श्रीदक्षिणामूर्त्तिगुरुभ्यो नमः ।

अथ वैदिकतान्त्रिकादीनामधिकारनिर्णयः ।

शुद्धवैदिकः, तान्त्रिकवैदिकः, शुद्धतान्त्रिकः, वैदिकतान्त्रिकः, एते चत्वार आत्मज्ञाः स्वस्वकर्म्मानुसारतः ।

मार्गाधिकारिणः प्रोक्ताः शिवेन परमात्मना ॥

तन्त्रगन्धं न सहते यः सोऽयं शुद्धवैदिकः ।

सतन्त्रांश्रुतिप्रीतः प्रोक्तस्तान्त्रिकवैदिकः ॥

वेदगन्धं न सहते यः सोऽयं शुद्धतान्त्रिकः ।

सवेदाङ्गागमः प्रोक्तो योऽसौ वैदिकतान्त्रिकः ॥

वेदे वेदानुकूले च अधिकारी तु वैदिकः ।

तन्त्रोपसर्ज्जने शास्त्रेऽधिक[ङ्ग ?]न्तांत्रिकवैदिकः ॥

वेदगन्धासहे तन्त्रेऽधिकारी शुद्धतान्त्रिकः ।

वेदोपसर्ज्जने तन्त्रेऽधिकारी वैदिकतान्त्रिकः ॥

श्रीमद्विद्यारण्यचरणास्तु ।

सस्तुतसंहितं यत्तु भागधेयं पराग्गरम् ।
शुद्धवैदिकमित्युक्तं विद्वद्भिः शुद्धवैदिकैः ॥
शिवराघवसंवादवायवीयादिकं बुधैः ।
वेदागमविभागज्ञैः प्रोक्तं तान्त्रिकवैदिकम् ॥
वेदगन्धासहं तन्त्रं सोयं पाशुपतादिकम् ।
शुद्धतन्त्रमिति प्रोक्तं वेदतन्त्रार्थकोविदैः ॥
पञ्चरात्रं भागवतं शैवसिद्धान्तसंज्ञितम् ।
सर्व्वमेतन्महाप्राज्ञैः प्रोक्तं वैदिकतान्त्रिकम् ॥
पाणिनीयं जैमिनीयं शास्त्रं वैयासिकं तथा ।
भाष्यं यद्भगवत्पादैः प्रोक्तं तच्छुद्धवैदिकम् ॥
अक्षपादीयकाणादकापिलानि तथैव च ।
पातञ्जलं च तत्सर्व्वं प्रोक्तं तान्त्रिकवैदिकम् ॥
शारदातिलकं तद्वत् मन्त्रदेवप्रकाशिका ।
प्रपञ्चसारं चाशेषं प्रोक्तं वैदिकतान्त्रिकम् ॥

Colophon :—

इति श्रीमद्भडोपनामकदक्षिणाचारमतप्रवर्त्तकशाम्भवीनाथेन विरचितः वैदिकतान्त्रिकाधिकारनिर्णयः समाप्तः ।

6226.

5910. **आगमोत्पत्त्यादिवैदिकतान्त्रिकनिर्णयः** । *Āgamot-pattyādivaidikatāntrikanirṇaya.*

Substance, country-made paper. 12 × 5 inches. Folia, 11. Lines, 10 on a page. Extent in ślokas, 330. Character, Nāgara. Appearance, fresh. Complete.

The work, which is called *Āgamotpattinirṇaya* in one of the introductory verses, concerns itself not only with a description of the origin of the Tantras and an enumeration of the important Tantric texts but incidentally gives

an account of various Tantric rites, especially the sacraments meant for a follower of the Tantras. It is presumably on account of the variety of topics dealt with that the work is called *Āgamotpattyādivaidikatāntrikanirṇaya* in the last colophon.

Beginning:—

श्रीदक्षिणामूर्त्तिगुरुभ्यो नमः ।

अनन्ताख्यं गुरुं नौमि कवित्वप्रतिभाकरम् ।
प्राखुवल्लीजलधरं स्फुरत्कीर्त्तिकरं परम् ॥
नत्वा श्रीदक्षिणामूर्त्तिचरणाम्भोरुहद्वयम् ।
काश्मीनाथः प्रतनुते आगमोत्पत्तिनिर्णयम् ॥

तत्र रुद्रयामले ।

देव्युवाच ।

त्राहि त्राहि महादेव शरणागतवत्सल ।
साहङ्कारा वयं मूढ़ा ईश्वरा इति वादिनः ॥
महाकालः कथं ज्ञेयः कथं मुक्तिर्भवेच्छिव ।
मुक्तिः [च] कतिधा देव श्रेष्ठा का किञ्च साधनम् ॥
वदास्माकं यदि कृपा देव्यां विष्णौ सुरेषु च ।

ईश्वर उवाच ।

ज्ञायते तत्प्रभावेण सकलं वेदवाक्यतः ॥
वेदेभ्यः सारमुद्धृत्य यत्कृतं शङ्करेण वै ।
वेदाधिक्षतया देवि आगमः परिकीर्त्तितः ॥
आगतं शिववक्त्रेभ्यो गतं च गिरिजामुखम् ।
मतत्रयविनाशित्वात् तस्मादागम उच्यते ॥
आगमोत्पत्तिसंख्ये च कथ्यते शृणु साम्प्रतम् ।
सार्द्धवर्षाष्टको ब्रह्मा यदा जातस्तु देवता ॥
अहंकारो महान् जातस्तच्च विद्याप्रभावतः ।
तदा तस्मिन् कलियुगे शिश्नोदरपरायणाः ॥

नादृतास्तैस्तु वेदादिस्मृतयो वै वृथागमे ।
खानं पानं मैथुनञ्च देवी देवी पुरे पुरे ॥
न कश्चिन्मन्यते विष्णुं गणेशं न रविं शिवम् ।
मत्वा सर्व्वे जगच्छास्तां भ्रान्तपूजां प्रकुर्व्वते ॥
तदा वटुकरूपेण मया दृष्टः पितामहः ।
ब्रह्मणादिश्यतां धर्म्मो वयं येन तरेमहि ॥
तदा तु ब्रह्मणा प्रोक्तं ममोर्द्ध्वमुखनिर्गतः ।
आगमः पञ्चमो वेदः भुक्तिमुक्तिप्रदायकः ॥
तदाद्य कलिसंघे तु मया प्रोक्तः पितामहः ।
ब्रह्मणेदं त्वया वाच्यं सृष्टिकर्त्ता सदाशिवः ॥
तदा पितामहेनोक्तं कर्त्ताहं चापि रक्षकः ।
ममोर्द्ध्वमुखतो जातं मन्यसे चान्य आगमः ॥
एवं तवाचारनिष्ठा यास्यन्ति परमां गतिम् ।
वदुक्त्वं वत्स नो सौख्यं खागपानाङ्गनाभवम् ॥
इति श्रुत्वा ब्रह्मवचो धर्म्मसंस्थापनाय तु ।
युगत्रयं तदा जातं क्रोधसंरक्तलोचनम् ॥
अवज्ञां वीक्ष्य धातुश्च प्रखरेण नखेन च ।
शिरो निपातितं धातुः कराङ्गुल्या धरातले ॥
तन्मुखात् पञ्चमो वेदो मम देहे लयं गतः ।
तस्मादागमकर्त्ताहं वेदकर्त्ता पितामहः ॥
पञ्चाशद्वै महापद्मो ह्यागमग्रन्थ ईरितः ।
तच्च मन्त्रा महादेवि सर्व्वेपि सुप्रतिष्ठिता ॥
त्रिंशन्निखर्व्वषड्वृन्दनवत्यर्व्वुदकोटयः ।
मन्त्राः प्रोक्ता महेशानि त्वागमे कुत्र किं स्थितम् ॥
तत् शृणु त्वं महेशानि यद्यहं तव वल्लभः ।
पञ्चाशच्च महापद्मं षड्विंशति भुवि स्थितम् ॥
चतुर्दश स्थितं स्वर्गो [र्गे ?] दश पातालगोचरम् ।
एवं क्रमेण देवेशि ह्यागमः कथितो मया ॥

A list of Tantra works is given in Fol. 2A:—

कुमारी-योगिनी-काली-वाराही-कुब्जिका परा ।
नारायणी मुण्डमाला चामुण्डा भुवनेश्वरी ॥
गौतमी समया सौम्यामणिर्विजयमालिनी ।
लीलावती गुह्यसिद्धिर्मालिनी परमेश्वरी ॥
प्रचण्डचण्डिका-प्रम्भू नित्या कात्यायनीति च ।
फेत्कारी भैरवी भूतसिद्धिः सिद्धेश्वरी तथा ॥
मेरुनीलमतङ्गाश्च प्रक्षिसंगमभैरवौ ।
साङ्ख्यायनं किरणाख्यं गन्धर्व्वभूतभैरवौ ॥
वीरार्द्दनं वीरभद्रं रुद्रकालानरो[लो ?]त्तरे ।
सिद्धसारस्वतं हाहाराव्रो मन्थानभैरवः ॥
सिद्धेश्वरो विश्वसारस्तथा बौधायनं पुनः ।
माहेश्वर-महाहारौ कालाग्निश्च मतान्यपि ॥
एतेषां सप्ततो ज्ञेयस्तन्त्रशब्दः पृथक् पृथक् ।
सिद्धनाथो महाकालो दक्षिणामूर्त्तिरेव च ॥
सुरेन्द्रब्रह्मगोरक्षा वैष्णम्यायनमेव च ।
नन्दिकेश्वरवायव्यौ वाराही शाम्भवीति च ॥
सनत्कुमारः श्रीकण्ठो ह्यगस्त्यतत्त्वसारकौ ।
वसिष्ठः पुनरेतेषां अन्ते स्यात् संहिताभिधा ॥
ब्रह्मविष्णुरुद्रसिद्धदेव्युमाचन्द्रशक्तयः ।
एतेषामन्ततो ज्ञेयं यामलं चाष्टसंख्यकम् ॥

Colophons and sectional headings:—

2A, इत्यागमोत्पत्तिः ; 2B, अथ युगधर्मानाह ; 3B, अथ कौलिकवैदिक-कर्मविचारः ; 4B, अथ षोडश संस्काराः ; 5B, अथ जातकर्म्माख्यसंस्कारः ; अथ नामप्रदानाख्यसंस्कारः ; 6A, अथान्नप्राशनसंस्कारः ; अथ चौलाख्यसंस्कारः ; 6B, अथ मौञ्जीबन्धाख्यसंस्कारः ; अथ प्राजापत्यव्रताख्यसंस्कारः ; अथ सौम्यव्रत-संस्कारः ; अथ आग्नेयाख्यसंस्कारः ; 7A, अथ वैश्वदेवाख्यसंस्कारः ; अथ

गोदानाख्यसंस्कारः ; 7B, अथ समावर्त्तनाख्यसंस्कारः ; अथ विवाहाख्यसंस्कारः ; अथ पितृमेधाख्यसंस्कारः ; 8A, इति षोडश संस्काराः ; अथ स्वप्ने लब्धमन्त्रोपासनाक्रममाह ; अथ पूर्णाभिषेकप्रकारमाह ; 9A, इति बृहत्तन्त्रराजोक्तमार्गद्वयस्य पूर्णाभिषेकविधिप्रकारः ; 9B, अथ महाविद्यायाः षडाम्नायप्रकारमाह ; अथ श्रीविद्यायन्त्रधारणमाहात्म्यम् ; 10A, [वामिनामन्त्येष्टिक्रिया] ; इति श्रीमद्भडोपनामकजयरामभट्टसुतवाराणसीगर्भसम्भवकाम्पीनाथविरचित आगमोत्पत्त्यादिवैदिकतान्त्रिकनिर्णयः समाप्तः ।

6227.

6014. तन्त्रभूषा । *Tantrabhūṣā.*

Substance, country-made paper. $11\frac{3}{4} \times 5$ inches. Folia, 8. Lines, 10 on a page. Extent in ślokas, 200. Character, Nāgara. Appearance, fresh. Complete.

The work seeks to establish the authoritativeness of the Tantras. Of the works and authors referred to, mention may be made of—शङ्कराचार्यकृतसंग्रह (2A), भट्टोजिदीक्षित (4A) and प्रपञ्चसारविवरण (5B).

Beginning:—

श्रीगणेशाय नमः ।

श्रीदक्षिणामूर्त्तिगुरुभ्यो नमः ।

वाराणसीमहं वन्दे सच्चिदानन्दरूपिणीम् ।

मा[ट]रूपेण सततं सहस्रारेऽखिलेष्टदाम् ॥

नत्वा श्रीदक्षिणामूर्त्तिचरणाम्भोरुहद्वयम् ।

काम्पीनाथः प्रतनुते तन्त्रभूषां समासतः ॥

तत्र ईश्वरः सर्व्वा अपि श्रुतीः भवपाशबद्धानां जन्तूनां स्वर्गाय मुक्तये च समुपदिशति स्म। अन्येषां स्मृतिशास्त्रादीनां तन्मूलकत्वेन च प्रामाण्यमिति सुप्रसिद्धतरम् । अस्यास्त्वागमस्मृतेः कथं तन्मूलक-

त्वमिति चेदुच्यते। सर्व्वासु श्रुतिषु काण्डत्रयम् कर्म्मोपासना-ब्रह्मभेदेन। तत्र कर्म्मकाण्डं जैमिनिप्रभृतिभिः सम्यक्तया विवृतम्। इदमुपासनाकाण्डं परशुरामनारदहयग्रीवशिवविष्ण्वादिभिः। ब्रह्म-काण्डं भगवद्व्यासादिभिरिति श्रुतिमूलकतास्य प्रत्यक्षोपलब्धा। श्रुति-मूलकता च त्रिपुरापूर्व्वोत्तरतापनीय-शिवपूर्व्वोत्तरतापनीय-नृसिंह-पूर्व्वोत्तरतापनीय-रामपूर्व्वोत्तरतापनीय-गोपालपूर्व्वोत्तरतापनीय-गणेशपूर्व्वोत्तरतापनीय-दक्षिणामूर्त्त्युपनिषदादि-कालीतारात्रिपुरा-बालाभुवनेश्वरीवगलागणेशवासुदेवाद्युपनिषदादि-सौराष्टाक्षरनारा-यणाष्टाक्षरशैवपञ्चाक्षरात्मिकश्रुतिभ्यः अनुसाक्षादुपलभ्यत एव।

Colophon:—

6B, इति श्रीमद्भडोपनामकजयरामभट्टसुतवाराणसीगर्भसम्भव-काशीनाथ-विरचिता तन्त्रभूषा समाप्ता।

After the colophon the work continues as follows:—

श्रीदक्षिणामूर्त्तिगुरुभ्यो नमः।

अथ वार्त्तिके शिष्टाचारपरित्यहवेदविरोधहेतोरुक्तेर्यत्र तारामन्त्र-श्रीविद्यादौ सुरामांसपूजापरस्त्रीसुरतादौ मन्त्रजपे वेदविरोधस्यैव आगमस्य अप्रामाण्यम्। यत्र पञ्चरात्रपाशुपतादिधर्मे सन्ध्याग्नि-होत्रादि-श्रौतस्मार्त्तकर्म्मबाधो भूतशुद्धिमातृकान्यासाद्यैर्जन्यपाप-नाशात् तत्रैव पूर्व्वोक्तहेतुभ्यामप्रामाण्यम्। न सर्व्वत्र।

Another colophon in a later hand is found at the end:—

इति तन्त्रभूषा समाप्ता।

6228.

Harilāla.

10123. धर्मवितानम्। *Dharmavitāna.*

Substance, country-made paper. 9 × 6 inches. Folia, 20. Lines, 21 on a page. Extent in ślokas, 420. Character, Nāgara. Appearance, old and discoloured. Complete.

The present work seeks to demonstrate the authoritativeness of the Tantras. In this connection spiritual interpretations are suggested of apparently revolting and nauseating statements concerning the use of wine, women, etc. (Fol. 8Aff).

Beginning:—

ज्ञानानन्दमयं समाधिकरणं वेदोक्तमार्गापरं
यज्ञैः केपि यजन्ति भक्तिचतुरा भक्त्या भजन्ति प्रभुम् ।
यं कालं गणयन्ति केपि कवयो ब्रह्मेति तेजोमयं
तं शम्भुं प्रणमामि योगसुलभं लौकैकदुःखापहम् ॥ १ ॥
... ...
महीभृतो महामाना यत्पादं मूर्ध्नारूरुह[न्](त्)।
धर्मप्रवर्त्तने ख्यातो भवानीदासभास्करः ॥
तत्पुत्रो हरिलालो धर्म्मघर्म्मसुतप्तहृत्पद्मनाम् ।
तनुते धर्म्मवितानं शिवविष्णुतत्त्वसम्मतं मत्वा ॥ [६] ॥

End:—

भूयाद्धर्म्मवितानं श्रुतिवंशस्य गुणसम्पन्नम् ।
हृत्तम्भेन निबद्धं विस्तृतमानं सतां भूत्यै ॥
श्रीसारस्वतवंशे किंग्रणाजातिः सुसम्मता शिष्टैः ।
तत्र चतुर्भुजपुत्रो मिश्रमलूकचन्द्र इह धन्यः ॥
तत्तनुजो मिश्रेशो भवानीदास इति विश्रुतो लोके ।
तत्पुत्रो हरिलालो धर्म्मवितानं तनोति स्म ॥
ग्रहमुनिवरगिरिभेशे विक्रमसूर्य्यात्समागते वर्षे ।
शुक्रमासशुचिपक्षे मदनतिथौ गुरुदिवसे पूर्णम् ॥

6229.

Kṛṣṇadeva.

3472. चिदानन्दमन्दाकिनी। *Cidānandamandākinī.*

Substance, country-made paper. $13\frac{3}{4} \times 3\frac{1}{2}$ inches. Folia, 54, of which 2 to 8 and 20 to 36 are missing. Lines, 9 on a page. Extent in ślokas, 2,000.

Character, Bengali. Date, Śaka 1635. Appearance, discoloured. Complete in eight chapters.

The work deals with the philosophy of the Tantras and the esoterics of the Tantra rites.

Beginning:—

ॐ नमः परायै ।

नत्वा श्रीनाथपादाम्बुजनिजपरमानन्दसन्धानकन्दं
वन्दे चन्द्रार्कटन्दोत्कररुचिरुचिरां सच्चिदानन्दरूपाम् ।
गीर्व्वाणानामचिन्त्यां प्रणतजनचिदानन्दसन्दोहदत्तां
पूर्णेन्दूनामनेकैरनुमितवदनां भावयन् शब्दभूताम् ॥
जगन्मातुरादेशमासाद्य सम्यौ
प्रपञ्चार्णवोत्तारणे कारणं यत् ।
तदस्मिन् परं ब्रह्मतत्त्वं सगुप्तं
प्रकाशीकृतं साधकानां हिताय ॥
शिवाभिन्नमद्वन्द्वमाकाशकल्पं
शिवं निर्गुणं निर्म्मलं निष्क्रियञ्च ।
त्रिमूर्त्यात्मकं मूलभूतं गुणानां
प्रपद्ये परात्मानमानन्दकन्दम् ॥
प्रणम्यासुमोक्षप्रदामादिशक्तिं
कृता श्रीमता कृष्णदेवेन सम्यक् ।
मुदा ज्ञानमार्गप्रकाशैकहेतु-
श्चिदानन्दमन्दाकिनी पावनीयम् ॥
श्रियं श्रीपतिं भोगमोक्षैककन्दं
सदाशुद्धसत्त्वोदयानन्दछन्दम् ।
प्रणम्य पृथिव्यां विनम्रेण मूर्द्धा
गणः कृष्णदेवस्तनोतीह तत्त्वम् ॥

सितसरसिजमध्ये भारतीं शुभ्रवर्णां
करविनिहितवीणां वादयन्तीं सुखेन ।
विगलदमृतधारां वाङ्मयीं ज्ञानसारा-
मभिमतवरसिद्धौ सिद्धरूपां नमामि ॥

ननु केषाञ्चिन्मते ग्रन्थकर्त्तुर्गुरुत्वात् शूद्रकर्त्तृकग्रन्थपाठे यद्ब्राह्मणस्य निषेधस्तत्सामान्यशास्त्रपाठे ज्ञेयः। ज्ञानशास्त्रे तु नायं नियमः। जनकात् शुकदेवस्य ज्ञानोपदेशश्रवणात् व्याधतो मुनिपुत्रस्यापि तथा दर्शनाच्च सूतमुखात् शौनकादीनां पुराणश्रवणाच्च ।

End :—

सुरा शक्तिः शिवो मांसं तद्भोक्ता भैरवः स्वयम् ।
तयोरैक्यसमुत्पन्न आनन्दो मोक्ष उच्यते ॥
आनन्दं ब्रह्मणो रूपं तच्च देहे व्यवस्थितम् ।
तस्याभिव्यञ्जकं द्रव्यं योगिभिस्तेन पीयते ॥
लिङ्गत्रयविशेषज्ञः षट्चक्रपद्मभेदनः ।
पीठस्थानानि चागत्य महापद्मवनं व्रजेत् ॥
आमूलाधारमाब्रह्मरन्ध्रं गत्वा पुनः पुनः ।
चिच्चन्द्रे कुण्डलीशक्तिः सा शिवस्य महोदयः ॥
व्योमपङ्कजनिस्यन्दधारापानरतो नरः ।
मधुपानमिदं देवि चेतरं मद्यपानकम् ॥
पुण्यापुण्यपशुं हत्वा ज्ञानखड्गेन योगवित् ।
शिवे लयं लभेच्चित्तं पलाशीति निगद्यते ॥
मनसा इन्द्रियगणं संयम्यात्मनि योजयेत् ।
मांसाशी स भवेद्देवि इतरे प्राणघातकाः ॥
परशक्त्यात्ममिथुनं संयोगानन्दनिर्भराः ।
युक्तास्ते मैथुनं तत् स्यात् इतरे स्त्रीनिषेवकाः ॥

इति कुलाचारः ॥

Available colophons:—

16B, इति चिदानन्दमन्दाकिन्यां मङ्गलामोक्षादिनिरूपणं नाम द्वितीयस्तरङ्गः; 18B, इति चिदानन्दमन्दाकिन्यां प्रकृतित्वेनैव साक्षान्निरञ्जनाविर्भावनिरूपणेन तत्प्राधान्यकथनं नाम तृतीयस्तरङ्गः; 40B, ०जपानुष्ठानादिविवेचनं नाम षष्ठस्तरङ्गः; 47B, ०भावनिरूपणं नाम सप्तमस्तरङ्गः; 54A, ०शारीरयोगसाधनादिनिरूपणं नामाष्टमस्तरङ्गः। इति धरामरचरणसरोजरेणुपुञ्जरञ्जितकलेवरनवभ्रमरश्रीकृष्णदेवगणसंगृहीता चिदानन्दमन्दाकिनी समाप्ता ॥

The date of copying of the MS:—

शकाब्दे मिते वाणकालर्त्तुचन्द्रे
शुचौ मासि कृष्णे तिथौ वै चतुर्थ्याम्।
गुरोः पादपद्मं प्रणम्य व्यलेखीत्
चिदानन्दमन्दाकिनीं वाणशर्मा ॥
लिखितामतियत्नेन पुस्तीं प्राणपणेन च।
खलो हरेत् प्रमादेन तस्य कष्टं भविष्यति ॥
श्रीरस्तु लेखके मयि ॥

6230.

Gopālapañcānana.

5097. **तन्त्रदीपिका।** *Tantradīpikā.*

Substance, country-made paper. 16 × 3½ inches. Folia, 3 to 196 with the following folia missing: 6, 53, 117, 123 and 124. Lines, 6 on a page. Extent in ślokas, 4,500. Character, Bengali (written in different hands). Appearance, old and discoloured. Incomplete.

The author is stated to be the son of Harināṭha Bhaṭṭācārya, and grandson of Āgamavāgīśa.

This is a comprehensive compilation. Two MSS of it are fully described in L. VI. 2202 and HPR. I. 138.

There is only one colophon in the manuscript on Fol. 35A :—

इति आगमवागीशपौत्र-हरिनाथभट्टाचार्य्यात्मज-श्रीगोपाल-पञ्चाननविरचितायां तन्त्रदीपिकायां प्रथमः परिच्छेदः ।

A batch of leaves (numbered 116–129) found along with the present MS seems also to belong to the present work if not to the present MS. A colophon found in Fol. 121A of this portion runs:—

इति गणेशादिपूजाक्रमः चतुर्थः परिच्छेदः ।

Of works and authors referred to, mention may be made of the following:—

दीक्षातन्त्रधृतशिवपुराण (7A), आचार्य्यधृतरुद्रतन्त्र (64A), कामरूपीय-निबन्धधृततन्त्रराज (69B), पुरश्चरणचन्द्रिका (99B), क्रमदीपिका (111B), शारदा (112A and in many other places), राघवभट्टधृततन्त्रार्णव (120A), गूढार्थदीपिकाधृतवचन (122B), रामार्चनचन्द्रिका (122B), रत्नधृत-सिद्धेश्वरतन्त्र (128A), रहस्यधृतस्वतन्त्र (128B), रत्नधृतकालीकुलार्णव (132A), रहस्यधृतसिद्धसारस्वतन्त्र (134B).

6231.

Śrīnivāsa Bhaṭṭa.

11306. शिवार्चनचन्द्रिका । *Śivārcanacandrikā.*

Substance, country-made yellow paper. $13\frac{1}{2} \times 6\frac{1}{2}$ inches. Folia, 1–502. Lines, 12 on a page. Extent in ślokas, 18,000. Character, Nāgara. Appearance, fresh. Complete in 46 chapters.

The work deals with Tantra rites in general (initiation, daily worship, *puraścaraṇa*, etc.—chapters I–XV) and with the rituals of Gaṇeśa (chapters XVI–XIX), Śakti (chapters XX–XXXI), Viṣṇu (XXXII–XL), Sun (chapter XLI) and Śiva (chapters XLII–XLVI). MSS of the work are noticed in Ben., p. 320 and ASB, p. 202, Peters. I, p. 120, Bik. No. 1332.

Beginning:—

श्रीमन्तं सिन्दूरास्यं शशिशकलधरं बन्धुजीवाभिरामं
दानाद्रि[:] सिक्तगण्डस्खलदलिकलभान् लीलया खेलयन्तम् ।
प्रत्यूहध्वान्तभानुं एथुतरजठरं ब्रह्मविष्ण्वीशवन्द्यं
वन्दे सिन्दूरपूरैर्गिरिवरसुतया चर्चितोत्तुङ्गकुम्भम् ॥

... ...

... ...

श्रीमत्सुन्दरदेशिकेन्द्रचरणद्वन्द्वारविन्दं मुऊ-
र्वन्दे वन्दकमन्दभाग्यतिमिरप्रध्वंसभानूदयम् ।
यद्दृष्ट्येव बुधास्चराचरमिदं जानन्ति मायामयं
यन्नत्वाच्च सदा करामलकवत् पश्यन्ति चाद्यं महः ॥
देशोऽस्ति दक्षिणदिशि द्रविडाभिधानः
काञ्चीति यत्र वसतिः स्मरशासनस्य ।
पुण्या पुरी पुरनिसूदनभागधेयं
सौभाग्यदन्तुरितकीर्तिरचञ्चलश्रीः ॥
आविर्बभूव हयमेधमखे विरिञ्चे-
र्यत्र स्वयं स भगवानुमया रमेशः ।
अद्यापीहास्ति गिरिनाथ इति प्रसिद्धः
संदृश्यते सकललोकसमर्चिताङ्घ्रिः ॥
तस्या दक्षिणदिग्गतः क्षितिसुरैः
षट्शास्त्रविद्भिश्चतुर्वेदैः सोपनिषद्भि-
रङ्गसहितैराद्यैः सदाधिष्ठितः ॥
योऽनन्त इति विश्रुतः क्षितितलेऽप्येनानदीतीरभू-
देशे यागमहाकुलसकलदिक्वास्तेग्रहारो महान् ।
आत्रेयगोत्रप्रतपत्रविकाशमित्र-
स्तत्रातिरात्रसुमहाव्रतसत्रकर्ता ।
भर्तार्तदीनकृपणान्धसुहृज्जनानां
षट्शास्त्रवित्समरपुङ्गवदीक्षितोऽभूत् ॥

तस्यात्मजः फणिपतिर्वरपाणिनीये
मीमांसकेष्वपि गुरुः श्रुतिषु स्वयम्भुः ।
सद्दादसाङ्गचयनान्वितवाजपेय-
सोमाध्वरी भुवि तिमुम्मलदीक्षितोऽभूत् ॥
तन्नन्दनः सकलवेदविदां वरिष्ठः
श्रौतक्रियासु निपुणः श्रितसोमदीक्षः ।
आसीदशेषगुणरत्ननिधिः पृथिव्यां
श्रीश्रीनिकेतन इति प्रथितोध्वरीन्द्रः ॥
तत्सूनुः श्रीनिवासः सकलनिगमवित्सर्वशास्त्रार्थवेत्ता
श्रौतस्मार्तेषु कर्मस्वतिशयनिपुणः सत्कविः स्वीयदेशात् ।
पीठं जालन्धराख्यं प्रकटितविभवं प्राप्य याचाप्रसङ्गात्
तच्च श्रीसुन्दराख्यं सकलगुणनिधिं प्राप्य स[द्]देशिकेन्द्रम् ॥
तत्पादपङ्कजयुगं परिचर्य तस्मात्
प्राप्याभिषेकमखिलागममप्यधीत्य ।
तस्याज्ञया समधिगम्य पुरीं स काञ्चीं
तच्चाकरोदसतिमात्मविदां वरिष्ठः ॥
तच्च स्थितः सकलतन्त्ररहस्यवेत्ता
शिष्यैः शिवार्चनपरैः श्रितशैवदीक्षैः ।
अभ्यर्थितो वितनुते सकलागमार्थ-
सारोदयां भुवि शिवार्चनचन्द्रिकां सः ॥

This is followed by a detailed and versified list of contents of the work.

End:—

चत्वारोऽत्र कृता ग्रन्था मया ह्यागमदर्शने ।
निदेशादेशिकेन्द्रस्य मन्त्रप्रश्नप्रवृत्तये ॥
तत्राद्यः पारिजाताख्यो भैरवार्चापदादिकः ।
अन्यो रत्नाकराख्यः स्यात् श्रीसौभाग्यपदादिकः ॥

तृतीयः कल्पवल्लयाख्यः सपर्य्याक्रमपूर्वकः ।
चतुर्थस्याभिधानं तु श्रीशिवार्च[न]चन्द्रिका ॥
तेष्वाद्ये भैरवार्चोक्ता श्रीर्विचार्य[ा] द्वितीयके ।
तृतीये सप्तशत्याख्यमालामन्त्रवर्णयोः ॥
विधि(ि)र्वरच्यतः सम्यक् सपर्य्यायां सुविस्तरः ।
पञ्चायतनमन्त्राणां चतुर्थे विस्तरं कृतम् ॥
संसारसागरं घोरं तर्तुमिच्छन्ति ये नराः ।
अभ्यर्च्य देवतास्तेषां पोता एते मया कृताः ॥
एतेष्वेकं समारुह्य तल्लोकद्वीपमेत्य च ।
तत्र भुक्त्वाखिलान् भोगान् मुक्तिरत्नमवाप्नुयात् ॥
सुन्दराचार्यशिष्येण श्रीनिवासेन धीमता ।
षट्चत्वारिंशदगमत् प्रणीतायां प्रकाशकः ॥

The last verse is found *mutatis mutandis* at the end of every chapter.

Last Colophon :—

इति श्रीसुन्दराचार्यचरणारविन्दद्वन्द्वान्तेवासिना श्रीश्रीनिवास-भट्टेन विरचितायां श्रीशिवार्चनचन्द्रिकायां षट्चत्वारिंशः प्रकाशः ॥

6232.

Janārdana Gosvāmī.

8478. **मन्त्रचन्द्रिका** । *Mantracandrikā.*

Substance, country-made paper. $9\frac{1}{2} \times 4$ inches. Folia, 140. Lines, 8 on a page. Extent in ślokas, 2,600. Character, Nāgara. Appearance, fresh. Complete in 12 chapters.

This work deals with the mantras and peculiarities of worship of various deities arranged in five groups, e.g. Gaṇeśa, Śivā (Śakti), Kṛṣṇa, Sūrya and Śiva. MSS of the work have been described in Peters. IV. No. 1137 and

L. II. 911, the latter representing a shorter version in nine chapters which cover 11 chapters of the MS of the Society (as far as Fol. 129A). This version has only one benedictory verse in place of 9 in the other two MSS; the genealogical verses of the author are also not found here. According to one of these verses the work is based on the *Śivārcana-candrikā* of Śrīnivāsa, the grandfather of the author. The colophons of the Society's MS refer to the father of the author as will be clear from the last colophon quoted above.

Last Colophon:—

इति श्रीगोस्वामिजगन्निवासात्मजगोस्वामिजनार्दनभट्टविरचितायां मन्त्रचन्द्रिकायां [द्वा]दशः प्रकाशः

Post-colophon Statement:—

श्रीशुभमस्तु सं० १८५७ श्रावण ११ सु।

6233.

Yaśodhara.

5502. मन्त्राराधनदीपिका *Mantrārādhanadīpikā.*

Substance, country-made paper. 14½ × 7 inches. Folia, 1–74, 75. Lines, 12 on a page. Extent in ślokas, 2,190. Character, Nāgara. Appearance, discoloured. Incomplete.

A MS of the work, complete in 16 chapters, is described in *Ulwar* 2270. Extr. 654. The date of composition as given in the last verse in this description is 1488 Śaka. Of the 11 introductory verses given here, we have only two. IO. IV. 2581 describes an incomplete MS of the work. It deals with Tantric rites like *dīkṣā*, *vāstuyāga* and worship of various deities.

Beginning:—

श्रीविघ्नवैरिणे वज्रतुण्डाय नमः ।

यन्नामस्मरणेन पातकमलप्रक्षालनं जायते
यस्मिन् कर्णपथं गते तु सुमहत्पुण्योदयः प्राप्यते ।
यच्च न्यस्तमतिः प्रयाति पुरुषो मोक्षं महादुर्ल्लभं
[वं]दे तं परमेश्वरं त्रिजगतामाद्यन्तमध्येश्वरम् ॥
लक्ष्मीकान्तं नमस्कृत्य भवानीं तदनन्तरम् ।
यज्ञोधरेण क्रियते मन्त्राराधनदीपिका ॥
उच्यते प्रथमं तावत् ग्रन्थेऽस्मिन् लक्षणं गुरोः ।
गुरवो बहवः सन्ति दीपवच्च गृहे गृहे ॥
दुर्ल्लभोऽयं गुरुर्देवि सूर्य्यवत् सर्व्वदीपकः ।

तन्त्रराजे ।

सुन्दरः सुमुखः स्वच्छः सुलभो वज्रमन्त्रवित् ।
असंग्रयः संग्रयच्छित् निरपेक्षो गुरुर्मतः ॥

Colophons of the different chapters:—

9B, इति श्रीकंसारिमिश्रात्मजयज्ञोधरविरचितायां मन्त्राराधनदीपिकायां प्रथमः प्रकाशः; 22B, ०द्वितीयः प्रकाशः; 36A, ०तृतीयः प्रकाशः; 55B, ० चतुर्थः प्रकाशः; 58A, ०पञ्चमः प्रकाशः; 62B, ०षष्ठः प्रकाशः ।

The works quoted are:—

1A, तन्त्रराज, शारदा, रामार्च्चनचन्द्रिका; 2A, पिङ्गलागम, कुलार्णव, रत्नसागर; 2B, सारसंग्रह; योगरत्नावली, अगस्तिसंहिता; 3B, तन्त्ररत्नमाला; 4A, मन्त्रदर्पण; 7B, रुद्रयामल; 8B, कल्पलता; मन्त्रसंग्रह; 9B, कादिमत; कुलमूलावतार; 10A, सूर्य्यसिद्धान्त; 10B, मन्त्रदेवप्रकाशिका; 14A, मत्स्यपुराण; व्यवहारोच्चय; 14B, देवल, वराह; 15A, मन्त्रमुक्तावली; 19A, भैरवतन्त्र; 22B, मन्त्रतन्त्रप्रकाश; 23A, वशिष्ठसंहिता; जावालि; 24A, वैष्णवतिलक, ब्रह्माण्डपुराण; 27B, सिंहार्च्चनचन्द्रिका;

28A, क्रमदीपिका ; 29A, प्रणवकल्प ; 34B, शारदा, शिवदीक्षाटीका ; 36B, हरिनाथ ; 37A, शौनकागम ; मन्त्रकोष ; प्रपञ्चसार ; 43A, ज्ञानमाला ; 48B, वायवीयसंहिता ; 55A, तत्त्वसार ; 57B, रत्नकोष ।

6234.

Viṣṇudeva.

9059. मन्त्रदेवप्रकाशिका । *Mantradevaprakāśikā.*

Substance, country-made paper. 10×4 inches. Folia, 1–65+1–6+49-58+1–80. Lines, 10, 10, 12, 7 on a page. Extent in ślokas, 1,900+170+360+1,600. Character, Nāgara. Appearance, some portions old and some portions new. Complete in 32 chapters.

Fol. 1–4 in the first batch, the entire second and fourth batches are later insertions and hence are new in appearance. The work deals with *dīkṣā*, *homa* and other Tantric rites in general as also the worship and *mantras* of various deities. The first and last chapters are somewhat philosophical. It is asserted that, strictly speaking, all *mantras* relate to one deity alone who is the Supreme Brahman. A MS of the work has been described in L. VIII. 2815.

Beginning:—

ॐकारात्माक्षरावीड्भुवनपशिवचिद्धिणामूर्त्तिचिन्ता-
रत्नत्रैयम्बकोद्यन्मतिहरणमहागाणपत्यादिरूपिन् ।
अष्टार्णद्वादशार्णप्रियन्तहरितनोः श्रीवराहाख्यचक्रिन्
कृष्णात्मन् रामविष्णो विविधगुणमहाशक्तिभास्वन्नमस्ते ॥
अनन्तनारायण रामयोगिन् ब्रह्मप्रभो ज्ञानघनाद्यविष्णो ।
अनन्तयोगीश्वर भानुकृष्ण रामाक्षयानन्दगुरो नमस्ते ॥
.....अथ प्रपञ्चसाराद्यमन्त्रशास्त्रानुसारतः ।
गुरूपदिष्टमन्त्राणां देवतादि प्रकाश्यते ॥

End:—

श्रीमत्प्रपञ्चसारादिशास्त्रसंग्रहविग्रहा ।
कृतिर्विजयते सैषा मन्त्रदेवप्रकाशिका ॥
परमाराध्यपौत्रस्य लक्ष्मीधृक्सूरिजन्मनः ।
कृतिः श्रीविष्णुदेवस्य श्रीमत्कोटीश्वरेर्पिता ॥

6235.

2242. *Mantradevaprakāśikā.*

Substance, country-made paper. $10\frac{1}{2} \times 4\frac{1}{2}$ inches. Folium 1. Lines, 9 on a page. Extent in ślokas, 20. Character, Nāgara. Appearance, fresh. Complete in 15 verses.

This contains only the second chapter of the work.

6236.

Vijayarāmācārya.

10160. मन्त्ररत्नाकरः । *Mantraratnākara.*

Substance, country-made paper. $6\frac{3}{4} \times 5$ inches. Folia, 78. Lines, 7–10 on a page. Character, modern Nāgara. Appearance, fresh. Incomplete.

The present MS contains the 14th *taraṅga* only dealing with *mantras* and prayers, addressed to Rādhā. IO. IV. 2588 describes the 13th chapter of the work. Ulwar. Extr. 653 quotes from the beginning of the work. Stein (p. 233) refers to a MS of a commentary on the work by the author himself.

Beginning:—

श्रीगणेशाय नमः ।
अथ राधो(?) प्रवक्ष्यामि सर्व्वतन्त्रेषु गोपितां ।
साधको यां समाराध्य चतुर्व्वर्गफलं लभेत् ॥

यस्याः संप्राप्तिमात्रेण जीवन्मुक्तो भवेन्नरः ।
बृहस्पतिः कुवेरश्च जायते धनविद्ययो[ः] ॥
भृत्यवो दासतां यान्ति दास[ः] स्या[द]वनीपतिः ।
यस्मै कस्मै न दातव्या विद्याराज्ञी सुदुर्लभा ॥
विना श्रीराधिकामन्त्रं कृष्णमन्त्रं तु यो जपेत् ।
स दरिद्रो महामूढ़ः कृष्णापमवाप्नुयात् ॥
श्रीकृष्णोपासकस्तस्माद्राधामन्त्रं समाश्रयेत् ।
मन्त्रोद्धारं प्रवक्ष्यामि सर्व्वतन्त्रेषु गोपितम् ॥

End :—

नानया सदृशी विद्या शीघ्रसिद्धिविधायिनी ।
